टीकार्थ : ***पणमिय*** प्रणाम करके। कर्तारूप कौन प्रणाम करके ? ***एसो*** यह मैं प्रणाम करके। किससे प्रणाम करके ? ***सिरसा*** उत्तमाङ्गरूप शिर से/शिर झुकाकर प्रणाम करके। किसे प्रणाम करके ? ***समयमिणं*** इस प्रत्यक्ष विद्यमान समय को प्रणाम करके। किस विशेषतावाले इसे प्रणामकर ? ***समणमुहुग्गदं*** सर्वज्ञ-वीतराग महाश्रमण के मुख से निकले हुए को प्रणामकर। और यह किस विशेषतावाला है ? ***अट्ठं*** जीवादि पदार्थमय है। और इसका क्या रूप है ? ***चदुगदिविणिवारणं*** नरकादि चारों गतियों का निवारण करनेवाला है। और यह कैसा है ? ***सणिव्वाणं*** सम्पूर्ण कर्मों से विशेषरूप से छूटने लक्षणरूप निर्वाणसहित है। इस प्रकार का शब्द-समय कैसा है ?

जो गम्भीर, मधुर, मनोहरतर, दोषरहित, हितकर; कण्ठ, औष्ठ आदि वचो निमित्त से

स्पष्टं तदभीष्टवस्तुकथकं निःशेषभाषात्मकं,
दूरासन्नसमं समं निरुपमं जैनं वचः पातु नः॥

तथाचोक्तं -

एनाज्ञानतमस्ततिर्विघटते ज्ञेये हिते चाहिते,
हानादानमुपेक्षणं च समभूत्तस्मिन् पुनः प्राणिनः।
येनेयं दृगपैति तां परमतां वृत्तं च येनानिशं,
तज्ज्ञानं मम मानसाम्बुजमुदेस्तत्सूर्यवर्योदयः॥

इत्यादि गुणविशिष्टवचनात्मकं नत्वा किं करोमि ? *वोच्छामि* वक्षामि। कं ? अर्थसमयं *सुणुह* शृणुत यूयं हे भव्या इति क्रियाकारकसम्बन्धः।

अथवा द्वितीयव्याख्यानं – श्रमणमुखोद्गतं पञ्चास्तिकायलक्षणार्थसमयप्रतिपादकत्वादर्थं परंपरया चतुर्गतिनिवारणं चतुर्गतिनिवारणत्वादेव सनिर्वाणं एषोऽहं ग्रन्थकरणोद्यतमनाः कुण्डकुन्दाचार्यः प्रणम्य नमस्कृत्य नत्वा। केन ? शिरसा मस्तकेनोत्तमाङ्गेन। कं प्रणम्य ? पूर्वोक्तश्रमणमुखोद्गतादि-विशेषणचतुष्टयसंयुक्तं समयं शब्दरूपं द्रव्यागममिमं प्रत्यक्षीभूतं तं शब्दसमयं प्रणम्य। पश्चात् किं

रहित; पवन के रुकने से प्रगट नहीं होनेवाले, स्पष्ट उन अभीष्ट वस्तुओं को कहनेवाले, सर्व भाषात्मक, दूर व निकटवर्ती को समान, समतामय तथा उपमारहित हैं – जिनेन्द्र के ऐसे वचन हमारी रक्षा करें।

वैसा ही कहा भी है –

'जिसके द्वारा अज्ञानरूपी अन्धकार का विस्तार नष्ट हो जाता है तथा जिससे ज्ञेय के प्रति उपेक्षा, हित में आदान और अहित के प्रति परिहार/त्यागभाव प्राणिओं को प्रगट होता है, जिससे सम्यग्दर्शन प्रगट होता है, सदैव मिथ्या श्रद्धा-मिथ्या चारित्र नष्ट होते हैं – ऐसा वह ज्ञानरूपी श्रेष्ठ सूर्य, मेरे मनकमल को विकसित करने-हेतु उदित होओ।'

इत्यादि गुणविशिष्ट वचनों को नमस्कारकर क्या करता हूँ। ***वोच्छामि*** कहूँगा। किसे कहेंगे ? अर्थसमय को कहूँगा। ***सुणुह*** हे भव्यो! तुम सभी सुनो – इस प्रकार क्रिया-कारक सम्बन्ध है।

अथवा दूसरा व्याख्यान ***समणमुहुग्गदमट्ठं*** श्रमण के मुख से निर्गत पञ्चास्तिकाय लक्षण अर्थसमय का प्रतिपादक होने से अर्थ है, ***चदुग्गदिणिवारणं सणिव्वाणं*** परम्परा से चारों गतिओं की निवारणता होने से ही निर्वाणसहित है। ***एसो*** यह मैं ग्रन्थ करने के लिए

करोमि? वक्ष्यामि कथयामि प्रतिपादयामि शृणुत हे भव्या यूयम्। कं वक्ष्यामि? तमेव शब्दसमयवाच्यमर्थसमयं शब्दसमयं नत्वा पश्चादर्थसमयं वक्ष्ये ज्ञानसमयप्रसिद्ध्यर्थमिति। वीतरागसर्वज्ञमहाश्रमणमुखोद्गतं शब्दसमयं कश्चिदासन्नभव्यः पुरुषः शृणोति शब्दसमयवाच्यं पश्चात्पञ्चास्तिकायलक्षणमर्थसमयं जानाति तदन्तर्गते शुद्धजीवास्तिकायलक्षणेऽर्थे वीतराग-निर्विकल्पसमाधिना स्थित्वा चतुर्गतिनिवारणं करोति चतुर्गतिनिवारणादेव निर्वाणं लभते स्वात्मोत्थ-मनाकुलत्वलक्षणं निर्वाणफलभूतमनन्तसुखं च लभते जीवस्तेन कारणेनायं द्रव्यागमरूपशब्दसमयो नमस्कर्तुं व्याख्यातुं च युक्तो भवति।

इत्यनेन व्याख्यानक्रमेण सम्बन्धाभिधेयप्रयोजनानि सूचितानि भवन्ति। कथमिति चेत्? विवरणरूपमाचार्यवचनं व्याख्यानं, गाथासूत्रं व्याख्येयमिति व्याख्यानव्याख्येयसम्बन्धः, द्रव्यागमरूप-शब्दसमयोऽभिधानं वाचकः तेन शब्दसमयेन वाच्यः पंचास्तिकायलक्षणोऽर्थसमयोऽभिधेय इति

उद्यमशील मनवाला कुन्दकुन्दाचार्य ***प्रणम्य*** नमस्कार करके। कैसे नमस्कार करके? ***सिरसा*** मस्तक/उत्तमाङ्ग से/शिर झुकाकर नमस्कार करके। किसे नमस्कार कर? ***समयमिणं*** पूर्वोक्त समय को, श्रमणमुखोद्गत आदि चार विशेषणों से सहित उस प्रत्यक्षीभूत शब्दरूप द्रव्यागम शब्दसमय को प्रणाम कर। इसके बाद क्या करता हूँ? ***वक्ष्यामि*** कहता हूँ, प्रतिपादित करता हूँ; ***शृणुत*** हे भव्य! तुम सुनो!! किसे कहता हूँ? उसी शब्दसमय से वाच्य अर्थसमय को, शब्दसमय को नमस्कार कर, बाद में ज्ञान-समय की प्रसिद्धि के लिए अर्थसमय को कहता हूँ।

वीतराग-सर्वज्ञ महा श्रमण मुखोद्गत शब्दसमय को कोई आसन्न भव्य पुरुष सुनता है; पश्चात् शब्दसमय के वाच्यभूत पञ्चास्तिकाय लक्षण अर्थसमय को जानता है। उसके अन्तर्गत शुद्ध जीवास्तिकाय लक्षण अर्थ में वीतराग निर्विकल्प समाधि द्वारा स्थिर होकर चारों गतिओं का निवारण करता है, चतुर्गति के निवारण से ही निर्वाण प्राप्त होता है और जीव निर्वाण-फलभूत स्वात्मोत्थ अनाकुलता लक्षण अनन्त सुख प्राप्त करता है; इस कारण यह द्रव्यागमरूप शब्दसमय नमस्कार करने और व्याख्यान करने-योग्य है।

इस प्रकार इस व्याख्यानक्रम से सम्बन्ध, अभिधेय, प्रयोजन सूचित होते हैं।

वे इससे किस प्रकार सूचित होते हैं?

विवरणरूप आचार्य के वचन व्याख्यान हैं, गाथासूत्र व्याख्येय है – इस प्रकार व्याख्यान-व्याख्येय सम्बन्ध है; द्रव्यागमरूप शब्दसमय अभिधान/वाचक है, उस शब्दसमय द्वारा वाच्य पञ्चास्तिकाय लक्षण अर्थसमय अभिधेय/वाच्य है – इस प्रकार अभिधान-अभिधेय लक्षण

अभिधानाभिधेयलक्षणसम्बन्धः, फलं प्रयोजनं चाज्ञानविच्छित्त्यादिनिर्वाणसुखपर्यन्तमिति सम्बन्धाभिधेयप्रयोजनानि ज्ञातव्यानि भवन्तीति भावार्थः ॥ २ ॥

एवमिष्टाभिमतदेवतानमस्कारमुख्यतया गाथाद्वयेन प्रथमस्थलं गतम्।

अथ गाथापूर्वार्धेन शब्दज्ञानार्थरूपेण त्रिधाभिधेयतां समयशब्दस्य, उत्तरार्धेन तु लोकालोकविभागं च प्रतिपादयामीत्यभिप्रायं मनसि धृत्वा सूत्रमिदं कथयति, एवमग्रेऽपि वक्ष्यमाणं विवक्षिताविवक्षितसूत्रार्थं मनसि संप्रधार्य अथवास्य सूत्रस्याग्रे सूत्रमिदमुचितं भवतीत्येवं निश्चित्य सूत्रमिदं प्रतिपादयतीति पातनिकालक्षणमनेन क्रमेण यथासंभवं सर्वत्र ज्ञातव्यम् —

समवाओ पंचण्हं समयमिणं जिणवरेहिं पण्णत्तं।
सो चेव हवदि लोगो तत्तो अमओ अलोयक्खं ॥ ३ ॥

समवाओ पंचण्हं* पंचानां जीवाद्यर्थानां समवायः समूहः *समयमिणं* समयोऽयमिति *जिणवरेहिं

सम्बन्ध है। अज्ञान के नाश से लेकर निर्वाण-सुख-पर्यन्त फल और प्रयोजन है।

इस प्रकार सम्बन्ध, अभिधेय और प्रयोजन जानने-योग्य हैं — यह भावार्थ है॥ २॥

[*इस गाथा की टीका में आचार्य अमृतचन्द्र ने चदुग्गदिणिवारणं से पारतन्त्र्य-निवृत्ति तथा सणिव्वाणं से स्वातन्त्र्य-प्राप्ति लक्षण फल को फलित किया है।*]

इस प्रकार इष्ट-अभिमत देवता को नमस्कार की मुख्यता से दो गाथाओं द्वारा प्रथम स्थल पूर्ण हुआ।

अब, गाथा के पूर्वार्ध द्वारा समय शब्द के शब्द, ज्ञान और अर्थरूपता से तीन भेदों का कथन तथा उत्तरार्ध द्वारा लोकालोक का विभाग प्रतिपादित करता हूँ — ऐसा अभिप्राय मन में धारणकर यह गाथा कहते हैं; इसी प्रकार आगे भी कही जानेवाली विवक्षित-अविवक्षित गाथाओं के लिए मन में धारण कर अथवा इस गाथा के आगे यह ही गाथा उचित है, ऐसा निश्चयकर यह गाथा प्रतिपादित करते हैं; इस प्रकार इस क्रम से पातनिका का लक्षण यथासम्भव सर्वत्र जानना चाहिए —

समवाय पाँचों का समय है, जिनवरों ने यह कहा।
है लोक वह ही भिन्न अमित, अलोक नभ उससे कहा॥ ३॥

गाथार्थ : पाँच अस्तिकायों का समवायरूप समय, जिनेन्द्र भगवान द्वारा कहा गया है, वही लोक है तथा उससे आगे असीम अलोक नामक आकाश है।

पण्णत्तं जिनवरैः प्रज्ञप्तः कथितः *सो चेव हवदि लोगो* स चैव पंचानां मेलापकः समूहो भवति। स कः ? लोकः। *तत्तो* ततस्तस्मात्पंचानां जीवाद्यर्थानां समवायाद्बहिर्भूतः *अमओ* अमितोऽप्रमाणः अथवा *'अमओ'* अकृत्रिमो न केनापि कृतः न केवलं लोकः *अलोयक्खं* अलोक इत्याख्या संज्ञा यस्य स भवत्यलोकाख्यः, *'अलोय खं'* इति भिन्नपदपाठान्तरे च अलोक खं इति कोऽर्थः ? खं शुद्धाकाशमिति संग्रहवाक्यम्।

तद्यथा – समयशब्दस्य शब्दज्ञानार्थभेदेन पूर्वोक्तमेव त्रिधा व्याख्यानं विव्रीयते। पंचानां जीवाद्यस्तिकायानां प्रतिपादको वर्णपदवाक्यरूपो वादः पाठः शब्दसमयो द्रव्यागम इति यावत्, तेषामेव पंचानां मिथ्यात्वोदयाभावे सति संशयविमोहविभ्रमरहितत्वेन सम्यगवायो बोधो निर्णयो निश्चयो ज्ञानसमयोऽर्थपरिच्छित्तिर्भावश्रुतरूपो भावागम इति यावत् तेन द्रव्यागमरूपशब्दसमयेन वाच्यो भावश्रुतरूपज्ञानसमयेन परिच्छेद्यः पंचानामस्तिकायानां समूहोऽर्थसमय इति भण्यते। तत्र शब्दसमया-

---

टीकार्थ : ***समवाओ पंचण्हं*** जीवादि पाँच अर्थों/पदार्थों का समूह; ***समयमिणं*** यह समय है – ऐसा ***जिणवरेहिं पण्णत्तं*** जिनवरों ने कहा है। ***सो चेव हवदि*** और वही पाँचों का समूह है। वह क्या है ? ***लोगो*** वह लोक है। ***तत्तो*** उन पाँचों जीवादि अर्थों के समवाय से बहिर्भूत ***अमओ*** अमित/अप्रमाण/असीम अथवा ***अमओ*** अकृत्रिम/किसी के द्वारा नहीं बनाया गया और न मात्र लोक अपितु ***अलोयक्खं*** अलोक है नाम जिसका, वह अलोकाकाश है। ***'अलोय खं'*** (पाठान्तर भी मिलता है) ऐसे भिन्न पद-पाठान्तर में अलोकाकाश है। 'अलोक ख' – इसका क्या अर्थ है ? ख अर्थात् शुद्ध/मात्र आकाश 'अलोक ख' का अर्थ है; यह संग्रह वाक्य है।

वह इस प्रकार – पूर्वोक्त समय शब्द का ही शब्द, ज्ञान और अर्थ के भेद से तीन प्रकार का व्याख्यान करते हैं। जीवादि पाँच अस्तिकायों का प्रतिपादक वर्ण-पद-वाक्यरूप वाद/पाठ शब्दसमय है, उसे ही द्रव्य-आगम कहते हैं। मिथ्यात्व के उदय का अभाव होने पर उन्हीं पाँचों का संशय, विमोह, विभ्रम से रहित सम्यक् अवाय, बोध, निर्णय, निश्चय होना, ज्ञानसमय है; इसे ही पदार्थों की जानकारीमय भावश्रुतरूप भावागम कहते हैं। उस द्रव्यागमरूप शब्दसमय से वाच्य/कहने-योग्य, भावश्रुतरूप ज्ञानसमय से परिच्छेद्य/जानने-योग्य पाँच अस्तिकायों का समूह अर्थसमय कहलाता है। उनमें से शब्दसमय के माध्यम से ज्ञानसमय की प्रसिद्धि के लिए यहाँ अर्थसमय का व्याख्यान प्रारम्भ किया जा रहा है।

वह अर्थसमय भी लोक कहलाता है। वह लोक कैसे/क्यों कहलाता है ? जो कुछ भी पाँचों इन्द्रियों के विषय-योग्य दिखाई देता है, वह पुद्गलास्तिकाय है। जो कुछ भी चेतनारूप है,

धारेण ज्ञानसमयप्रसिद्धयर्थमर्थसमयोऽत्र व्याख्यातुं प्रारब्धः।

स चैवार्थसमयो लोको भण्यते। कथमितिचेत्? यद्दृश्यमान किमपि पंचेन्द्रियविषययोग्यं स पुद्गलास्तिकायो भण्यते, यत्किमपि चिद्रूपं स जीवास्तिकायो भण्यते, तयोर्जीवपुद्गलयोर्गतिहेतुलक्षणो धर्मः, स्थितिहेतुलक्षणोऽधर्मः, अवगाहनलक्षणमाकाशं, वर्तनालक्षणः कालश्च यावति क्षेत्रे स लोकः। तथाचोक्तं – ''लोक्यन्ते दृश्यन्ते जीवादिपदार्था यत्र स लोकः तस्माद्बहिर्भूतमनन्तशुद्धाकाशमलोक'' इति सूत्रार्थः॥ ३॥

अथ पंचास्तिकायानां विशेषसंज्ञाः सामान्य-विशेषास्तित्वकायत्वं च प्रतिपादयति –

जीवा पोग्गलकाया धम्माधम्मं तहेव आयासं।
अत्थित्तम्हि य णियदा अणण्णमइया अणुमहंता॥ ४॥

जीवा पोग्गलकाया धम्माधम्मं तहेव आयासं जीवपुद्गलधर्माधर्माकाशानीति पंचास्तिकायानां विशेषसंज्ञा अन्वर्था ज्ञातव्यः, *अत्थित्तम्हि य णियदा* अस्तित्वे सामान्यविशेषसत्तायां नियताः स्थिताः।

वह जीवास्तिकाय है। उन जीव और पुद्गलों की गति में निमित्त बनने के लक्षणवाला धर्म; स्थिति में निमित्त बनने के लक्षणवाला अधर्म; अवगाहन लक्षणवाला आकाश और वर्तना लक्षणवाला काल, जितने क्षेत्र में है, वह लोक है। वैसा ही कहा भी है – **'जहाँ जीवादि पदार्थ देखे जाते हैं/दिखाई देते हैं, वह लोक है। उससे बहिर्भूत अनन्तमात्र आकाश अलोक है।'** – यह इस गाथा का अर्थ है॥ ३॥

अब, पाँच अस्तिकायों के विशेष नाम, सामान्य-विशेष अस्तित्व और कायत्व का प्रतिपादन करते हैं –

हैं जीव पुद्गल काय धर्म, अधर्म नभ अस्तित्व में।
हैं नियत और अनन्यमय, छोटे बड़े प्रदेश में॥ ४॥

गाथार्थ : जीव, पुद्गलकाय, धर्म, अधर्म और आकाश अस्तित्व में नियत, अनन्यमय और अणु-महान हैं।

टीकार्थ : ***जीवा पोग्गलकाया धम्माधम्मं तहेव आयासं*** जीव, पुद्गल, धर्म, अधर्म और आकाश – ये पाँच अस्तिकायों के विशेष नाम अन्वर्थपरक (सार्थक) जानना चाहिए। ***अत्थित्तम्हि य णियदा*** वे अस्तित्व में, सामान्य-विशेष सत्ता में नियत हैं, स्थित हैं। तब फिर वे कुण्डे में बेर के समान सत्ता से भिन्न होंगे? (ऐसा प्रश्न होने पर उत्तर देते हैं) ऐसा नहीं है, ***अणण्णमइया*** वे अनन्यमय, अपृथग्भूत हैं; जैसे घड़े में रूपादि, शरीर में हाथ आदि, स्तम्भ में

तर्हि सत्तायाः सकाशात्कुण्डे बदराणीव भिन्ना भविष्यन्ति? नैवम्। *अणण्णमइया* अनन्यमया अपृथग्भूताः यथा घटे रूपादयः शरीरे हस्तादयः स्तम्भे सार इत्यनेन व्याख्यानेनाधाराधेयभावेऽप्य-बिनास्तित्वं भणितं भवति।

इदानीं कायत्वं चोच्यते *अणुमहंता* अणुमहान्तः अणुना परिच्छिन्नत्वादणुशब्देनात्र प्रदेशा गृह्यन्ते, अणुभिः प्रदेशैर्महान्तः द्व्यणुकस्कन्दापेक्षया द्वाभ्यामणुभ्यां महान्तोऽणुमहान्तः इति कायत्वमुक्तम्। एकप्रदेशाणोः कथं कायत्वमिति चेत्? स्कन्दानां कारणभूतायाः स्निग्धरूक्षत्वशक्तेः सद्भावादुपचारेण कायत्वं भवति। कालाणूनां पुनर्बन्धकारणभूतायाः स्निग्धरूक्षत्वशक्तेरभावादुप-चारेणापि कायत्वं नास्ति। शक्त्यभावोऽपि कस्मात्? अमूर्तत्वादिति पञ्चास्तिकायानां विशेषसंज्ञा अस्तित्वं कायत्वं चोक्तम्।

अत्र गाथासूत्रेऽनन्तज्ञानादिरूपः शुद्धजीवास्तिकाय एवोपादेय इति भावार्थः॥ ४॥

सार – इस प्रकार का व्याख्यान होने से आधार-आधेयभाव होने पर भी उनका अस्तित्व अबिनाभूत, अभिन्न कहा गया है।

अब, कायत्व कहते हैं – *अणुमहंता* अणु द्वारा ज्ञात होने से यहाँ अणु शब्द से प्रदेश लेना चाहिए। अणु अर्थात् प्रदेश से महान; द्व्यणुक स्कन्ध की अपेक्षा दो अणुओं से महान अणु-महान है। इस प्रकार कायत्व कहा गया। एक प्रदेशी अणु के कायत्व कैसे है? यदि ऐसा प्रश्न हो तो कहते हैं – स्कन्धों की कारणभूत स्निग्ध-रूक्षत्व शक्ति का सद्भाव होने के कारण उपचार से उसे कायत्व है। कालाणुओं के बन्ध की कारणभूत स्निग्ध-रूक्षत्वशक्ति का अभाव होने के कारण उपचार से भी कायत्व नहीं है।

प्रश्न - उनमें इस शक्ति का भी अभाव किस कारण है?

उत्तर - अमूर्तत्व होने के कारण उनमें उस शक्ति का अभाव है।

इस प्रकार पाँच अस्तिकायों के विशेष नाम अस्तित्व और कायत्व कहे गए। यहाँ गाथासूत्र में अनन्त ज्ञानादिरूप शुद्ध जीवास्तिकाय ही उपादेय है – यह भावार्थ है॥ ४॥

[आचार्य अमृतचन्द्र, अनन्यमयता होने पर भी उन पाँच अस्तिकायों की अस्तित्व में नियतता को नय प्रयोग द्वारा स्पष्ट करते हुए लिखते हैं – भगवान ने दो नय कहे हैं – द्रव्यार्थिक और पर्यायार्थिक। वहाँ देशना एक नय के अधीन नहीं है, अपितु दोनों नयों के अधीन है। पर्यायार्थिकनय से कथञ्चित् भिन्न होने पर स्वयं अस्तित्व में व्यवस्थित हैं तथा द्रव्यार्थिकनय से स्वयं ही सत् होते हुए अनन्यमय हैं।

अथ पूर्वोक्तमस्तित्वं कायत्वं च केन प्रकारेण संभवतीति प्रज्ञापयति —

जेसिं अत्थिसहाओ गुणेहिं सह पज्जएहिं विविहेहिं।
ते होंति अत्थिकाया णिप्पण्णं जेहिं तेल्लोक्कं॥ ५॥

जेसिं अत्थिसहाओ गुणेहिं सह पज्जएहिं विविहेहिं ते होंति अत्थि येषां पंचास्तिकायानामस्तित्वं विद्यते। स कः ? स्वभावः सत्ता अस्तित्वं तन्मयत्वं स्वरूपमिति यावत्। कैः सह ? गुणपर्यायैः। कथंभूतैः ? विचित्रैर्नानाप्रकारैस्ते अस्ति भवन्ति इत्यनेन पञ्चानामस्तित्वमुक्तमिति। वार्तिकं तथा कथ्यते — अन्वयिनो गुणाः व्यतिरेकिणः पर्यायाः, अथवा सहभुवो गुणाः क्रमवर्तिनः पर्यायास्ते च द्रव्यात्सकाशात् संज्ञा-लक्षणप्रयोजनादिभेदेन भिन्नाः प्रदेशरूपेण सत्तारूपेण वा चाभिन्नाः। पुनरपि कथंभूताः ? विचित्रा नानाप्रकाराः। केन कृत्वा ? स्वेन स्वभावविभावरूपेणार्थव्यंजनपर्यायरूपेण वा।

जीवस्य तावत्कथ्यन्ते — केवलज्ञानादयः स्वभावगुणा मतिज्ञानादयो विभावगुणाः सिद्धरूपः

इसी प्रकार अणु-महान का विश्लेषण उन्होंने अणुओं से महान, दो अणुओं से महान तथा अणु और महान, अणु-महान — इस प्रकार तीन रूपों में किया है।]

अब, पूर्वोक्त अस्तित्व और कायत्व किस प्रकार सम्भव है, इसका प्रकृष्टरूप में ज्ञान कराते हैं —

जो विविध गुण पर्याय युत, अस्तित्वमय कहते उन्हें।
हैं अस्तिकाय त्रिलोक रचना, उन्हीं से निष्पन्न है॥ ५॥

गाथार्थ : जिनका विविध गुणों और पर्यायों के साथ अस्तिस्वभाव है, वे अस्तिकाय हैं। उनसे तीन लोक निष्पन्न है।

टीकार्थ : ***जेसिं अत्थिसहाओ गुणेहिं सह पज्जएहिं विविहेहिं ते होंति अत्थि*** जिन पञ्चास्तिकायों के अस्तित्व है, वह कौन है ? स्वभाव, सत्ता, अस्तित्व, तन्मयत्व, स्वरूप है। यह किनके साथ है ? यह गुण-पर्यायों के साथ है। वे कैसे हैं ? विभिन्न/अनेक प्रकार के हैं — इसके द्वारा पाँचों का अस्तित्व कहा गया। वार्तिक में भी वैसा ही कहा है — **गुण अन्वयी और पर्यायें व्यतिरेकी होती हैं, अथवा गुण सहभू/सहभावी/सहवर्ती और पर्यायें क्रमवर्ती होती हैं।** वे द्रव्य से संज्ञा, लक्षण, प्रयोजन आदि भेद की अपेक्षा भिन्न हैं तथा प्रदेशरूप या सत्तारूप से अभिन्न हैं। वे और कैसे हैं ? विचित्र/अनेक प्रकार के हैं। किस रूप से अनेक प्रकार के हैं ? अपने स्वभाव-विभावरूप से या अर्थ-व्यञ्जन पर्यायरूप से अनेक प्रकार के हैं।

जीव सम्बन्धी ये सब कहते हैं — केवलज्ञानादि स्वभावगुण, मतिज्ञानादि विभावगुण हैं;

स्वभावपर्यायः नरनारकादिरूपा विभावपर्यायाः। पुद्गलस्य कथ्यन्ते – शुद्धपरमाणौ वर्णादयः स्वभावगुणाः द्वयणुकादिस्कन्दे वर्णादयो विभावगुणाः शुद्धपरमाणुरूपेणावस्थानं स्वभावद्रव्यपर्यायः वर्णादिभ्यो वर्णान्तरादिपरिणमनं स्वभावगुणपर्यायः द्वयणुकादिस्कन्दरूपेण परिणमनं विभाव-द्रव्यपर्यायाः तेष्वेव द्वयणुकादिस्कन्देषु वर्णान्तरादिपरिणमनं विभावगुणपर्यायाः। एते जीवपुद्गलयो-र्विशेषगुणाः कथिताः। सामान्यगुणाः पुनरस्तित्ववस्तुत्वप्रमेयत्वागुरुलघुत्वादयः सर्वद्रव्य-साधारणाः। धर्मादीनां विशेषगुणपर्यायाः अग्रे यथास्थानेषु कथ्यन्ते। इत्थंभूतगुणपर्यायैः सह येषां पञ्चास्तिकाया-नामस्तित्वं विद्यते तेऽस्ति भवन्तीति।

इदानीं कायत्वं चोच्यते – *काया* कायाः इव काया बहुप्रदेशप्रचयत्वाच्छरीरवत्। किंकृतं तैः पञ्चास्तिकायैः ? *णिप्पण्णं जेहिं तेल्लोक्कं* निष्पन्नं जातमुत्पन्नं यैः पञ्चास्तिकायैः। किं निष्पन्नं ? त्रैलोक्यम्। अनेनापि गाथाचतुर्थपादेनास्तित्वं कायत्वं चोक्तम्। कथमितिचेत् ? त्रैलोक्ये ये केचनोत्पाद-व्ययध्रौव्यवन्तः पदार्थास्ते उत्पादव्ययध्रौव्यरूपमस्तित्वं कथयन्ति। तदपि कथमिति चेत् ? उत्पादव्यय-

---

सिद्धरूप स्वभावपर्याय है, नर-नारकादि रूप विभावपर्यायें हैं। ये ही पुद्गल सम्बन्धी कहते हैं – शुद्ध परमाणु के वर्णादि स्वभावगुण हैं, द्वयणुकादि स्कन्धों के वर्णादि विभावगुण हैं; शुद्ध परमाणुरूप से अवस्थान स्वभाव द्रव्यपर्याय है, वर्णादि से अन्य वर्णादिरूप परिणमन स्वभाव गुणपर्याय है। द्वयणुकादि स्कन्धरूप से परिणमन विभाव द्रव्यपर्यायें हैं, उन द्वयणुकादि स्कन्धों में ही अन्य वर्णादिरूप परिणमन विभाव गुणपर्यायें हैं। ये जीव-पुद्गल के विशेष गुण कहे। अस्तित्व, वस्तुत्व, प्रमेयत्व, अगुरुलघुत्व आदि सामान्यगुण सभी द्रव्यों में साधारण हैं। धर्मादि के विशेष गुण-पर्याय आगे यथास्थान कहे गए हैं। इस प्रकार के गुण-पर्यायों के साथ जिन पाँच अस्तिकायों का अस्तित्व है, वे 'अस्ति' हैं।

अब, कायत्व कहते हैं – *काय* काय के समान काय, बहुप्रदेशों का प्रचय (समूह) होने के कारण शरीर के समान। उन पञ्चास्तिकायों से क्या किया गया है ? ***णिप्पण्णं जेहिं*** उन पञ्चास्तिकायों से निष्पन्न उत्पन्न है। उनसे क्या निष्पन्न है ? ***तइलुक्कं*** तीन लोक निष्पन्न है।

गाथा के इस चतुर्थ पाद के द्वारा ही अस्तित्व और कायत्व कहे गए हैं। इसके द्वारा वे कैसे कहे गए हैं ? यदि ऐसा प्रश्न हो (तो कहते हैं) – **तीन लोक में जो कोई उत्पाद-व्यय-ध्रौव्यवान पदार्थ हैं; वे उत्पाद, व्यय, ध्रौव्यरूप अस्तित्व कहलाते हैं। वे अस्तित्व कैसे कहलाते हैं ? यदि ऐसा प्रश्न हो (तो कहते हैं) – 'उत्पाद-व्यय-ध्रौव्य युक्त सत् है' – ऐसा वचन होने से (तत्त्वार्थसूत्र, पञ्चमोऽध्याय, सूत्र ३०) ऊर्ध्व-अधो-मध्य भागरूप से तीन लोक के आकार परिणत जीव, पुद्गल आदि के सावयवता, सांशकता, सप्रदेशता**

ध्रौव्यरूपं सदिति वचनात् ऊर्ध्वाधोमध्यभागरूपेण जीवपुद्गलादीनां त्रिभुवनाकारपरिणतानां सावयवत्वात्सांशकत्वात् सप्रदेशत्वात् कालद्रव्यं विहाय कायत्वं च विद्यते न केवलं पूर्वोक्तप्रकारेण, अनेन च प्रकारेणास्तित्वं कायत्वं च ज्ञातव्यम्।

तत्र शुद्धजीवास्तिकायस्य यानन्तज्ञानादिगुणसत्ता सिद्धपर्यायसत्ता च शुद्धासंख्यातप्रदेशरूपं कायत्वमुपादेयमिति भावार्थः॥ ५॥

एवं गाथात्रयपर्यन्तं पञ्चास्तिकायसंक्षेपव्याख्यानं द्वितीयस्थलं गतम्।

अथ पञ्चास्तिकायानां कालस्य च द्रव्यसंज्ञां कथयति —

ते चेव अत्थिकाया तिक्कालियभावपरिणदा णिच्चा।
गच्छंति दवियभावं परियट्टणलिंगसंजुत्ता॥ ६॥

ते चेव अत्थिकाया तिक्कालियभावपरिणदा णिच्चा ते चैव पूर्वोक्ताः पञ्चास्तिकायाः यद्यपि

होने से कालद्रव्य को छोड़कर (शेष सभी के) कायत्व है। इस प्रकार मात्र पूर्वोक्त प्रकार से ही नहीं; इस प्रकार से भी अस्तित्व-कायत्व जानना चाहिए।

उनमें से शुद्ध जीवास्तिकाय की जो अनन्त ज्ञानादि गुणरूप सत्ता और सिद्ध पर्यायरूप सत्ता है तथा शुद्ध असंख्यात प्रदेशरूप कायत्व है, वह ही उपादेय है – यह भावार्थ है॥ ५॥

[आचार्य अमृतचन्द्र ने इस गाथा-टीका में अस्तित्व और कायत्व को सतर्क सिद्ध किया है, जो मूलतः पठनीय है।]

इस प्रकार दूसरे स्थल में पञ्चास्तिकाय का संक्षेप व्याख्यानपरक तीन गाथाओं पर्यन्त प्रकरण पूर्ण हुआ।

अब, पञ्चास्तिकायों की और काल की द्रव्य संज्ञा कहते हैं –

त्रैकालवर्ती भाव परिणत, नित्य अस्तिकाय हैं।
व काल वर्तन चिह्नयुत, सब द्रव्य संज्ञा प्राप्त हैं॥ ६॥

गाथार्थ : त्रिकालवर्ती भावों से परिणमित, नित्य वे ही अस्तिकाय, परिवर्तन लिङ्ग (काल) सहित द्रव्यभाव को प्राप्त होते हैं।

टीकार्थ : ते चेव अत्थिकाया तिक्कालियभावपरिणदा णिच्चा वे ही पूर्वोक्त पञ्चास्तिकाय यद्यपि पर्यायार्थिकनय से त्रैकालिक भाव परिणत/त्रिकालवर्ती पर्यायों रूप से

पर्यायार्थिकनयेन त्रैकालिकभावपरिणतास्त्रिकालविषयपर्यायपरिणताः संतः क्षणिका अनित्या विनश्वरा भवन्ति तथापि द्रव्यार्थिकनयेन नित्या एव। एवं द्रव्यार्थिकपर्यायार्थिकनयाभ्यां नित्यानित्यात्मकाः संतः *गच्छंति दवियभावं* द्रव्यभावं गच्छन्ति द्रव्यसंज्ञां लभन्ते। पुनरपि कथंभूताः संतः ? *परियट्टण-लिंगसंजुत्ता* परिवर्तनमेव जीवपुद्गलादिपरिणमनमेवाग्नेर्धूमवत् कार्यभूतं लिङ्गं चिन्हं गमकं ज्ञापकं सूचनं यस्य स भवति परिवर्तनलिङ्गः कालाणुर्द्रव्यकालस्तेन संयुक्ताः। ननु कालद्रव्यसंयुक्ता इति वक्तव्यं परिवर्तनलिङ्गसंयुक्ता इति अव्यक्तवचनं किमर्थमिति ? नैवम्। पञ्चास्तिकायप्रकरणे कालस्य मुख्यता नास्तीति पदार्थानां नवजीर्णपरिणतिरूपेण कार्यलिङ्गेन ज्ञायते यतः कारणात् तेनैव कारणेन परिवर्तनलिङ्ग इत्युक्तम्।

अत्र षड्द्रव्येषु मध्ये दृष्टश्रुतानुभूताहारभयमैथुनपरिग्रहादिसंज्ञादिसमस्तपरद्रव्यालम्बनोत्पन्न-संकल्पविकल्पशून्यशुद्धजीवास्तिकायश्रद्धानज्ञानानुष्ठानरूपाभेदरत्नत्रयलक्षणनिर्विकल्पसमाधिसंजात-वीतरागसहजापूर्वपरमानन्दरूपेण स्वसंवेदनज्ञानेन गम्यं प्राप्यं भरितावस्थं शुद्धनिश्चयनयेन स्वकीय-देहान्तर्गतं जीवद्रव्यमेवोपादेयमिति भावार्थः ॥ ६ ॥

परिणमित होते हुए क्षणिक, अनित्य, विनश्वर हैं; तथापि द्रव्यार्थिकनय से नित्य ही हैं। इस प्रकार द्रव्यार्थिक-पर्यायार्थिकनय की अपेक्षा नित्यानित्यात्मक होते हुए ***गच्छंति दवियभावं*** द्रव्यभाव को जाते हैं, द्रव्य नाम प्राप्त करते हैं। और कैसे होते हुए वे द्रव्य नाम पाते हैं ? ***परियट्टणलिंगसंजुत्ता*** अग्नि का धुएँ के समान जीव, पुद्गलादि का परिणमन ही है कार्यभूत लिङ्ग, चिह्न, गमक, ज्ञापक, सूचक जिसका, वह है परिवर्तन लिङ्ग कालाणु, द्रव्य काल, उससे सहित होते हुए द्रव्य नाम प्राप्त करते हैं।

प्रश्न - 'कालद्रव्य से संयुक्त' – ऐसा कहना चाहिए; 'परिवर्तन लिङ्ग से सहित' – ऐसा अव्यक्त वचन किसलिए कहा गया ?

उत्तर - ऐसा नहीं है। पञ्चास्तिकाय के प्रकरण में काल की मुख्यता नहीं है; क्योंकि वह पदार्थों की नवीन-पुरानी परिणतिरूप कार्यलिङ्ग द्वारा ज्ञात होता है, उस कारण से ही 'परिवर्तन लिङ्ग' – ऐसा कहा गया है।

इन छह द्रव्यों के बीच में शुद्ध निश्चय से दृष्ट, श्रुत, अनुभूत, आहार-भय-मैथुन -परिग्रहादि संज्ञादि समस्त परद्रव्य के आलम्बन से उत्पन्न सङ्कल्प-विकल्प से शून्य, श्रद्धान-ज्ञान-अनुष्ठानरूप अभेद रत्नत्रय लक्षण निर्विकल्प समाधि से उत्पन्न वीतराग सहज अपूर्व परमानन्दमय स्वसम्वेदन ज्ञान द्वारा गम्य, प्राप्त, भरितावस्थ, अपने देह में विद्यमान शुद्ध जीवास्तिकाय नामक जीवद्रव्य ही उपादेय है – यह भावार्थ है ॥ ६ ॥

इस प्रकार कालसहित पञ्चास्तिकायों की संज्ञा के कथनरूप से गाथा पूर्ण हुई।

इति कालसहितपंचास्तिकायानां द्रव्यसंज्ञाकथनरूपेण गाथा गता।

अथ षण्णां द्रव्याणां परस्परमत्यन्तसंकरे स्वकीयस्वकीयस्वरूपादच्यवनमुपदिशति —

अण्णोण्णं पविसंता देंता ओगासमण्णमण्णस्स।
मेलंता वि य णिच्चं सगसब्भावं ण विजहंति॥ ७॥

अण्णोण्णं पविसंता अन्यक्षेत्रात्क्षेत्रान्तरं प्रति परस्परसम्बन्धार्थमागच्छन्तः *देंता ओगासमण्णमण्णस्स* आगतानां परस्परमवकाशदानं ददतः *मेलंतावि य णिच्चं* अवकाशदानानन्तरं परस्परमेलापकेन स्वकीयावस्थानकालपर्यन्तं युगपत्प्राप्तिरूपः संकरः परस्परविषयगमकरूपव्यतिकरः ताभ्यां बिना नित्यं सर्वकालं तिष्ठन्तोऽपि *सगसब्भावं ण विजहंति* स्वस्वरूपं न त्यजन्तीति।

अथवा अन्योन्यं प्रविशन्तः सक्रियवन्तः जीवपुद्गलापेक्षया, आगतानामवकाशं ददतः इति सक्रियनिःक्रियद्रव्यमेलापकापेक्षया, नित्यं सर्वकालं मेलापकेन तिष्ठन्त इति धर्माधर्माकाशकालनिःक्रियद्रव्यापेक्षया।

अब, छहों द्रव्यों के परस्पर अत्यन्त संकर होने पर भी अपने-अपने स्वरूप से अच्यवन का/नहीं छूटने का उपदेश देते हैं —

प्रवेश करते परस्पर में, देते हैं अवकाश भी।
मिलते परस्पर में तथापि, स्व स्वभाव तजें नहीं॥ ७॥

गाथार्थ : वे परस्पर एक दूसरे में प्रवेश करते हैं, एक दूसरे को अवकाश देते हैं, परस्पर में मिलते भी हैं; तथापि सदैव अपने स्वभाव को नहीं छोड़ते हैं।

टीकार्थ : ***अण्णोण्णं पविसंता*** परस्पर सम्बन्ध के लिए अन्य क्षेत्र से अन्य क्षेत्र के प्रति आते हुए को ***देंता ओगासमण्णमण्णस्स*** परस्पर अवकाश-दान देते हुए ***मेलंतावि य णिच्चं*** अवकाश-दान के बाद परस्पर मिलाप से अपने अवस्थान-काल पर्यन्त युगपत्-प्राप्तिरूप संकर, परस्पर विषय-गमनरूप व्यतिकर — इन दोनों के बिना नित्य/हमेशा रहते हुए भी ***सगसब्भावं ण विजहंति*** अपने स्वरूप को नहीं छोड़ते हैं; अथवा सक्रियवान् जीव-पुद्गल की अपेक्षा परस्पर प्रवेश करते हुए; सक्रिय-निष्क्रिय द्रव्यों के मिलाप की अपेक्षा आए हुए को अवकाश देते हुए; धर्म, अधर्म, आकाश, कालरूप निष्क्रिय द्रव्यों की अपेक्षा हमेशा मिलापपूर्वक रहते हुए भी अपने स्वभाव को नहीं छोड़ते हैं।

इस प्रकार छह द्रव्यों में से ख्याति, पूजा, लाभ, दृष्ट, श्रुत, अनुभूत, कृष्ण, नील, कापोतरूप अशुभ लेश्या आदि समस्त परद्रव्यों के आलम्बन से उत्पन्न सङ्कल्प-विकल्परूपी

इति षड्द्रव्यमध्ये ख्यातिपूजालाभदृष्टश्रुतानुभूतकृष्णनीलकापोताशुभलेश्यादिसमस्तपरद्रव्यालम्बनोत्पन्नसंकल्पविकल्पकल्लोलमालारहितं वीतरागनिर्विकल्पसमाधिसमुत्पन्नपरमानन्दरूपसुखरसास्वादपरमसमरसीभावस्वभावेन स्वसंवेदनज्ञानेन गम्यं प्राप्यं सालम्बं आधारं भरितावस्थं शुद्धपारिणामिक-परमभावग्राहकेण शुद्धद्रव्यार्थिकनयेनेति पाठः। निश्चयनयेन स्वकीयदेहान्तर्गतं शुद्धजीवास्तिकायसंज्ञं जीवद्रव्यमेवोपादेयमिति भावार्थः। यत्पुनरन्येषामेकान्तवादिनां रागद्वेषमोहसहितानामपि वायुधारणादिसर्वशून्यध्यानव्याख्यानमाकाशध्यानं वा तत्सर्वं निरर्थकमेव। संकल्पविकल्पयोर्भेदः कथ्यते – बहिर्द्रव्ये चेतनाचेतनमिश्रे ममेदमित्यादिपरिणामः *संकल्पः,* अभ्यन्तरे सुख्यहं दुख्यहं इत्यादिहर्षविषादपरिणामो *विकल्प* इति संकल्पविकल्पलक्षणं ज्ञातव्यम्।

वीतरागनिर्विकल्पसमाधौ वीतरागविशेषणमनर्थकमित्युक्ते सति परिहारमाह – आर्तरौद्ररूपस्य विषयकषायनिमित्तस्याशुभध्यानस्य वर्जनार्थत्वात् हेतुहेतुमद्भावव्याख्यानत्वाद्वा कर्मधारयसमासत्वाद्वा भावनाग्रन्थे पुनरुक्तदोषाभावत्वाद्वा स्वरूपस्य विशेषणत्वाद्वा दृढीकरणार्थत्वाद्वा। एवं वीतरागनिर्विकल्पसमाधिव्याख्यानकाले सर्वत्र ज्ञातव्यं, वीतरागसर्वज्ञनिर्दोषपरमात्मशब्दादिष्वप्यनेनैव प्रकारेण

कल्लोलमाला से रहित वीतराग निर्विकल्प समाधि से समुत्पन्न परमानन्दरूप सुख रसास्वादमय परम समरसीभाव स्वभावरूप स्वसम्वेदन ज्ञान द्वारा जानने-योग्य, प्राप्त होने-योग्य, स्वावलम्ब, आधार, भरितावस्थ (परिपूर्ण) शुद्ध पारिणामिक परमभाव ग्राहक शुद्ध द्रव्यार्थिकनय से या निश्चयनय से अपने देह में विद्यमान शुद्ध जीवास्तिकाय नामक जीवद्रव्य ही उपादेय है – ऐसा भावार्थ है; और जो राग, द्वेष, मोह सहित अन्य एकान्तवादियों के वायु-धारणादि सर्व शून्य ध्यान व्याख्यान अथवा आकाशध्यान हैं, वे सभी निरर्थक हैं।

सङ्कल्प-विकल्प का भेद कहते हैं। चेतन-अचेतन-मिश्र बाह्य द्रव्य में 'यह मेरा है' – ऐसा परिणाम सङ्कल्प है; अन्तरङ्ग में 'मैं सुखी हूँ, मैं दुःखी हूँ' इत्यादि प्रकार का हर्ष-विषादरूप परिणाम विकल्प है – इस प्रकार सङ्कल्प-विकल्प का लक्षण जानना चाहिए।

वीतराग निर्विकल्प समाधि का वीतराग विशेषण व्यर्थ है – ऐसा कहने पर (उसका) निराकरण करते हैं। विषय-कषाय निमित्तक आर्त-रौद्ररूप अशुभध्यान के निषेधार्थ होने से, हेतु-हेतुमद्भाव का व्याख्यान होने से, कर्मधारय समास होने से, भावनाग्रन्थ में पुनरुक्ति दोष का अभाव होने से, स्वरूप का विशेषण होने से अथवा दृढ़ करने के लिए होने से निर्विकल्प समाधि का भी वीतराग विशेषण दिया जाता है। **वीतराग निर्विकल्प समाधि के व्याख्यानकाल में इस प्रकार सर्वत्र जानना चाहिए।** वीतराग, सर्वज्ञ, निर्दोष, परमात्मा इत्यादि शब्दों में भी इसी प्रकार

पूर्वपक्षे कृते यथासंभवं परिहारो दातव्यः इति। यत एव कारणाद्वीतरागस्तत एव कारणान्निर्विकल्पसमाधिः इति हेतुहेतुमद्भावशब्दस्यार्थः ॥ ७ ॥

इति संकरव्यतिकरदोषपरिहारेण गाथा गता।

एवं स्वतन्त्रगाथाद्वयेन तृतीयस्थलं गतम्।

इति *प्रथममहाधिकारे* सप्तगाथाभिः स्थलत्रयेण *समयशब्दार्थपीठिकाभिधानः प्रथमोऽन्तराधिकारः समाप्तः* ॥

अथ *सत्ता सव्वपदत्था....* इमां गाथामादिं कृत्वा पाठक्रमेण चतुर्दशगाथाभिर्जीवपुद्गलादिद्रव्यविवक्षारहितत्वेन सामान्यद्रव्यपीठिका कथ्यते। तत्र चतुर्दशगाथासु मध्ये सामान्यविशेषसत्तालक्षणकथनरूपेण *सत्ता सव्वपदत्था* इत्यादि प्रथमस्थले गाथासूत्रमेकम्। तदनन्तरं सत्ताद्रव्ययोरभेदो द्रव्यशब्दव्युत्पत्तिकथनमुख्यत्वेन च *दवियदि* इत्यादि द्वितीयस्थले सूत्रमेकम्। अथ द्रव्यस्य लक्षणत्रयसूचनरूपेण *दव्वं सल्लक्खणियं* इत्यादि तृतीयस्थले सूत्रमेकम्। तदनन्तरं लक्षणद्वयप्रतिपादनरूपेण *उप्पत्ती य विणासो* इत्यादि सूत्रमेकम्। अथ तृतीयलक्षणकथनेन *पज्जयरहियं* इत्यादि गाथाद्वयम्। एवं समुदायेन

से पूर्वपक्ष प्रस्तुतकर यथासम्भव परिहार करना चाहिए। जिस कारण वीतराग हैं, उसी कारण निर्विकल्प समाधि है – इस प्रकार हेतु-हेतुमद्भाव शब्द का अर्थ है ॥ ७ ॥

इस प्रकार संकर-व्यतिकर दोष के निराकरण द्वारा गाथा पूर्ण हुई।

इस प्रकार दो स्वतन्त्र गाथाओं द्वारा तीसरा स्थल पूर्ण हुआ।

इस प्रकार प्रथम महाधिकार में सात गाथाओं द्वारा तीन स्थल से ***समय शब्दार्थ पीठिका*** नामक ***प्रथम अन्तराधिकार*** पूर्ण हुआ।

अब ***सत्तासव्वपदत्था...*** इस गाथा से प्रारम्भ कर पाठक्रम से चौदह गाथाओं द्वारा जीव-पुद्गल आदि द्रव्यों की विवक्षा से रहित होने के कारण ***सामान्य द्रव्य पीठिका*** (नामक ***दूसरा अन्तराधिकार***) कहते हैं। वहाँ चौदह गाथाओं में से सामान्य-विशेष सत्ता-लक्षण-कथनरूप से ***सत्तासव्वपदत्था...*** इत्यादि प्रथम स्थल में एक गाथासूत्र, उसके बाद सत्ता और द्रव्य का अभेद तथा द्रव्य शब्द के व्युत्पत्ति-कथन की मुख्यता से ***दवियदि...*** इत्यादि दूसरे स्थल में एक गाथा, तत्पश्चात् द्रव्य के तीन लक्षणों की सूचनारूप से ***दव्वं सल्लक्खणियं...*** इत्यादि तीसरे स्थल में एक गाथा, तदनन्तर दो लक्षणों के प्रतिपादनरूप से ***उप्पत्ती व विणासो...*** इत्यादि एक गाथा तथा तीसरे लक्षण के कथनरूप में ***पज्जयरहियं...*** इत्यादि दो गाथाएँ – इस प्रकार सामूहिक तीन गाथाओं द्वारा, परस्पर सापेक्ष द्रव्यार्थिक और पर्यायार्थिक दोनों नयों के समर्थन की मुख्यता से

गाथात्रयेण द्रव्यार्थिकपर्यायार्थिकपरस्परसापेक्षनयद्वयसमर्थनमुख्यतया चतुर्थस्थलम्। अथ पञ्चमस्थले सर्वैकान्तमतनिराकरणार्थं प्रमाणसप्तभङ्गव्याख्यानमुख्यत्वेन *सियअत्थि* इत्यादि सूत्रमेकम्। एवं चतुर्दशगाथासु मध्ये स्थलपञ्चकसमुदायेन प्रथमसप्तकं गतम्।

अथ द्वितीयसप्तकमध्ये प्रथमस्थले बौद्धमतैकान्तनिराकरणार्थं द्रव्यस्थापनमुख्यत्वेन *भावस्स णत्थि णासो* इत्याद्यधिकारगाथासूत्रमेकं, तस्या विवरणार्थं गाथाचतुष्टयम्। तत्र गाथाचतुष्टयमध्ये तस्यैवाधिकारसूत्रस्य द्रव्यगुणपर्यायव्याख्यानमुख्यत्वेन *भावा जीवादीया* इत्यादि सूत्रमेकम्। अथ मनुष्यादिपर्यायस्य विनाशोत्पादकत्वेऽपि ध्रुवत्वेन विनाशो नास्तीति कथनरूपेण *मणुअत्तणेण* इत्यादि सूत्रमेकम्। अथ तस्यैव दृढीकरणार्थं *सो चेव* इत्यादि सूत्रमेकम्। अथैवं द्रव्यार्थिकनयेन सदसतोर्विनाशोत्पादौ न स्तः पर्यायार्थिकनयेन पुनर्भवत इति नयद्वयव्याख्यानोपसंहाररूपेण *एवं सदो विणासो* इत्यादि उपसंहारगाथासूत्रमेकं इति द्वितीयस्थले समुदायेन गाथाचतुष्टयम्। तदनन्तरं तृतीयस्थले सिद्धस्य पर्यायार्थिकनयेनासदुत्पादमुख्यतया *णाणावरणादीया* इत्यादि सूत्रमेकम्। अथैवं चतुर्थस्थले द्रव्यरूपेण नित्यत्वेऽपि पर्यायार्थिकनयेन संसारिजीवस्य देवत्वाद्युत्पादव्ययकर्तृत्वव्याख्यानोपसंहारमुख्यत्वेन द्रव्यपीठिकासमाप्त्यर्थं वा *एवं भावं* इत्यादि गाथासूत्रमेकं; इति समुदायेन चतुर्भिःस्थलैर्द्वितीयसप्तकं गतम्। एवं चतुर्दशगाथाभिर्नवभिरन्तरस्थलैर्द्रव्यपीठिकायां समुदायपातनिका।

चतुर्थ स्थल है। इसके बाद पाँचवें स्थल में सभी एकान्त मतों के निराकरण के लिए प्रमाण सप्तभङ्गी के व्याख्यान की मुख्यता से ***सिय अत्थि...*** इत्यादि एक गाथा है। इस प्रकार चौदह गाथाओं में पाँच स्थलों के समुदाय द्वारा प्रथम सप्तक पूर्ण हुआ।

अब, द्वितीय सप्तक में से प्रथम स्थल में बौद्धमत के एकान्त का निराकरण करने के लिए द्रव्य के स्थापन की मुख्यता से ***भावस्स णत्थि णासो...*** इत्यादि एक गाथासूत्र है, उसके विवरण के लिए चार गाथाएँ हैं। उन चार गाथाओं में उसी अधिकारसूत्र का द्रव्य-गुण-पर्याय के व्याख्यान की मुख्यता से ***भावा जीवादीया...*** इत्यादि एक गाथा, मनुष्यादि पर्याय की विनाश-उत्पादकता में भी ध्रुवरूप से विनाश नहीं होता है – इस कथनरूप से **मणुअत्तणेण...** इत्यादि एक गाथा, इसके बाद उसे ही दृढ़ करने के लिए ***सो चेव...*** इत्यादि एक गाथा; उसी प्रकार द्रव्यार्थिकनय से सत् का विनाश, असत् का उत्पाद नहीं है, पर्यायार्थिकनय से वे दोनों होते हैं। – इस प्रकार दो नयों सम्बन्धी व्याख्यान के उपसंहाररूप से ***एवं सदो विणासो...*** इत्यादि एक उपसंहार गाथासूत्र – इस प्रकार दूसरे स्थल में समूहरूप से चार गाथाएँ हैं।

तत्पश्चात् तीसरे स्थल में सिद्ध के पर्यायार्थिकनय की अपेक्षा असद् उत्पाद की मुख्यता से ***णाणावरणादीया...*** इत्यादि एक गाथा है। इसी प्रकार चौथे स्थल में द्रव्यरूप से नित्यता होने पर भी पर्यायार्थिकनय से संसारी जीव के देवत्व आदि (पर्यायों) के उत्पाद-व्यय सम्बन्धी

तद्यथा : अथास्तित्वस्वरूपं निरूपयति अथवा सत्तामूलानि द्रव्याणीति कृत्वा पूर्वं सत्तास्वरूपं भणित्वा पश्चात् द्रव्यव्याख्यानं करोमीत्यभिप्रायं मनसि धृत्वा सूत्रमिदं प्रतिपादयति भगवान् –

सत्ता सव्वपदत्था सविस्सरूवा अणंतपज्जाया।
भंगुप्पादधुवत्ता सप्पडिवक्खा हवदि एक्का॥ ८॥

कर्तृत्व के व्याख्यान के उपसंहार की मुख्यता से अथवा द्रव्यपीठिका समाप्ति के लिए ***एवं भावं...*** इत्यादि एक गाथासूत्र है। इस प्रकार समूहरूप में चार स्थलों द्वारा द्वितीय सप्तक पूर्ण हुआ।

इस प्रकार चौदह गाथाओं वाले नौ अन्तरस्थलों द्वारा द्रव्यपीठिका की समुदाय पातनिका है।

द्रव्य पीठिका नामक द्वितीय अन्तराधिकार की सारणी

स्थलक्रम	स्थलविषय	गाथा कहाँ से कहाँ तक	कुल गाथाएँ
	प्रथम सप्तक		
१	सत्तालक्षणपरक	८ वीं	१
२	द्रव्यशब्द व्युत्पत्तिपरक	९ वीं	१
३	द्रव्य के तीन लक्षण सूचक	१० वीं	१
४	वस्तुव्यवस्थापरक दो नय की विवक्षा	११ से १३	३
५	प्रमाण सप्तभङ्गीपरक	१४ वीं	१
	द्वितीय सप्तक		
१	बौद्धमत निराकरणपरक	१५ वीं	१
२	बौद्धमत निषेध-स्पष्टीकरणार्थ	१६ से १९	४
३	अभूतपूर्व सिद्धदशापरक	२० वीं	१
४	उपसंहारपरक	२१ वीं	१
	कुल नौ स्थल		**कुल चौदह गाथाएँ**

वह इस प्रकार – अब अस्तित्व के स्वरूप का निरूपण करते हैं; अथवा द्रव्य सत्तामूलक सत्ता से सत्तामय है; अत: सर्व प्रथम सत्ता का स्वरूप कहकर, बाद में द्रव्य का व्याख्यान करता हूँ – ऐसा अभिप्राय मन में धारणकर भगवान (आचार्य कुन्दकुन्ददेव) इस सूत्र (गाथा) का प्रतिपादन करते हैं –

सर्वार्थमय व सविश्वरूप, अनंत पर्यायों मयी।
है लय जनन ध्रौव्यात्मक, सत्ता सप्रतिपक्ष एक भी॥ ८॥

हवदि भवति। का कर्त्री ? *सत्ता* सत्ता। कथंभूता ? *सव्वपदत्था* सर्वपदार्था। पुनरपि कथंभूता ? *सविस्सरूवा* सविश्वरूपा। पुनरपि किं विशिष्टा ? *अणंतपज्जाया* अनंतपर्याया। पुनरपि किं विशिष्टा ? *भंगुप्पादधुवत्ता* भङ्गोत्पादध्रौव्यात्मिका। पुनश्च किं विशिष्टा ? *एक्का* महासत्तारूपेणैका। एवं पञ्चविशेषणविशिष्टा सत्ता किं निरंकुशा निःप्रतिपक्षा भविष्यति ? नैवम्। *सप्पडिवक्खा* सप्रतिपक्षैवेति वार्तिकम्।

तथाहि — स्वद्रव्यादिचतुष्टयरूपेण सत्तायाः परद्रव्यादिचतुष्टयरूपेणासत्ता प्रतिपक्षः, सर्वपदार्थस्थितायाः सत्तायाः एकपदार्थस्थिता प्रतिपक्षः, मृदो घटः सौवर्णो घटः ताम्रो घट इत्यादिरूपेण सविश्वरूपाया नानारूपाया एकघटरूपा सत्ता प्रतिपक्षः अथवा विवक्षितैकघटे वर्णाकारादिरूपेण विश्वरूपायाः सत्तायाः विवक्षितैकगन्धादिरूपा प्रतिपक्षः, कालत्रयापेक्षयानन्तपर्यायसत्तायाः विवक्षितैकपर्यायसत्ता प्रतिपक्षः, उत्पादव्ययध्रौव्यरूपेण त्रिलक्षणायाः सत्तायाः विवक्षितैकस्योत्पादस्य वा व्ययस्य वा ध्रौव्यस्य वा सत्ता प्रतिपक्षः, एकस्या महासत्तायाः अवान्तरसत्ता प्रतिपक्ष इति शुद्धसंग्रह-

---

गाथार्थ : सत्ता सर्व पदार्थों में स्थित, सविश्वरूप, अनन्त पर्यायमय, भङ्ग (व्यय) -उत्पाद-ध्रौव्यरूप, सप्रतिपक्ष और एक है।

टीकार्थ : ***हवदि*** है। कर्ता कौन है ? ***सत्ता*** सत्ता है। वह कैसी है ? ***सव्वपदत्था*** सर्व पदार्थमय है। और वह कैसी है ? ***सविस्सरूवा*** सविश्वरूप/अनेकरूप है। वह और किस विशेषतावाली है ? ***अणंतपज्जाया*** अनन्त पर्याययुक्त है। वह और कैसी है ? ***भंगुप्पादधुवत्ता*** भङ्ग/व्यय, उत्पाद, ध्रौव्यात्मक है। वह और किस विशेषतावाली है ? ***एक्का*** महासत्तारूप से एक है। इन पाँच विशेषणों से विशिष्ट सत्ता क्या निरङ्कुश, निःप्रतिपक्ष है ? ऐसा नहीं है, वह ***सप्पडिवक्खा*** सप्रतिपक्ष ही है — ऐसा वार्तिक है।

वह इस प्रकार — स्वद्रव्यादि चतुष्टयरूप से सत्ता की, परद्रव्यादि चतुष्टयरूप से असत्ता प्रतिपक्ष है। सभी पदार्थों में स्थित सत्ता की, एक पदार्थ में स्थित सत्ता प्रतिपक्ष है। मिट्टी का घड़ा, सुवर्ण का घड़ा, ताम्र का घड़ा इत्यादि रूप से सविश्वरूप/नानारूप सत्ता की, एक घटरूप सत्ता प्रतिपक्ष है; अथवा विवक्षित एक घड़े में वर्ण, आकार आदि रूप से विश्वरूप की, विवक्षित एक गन्धादि रूप सत्ता प्रतिपक्ष है। तीनों कालों की अपेक्षा अनन्त पर्याययुक्त सत्ता की, विवक्षित एक पर्यायरूप सत्ता प्रतिपक्ष है। उत्पाद-व्यय-ध्रौव्यरूप से त्रिलक्षणा सत्ता की, विवक्षित एक उत्पाद-व्यय-ध्रौव्यरूप सत्ता प्रतिपक्ष है। एक महासत्ता की, अवान्तरसत्ता प्रतिपक्ष है। इस प्रकार शुद्ध संग्रहनय की विवक्षा में एक महासत्ता; अशुद्ध संग्रहनय की विवक्षा में, व्यवहारनय

नयविवक्षायामेका महासत्ता अशुद्धसंग्रहनयविवक्षायां व्यवहारनयविवक्षायां वा सर्वपदार्थ - सविश्वरूपाद्यवान्तरसत्ता सप्रतिपक्षव्याख्यानं सर्वं नैगमनयापेक्षया ज्ञातव्यम्। एवं नैगमसंग्रहव्यवहार-नयत्रयेण सत्ताव्याख्यानं योजनीयं, अथवैका महासत्ता शुद्धसंग्रहनयेन, सर्वपदार्थाद्यवान्तरसत्ता व्यवहारनयेनेति नयद्वयव्याख्यानं कर्तव्यम्।

अत्र शुद्धजीवास्तिकायसंज्ञस्य शुद्धजीवद्रव्यस्य या सत्ता सैवोपादेया भवतीति भावार्थः॥ ८॥

इति प्रथमस्थले सत्तालक्षणमुख्यत्वेन व्याख्यानेन गाथा गता।

अथ सत्ताद्रव्ययोरभिन्नत्वं प्रत्याख्याति —

दवियदि गच्छदि ताइं ताइं सब्भावपज्जयाइं जं।
दवियं तं भण्णंति हि अणण्णभूदं तु सत्तादो॥ ९॥

***दवियदि* द्रवति। द्रवति *कोऽर्थः? गच्छदि* गच्छति। क्व? वर्तमानकाले, द्रोष्यति गमिष्यति**

की विवक्षा में सर्व पदार्थमयी, सविश्वरूप आदि अवान्तरसत्ता है। यह सभी सप्रतिपक्ष व्याख्यान नैगमनय की अपेक्षा जानना चाहिए। इस प्रकार नैगम, संग्रह, व्यवहार – इन तीन नयों से सत्ता का व्याख्यान घटित करना चाहिए; अथवा शुद्ध संग्रहनय से एक महासत्ता है, व्यवहारनय से सर्व पदार्थ स्थित आदि अवान्तरसत्ता है। – इस प्रकार दो नयों से व्याख्यान करना चाहिए।

यहाँ शुद्ध जीवास्तिकाय नामक शुद्ध जीवद्रव्य की जो सत्ता है, वह ही उपादेय है – यह भावार्थ है॥ ८॥

[इस गाथा-टीका में आचार्य अमृतचन्द्र ने सर्व प्रथम वस्तु को कथञ्चित् नित्यानित्यात्मक, उत्पाद-व्यय-ध्रौव्यात्मक सिद्धकर, तत्पश्चात् उसके माध्यम से सत्ता की अन्य विशेषताओं को विस्तारपूर्वक स्पष्ट किया है।]

इस प्रकार प्रथम स्थल में सत्ता लक्षण की मुख्यतापरक व्याख्यान द्वारा एक गाथा पूर्ण हुई।

अब, सत्ता और द्रव्य में अभिन्नता की प्रसिद्धि करते हैं –

उन उन विविध सद्भाव पर्यय, को द्रवे या प्राप्त हो।
कहते उसे हैं द्रव्य सत्ता, से अनन्यमयी है जो॥ ९॥

गाथार्थ : उन-उन सद्भाव पर्यायों को जो द्रवित होता है, प्राप्त होता है, उसे द्रव्य कहते हैं; जो कि सत्ता से अनन्यभूत है।

भाविकाले, अदुद्रुवत् गतं भूतकाले। कान्? *ताइं ताइं सब्भावपज्जयाइं* तांस्तान् सद्भावपर्यायान् स्वकीयपर्यायान् *जं* यत् कर्तृ *दवियं तं भण्णंति हि* तद्द्रव्यं भणन्ति सर्वज्ञा हि स्फुटम् अथवा द्रवति स्वभावपर्यायान् गच्छति विभावपर्यायान्। इत्थंभूतं द्रव्यं किं सत्ताया भिन्नं भविष्यति? नैवम्। *अणण्णभूदं तु सत्तादो* अनन्यभूतमभिन्नम्। कस्याः? सत्तायाः निश्चयनयेन। यत एव संज्ञालक्षणप्रयोजनादिभेदेऽपि निश्चयनयेन सत्ताया द्रव्यमभिन्नं तत एव पूर्वगाथायां यत्सत्तालक्षणं कथितं सर्वपदार्थस्थितत्वं एकपदार्थस्थित्वं विश्वरूपत्वमेकरूपत्वमनन्तपर्यायत्वमेकपर्यायत्वं त्रिलक्षणत्वमत्रिलक्षणत्वमेकरूपत्वमनेकरूपत्वं चेति तत्सर्वं लक्षणं सत्ताया अभिन्नत्वात् द्रव्यस्यैव द्रष्टव्यमिति सूत्रार्थः॥ ९॥

एवं द्वितीयस्थले सत्ताद्रव्ययोरभेदस्य द्रव्यशब्दस्य व्युत्पत्तिश्चेति कथनरूपेण गाथा गता।

अथ त्रेधा द्रव्यलक्षणमुपदिशति —

दव्वं सल्लक्खणियं उप्पादव्वयधुवत्तसंजुत्तं।
गुणपज्जयासयं वा जं तं भण्णंति सव्वण्हू॥ १०॥

टीकार्थ : ***दवियदि*** द्रवता है। 'द्रवता है' का क्या अर्थ है? ***गच्छदि*** उसको जाता है, प्राप्त होता है – ऐसा अर्थ है। कहाँ प्राप्त होता है? वर्तमानकाल में प्राप्त होता है, भविष्यकाल में प्राप्त करेगा और भूतकाल में प्राप्त करता था। किन्हें प्राप्त करता है? ***ताइं ताइं सब्भावपज्जयाइं जं*** उन-उन सद्भावस्वरूप अपनी पर्यायों को कर्तारूप जो प्राप्त करता है, ***दवियं तं भण्णंति हि*** उसे सर्वज्ञ स्पष्टतया द्रव्य कहते हैं। अथवा जो स्वभावपर्यायों को द्रवता है, विभावपर्यायों को प्राप्त करता है, वह द्रव्य है। इस प्रकार का द्रव्य क्या सत्ता से भिन्न होगा? (इसके उत्तर में आचार्य कहते हैं) – ऐसा नहीं है। ***अणण्णभूदं तु सत्तादो*** अनन्यभूत अभिन्न है। किससे अभिन्न है? निश्चयनय से सत्ता से अभिन्न है; क्योंकि सत्ता, लक्षण, प्रयोजन आदि का भेद होने पर भी निश्चयनय से सत्ता से द्रव्य अभिन्न है; इसीलिए पूर्व गाथा में जो सर्व पदार्थ स्थितत्व, एक पदार्थ स्थितत्व; विश्वरूपत्व, एकरूपत्व; अनन्त पर्यायत्व, एक पर्यायत्व; त्रिलक्षणत्व, अत्रिलक्षणत्व और एकरूपत्व, अनेक रूपत्व सत्ता के लक्षण कहे थे, वे सभी लक्षण, सत्ता से अभिन्न होने के कारण, द्रव्य के ही जानना चाहिए – यह सूत्रार्थ है॥ ९॥

इस प्रकार दूसरे स्थल में सत्ता-द्रव्य में अभेद के और द्रव्य शब्द की व्युत्पत्ति के कथनरूप से गाथा पूर्ण हुई।

अब, तीन प्रकार के द्रव्य-लक्षण का उपदेश करते हैं —

दव्वं सल्लक्खणियं द्रव्यं सत्तालक्षणं द्रव्यार्थिकनयेन बौद्धं प्रति, *उप्पादव्वयधुवत्तसंजुत्तं* उत्पादव्ययध्रौव्यसंयुक्तं पर्यायार्थिकनयेन, *गुणपज्जयासयं वा* गुणपर्यायाधारभूतं वा सांख्यनैयायिकं प्रति, *जं तं भण्णंति सव्वण्हू* यदेवं लक्षणत्रयसंयुक्तं तद्द्रव्यं भणंति सर्वज्ञा इति वार्तिकम्।

तथाहि – सत्तालक्षणमित्युक्ते सत्युत्पादव्ययध्रौव्यलक्षणं गुणपर्यायत्वलक्षणं च नियमेन लभ्यते। उत्पादव्ययध्रौव्ययुक्तमित्युक्ते सत्तालक्षणं गुणपर्यायत्वलक्षणं च नियमेन लभ्यते। गुणपर्यायवदित्युक्ते सत्युत्पादव्ययध्रौव्यलक्षणत्वं सत्तालक्षणं च नियमेन लभ्यते। एकस्मिंल्लक्षणेऽभिहिते सत्यन्यलक्षणद्वयं कथं लभ्यत ? इति चेत् त्रयाणां लक्षणानां परस्पराबिनाभावित्वादिति।

अथ मिथ्यात्वरागादिरहितत्वेन शुद्धसत्तालक्षणं अगुरुलघुत्वषड्ढानिवृद्धिरूपेण शुद्धोत्पादव्यय-

---

है द्रव्य सत लक्षणमयी, उत्पाद-व्यय-ध्रुवता सहित।
आधार गुण पर्याय का, जो कहा जिन सकलज्ञयुत॥ १०॥

गाथार्थ : जो सत लक्षणवाला है, उत्पाद-व्यय-ध्रौव्य संयुक्त है अथवा गुण-पर्यायों का आश्रय है, उसे सर्वज्ञ भगवान द्रव्य कहते हैं।

टीकार्थ : ***दव्वं सल्लक्खणियं*** द्रव्य, द्रव्यार्थिकनय से सत्ता लक्षणवाला है, यह बौद्ध के प्रति कहा है। (बौद्धों को लक्षितकर द्रव्य का लक्षण कहा गया है)। ***उप्पादव्वयधुवत्तसंजुत्तं*** पर्यायार्थिकनय की अपेक्षा उत्पाद-व्यय-ध्रौव्य से संयुक्त है। ***गुणपज्जयासयं वा*** अथवा गुण -पर्यायों का आधारभूत है, यह सांख्य और नैयायिक के प्रति कहा गया है। ***जं तं भण्णंति सव्वण्हू*** जो इन तीन लक्षणों से सहित है, वह द्रव्य है, ऐसा सर्वज्ञ भगवान कहते हैं – यह वार्तिक है।

वह इस प्रकार : सत्तालक्षण – ऐसा कहने पर उत्पाद-व्यय-ध्रौव्य लक्षण और गुण-पर्यायत्व लक्षण, नियम से प्राप्त होता है। उत्पाद-व्यय-ध्रौव्य युक्त – ऐसा कहने पर सत्ता लक्षण और गुण-पर्यायत्व लक्षण, नियम से प्राप्त होता है। गुण-पर्यायवाला है – ऐसा कहने पर उत्पाद-व्यय-ध्रौव्य लक्षणत्व और सत्ता लक्षण, नियम से प्राप्त हो जाते हैं। एक लक्षण कहने पर अन्य दो लक्षण कैसे प्राप्त हो जाते हैं ? यदि ऐसा प्रश्न हो तो कहते हैं – तीनों लक्षणों के परस्पर अबिनाभावीत्व होने के कारण वे प्राप्त हो जाते हैं।

यहाँ मिथ्यात्व-रागादि से रहित होने के कारण शुद्ध सत्ता लक्षण, अगुरुलघुत्व की षट्गुणी हानि-वृद्धिरूप से शुद्ध उत्पाद-व्यय-ध्रौव्य लक्षण, अकृत ज्ञानादि अनन्त गुण लक्षण

ध्रौव्यलक्षणं अकृतज्ञानाद्यनन्तगुणलक्षणं सहजशुद्धसिद्धपर्यायलक्षणं च शुद्धजीवास्तिकायसंज्ञं शुद्धजीवद्रव्यमुपादेयमिति भावार्थः। क्षणिकैकान्तरूपं बौद्धमतं नित्यैकान्तरूपं सांख्यमतं उभयैकान्तरूपं नैयायिकमतं मीमांसकमतं च सर्वत्र मतान्तरव्याख्यानकाले ज्ञातव्यम्। क्षणिकैकान्ते किं दूषणं ? येन घटादिक्रिया प्रारब्धा स तस्मिन्नेव क्षणे गतः, क्रियानिष्पत्तिर्नास्तीत्यादि। नित्यैकान्ते च योऽसौ तिष्ठति स तिष्ठत्येव, सुखी सुख्येव, दुःखी दुःख्येवेत्यादिटंकोत्कीर्णनित्यत्वेन पर्यायान्तरं न घटते, परस्परनिरपेक्ष-द्रव्यपर्यायोभयैकान्ते पुनः पूर्वोक्तदूषणद्वयमपि प्राप्नोति। जैनमते पुनः परस्परसापेक्षद्रव्यपर्यायत्वान्नास्ति दूषणं॥ १०॥

इति तृतीयस्थले द्रव्यस्य सत्तालक्षणत्रयसूचनमुख्यत्वेन गाथा गता।

अथ गाथापूर्वार्धेन द्रव्यार्थिकनयेन द्रव्यलक्षणं, उत्तरार्धेन पर्यायार्थिकनयेन पर्यायलक्षणं प्रतिपादयति —

उप्पत्ती य विणासो दव्वस्स य णत्थि अत्थि सब्भावो।
वयमुप्पादधुवत्तं करेंति तस्सेव पज्जायाः॥ ११॥

और सहज शुद्ध सिद्ध पर्याय लक्षणमय शुद्ध जीवास्तिकाय नामक शुद्ध जीवद्रव्य उपादेय है — ऐसा भावार्थ है। मतान्तरों के व्याख्यान काल में क्षणिक एकान्तरूप बौद्धमत, नित्य एकान्तरूप सांख्यमत, उभय एकान्तरूप नैयायिक और मीमांसकमत को सर्वत्र जान लेना चाहिए।

प्रश्न - क्षणिक एकान्त में क्या दोष है ?

उत्तर - जिसने घटादि क्रिया प्रारम्भ की, वह उसी क्षण नष्ट हो गया — इस प्रकार क्रिया की निष्पत्ति/उत्पत्ति नहीं बनती है इत्यादि दोष हैं।

नित्य एकान्त में जो वह है, वह वही है; सुखी सुखी ही है, दुःखी दुःखी ही है इत्यादि टङ्कोत्कीर्ण नित्यतारूप में पर्यायान्तर घटित नहीं होता; परस्पर निरपेक्ष द्रव्य-पर्याय — उभय के एकान्त में भी पूर्वोक्त दोनों ही दूषण प्राप्त होते हैं। जैनमत में परस्पर सापेक्ष द्रव्य-पर्यायत्व होने के कारण दोष नहीं है॥ १०॥

[इस गाथा-टीका में आचार्य अमृतचन्द्रदेव ने उत्पाद, व्यय, ध्रौव्य, गुण और पर्याय का स्वरूप भी स्पष्ट किया है, जो मूलतया पठनीय है।]

इस प्रकार तीसरे स्थल में द्रव्य के सत्ता आदि तीन लक्षणों सम्बन्धी सूचना की मुख्यता से गाथा पूर्ण हुई।

अब, गाथा पूर्वार्ध द्वारा द्रव्यार्थिकनय से द्रव्य का लक्षण और उत्तरार्ध द्वारा पर्यायार्थिकनय

उप्पत्ती य विणासो दव्वस्स य णत्थि अनादिनिधनस्य द्रव्यस्य द्रव्यार्थिकनयेनोत्पत्तिश्च विनाशो वा नास्ति। तर्हि किमस्ति? *अत्थि सब्भावो* अस्ति विद्यते। स कः? सद्भावः सत्तास्तित्वं इत्यनेन पूर्वगाथाभणितमेव क्षणिकैकान्तमतनिराकरणं समर्थितं *वयमुप्पादधुवत्तं करेंति तस्सेव पज्जाया* तस्यैव द्रव्यस्य व्ययोत्पादध्रुवत्वं कुर्वन्ति। के कर्तारः? पर्यायाः।

अनेन किमुक्तं भवति – द्रव्यार्थिकनयेन द्रव्यस्यैवोत्पादव्ययध्रौव्याणि न भवन्ति किंतु पर्यायार्थिकनयेन। केन दृष्टान्तेन? सुवर्णगोरसमृत्तिकाबालवृद्धकुमारादिपरिणतपुरुषेषु भंगत्रयरूपेण, इत्यनेन पूर्वगाथाभणितमेव नित्यैकान्तमतनिराकरणं दृढीकृतम्।

अत्र सूत्रे शुद्धद्रव्यार्थिकनयेन नरनारकादिविभावपरिणामोत्पत्तिविनाशरहितमपि पर्यायार्थिक-नयेन वीतरागनिर्विकल्पसमाधिसंभवेन सहजपरमानन्दरूपसुखरसास्वादेन स्वसंवेदनज्ञानरूपपर्यायेण परिणतं सहितं शुद्धजीवास्तिकायसंज्ञं शुद्धजीवद्रव्यमेवोपादेयमिति सूत्रतात्पर्यम्॥ ११॥

से पर्याय का लक्षण प्रतिपादित करते हैं –

उत्पाद ना ना विनाश है, है द्रव्य का सद्भाव ही।
उसकी ही पर्यायें करें, उत्पाद व्यय ध्रुवता सभी॥ ११॥

गाथार्थ : द्रव्य का उत्पाद-विनाश नहीं है; सद्भाव है। विनाश, उत्पाद और ध्रुवता को उसकी ही पर्यायें करती हैं।

टीकार्थ : ***उप्पत्ती य विणासो दव्वस्स य णत्थि*** अनादिनिधन द्रव्य के द्रव्यार्थिकनय से उत्पत्ति या विनाश नहीं है। तो क्या है? ***अत्थि*** है। वह क्या है? ***सब्भावो*** सद्भाव, सत्ता, अस्तित्व है। इस प्रकार इसके द्वारा पूर्व गाथा में कहा गया ही स्पष्ट किया गया है तथा क्षणिक एकान्त मत का निराकरण किया गया है। ***विगमुप्पादधुवत्तं करेंति तस्सेव पज्जाया*** उसी द्रव्य की उत्पाद-व्यय-ध्रुवता को करती हैं। कर्तारूप वे कौन करती हैं? पर्यायें करती हैं।

इससे क्या कहा गया है – द्रव्यार्थिकनय से द्रव्य के ही उत्पाद-व्यय-ध्रौव्य नहीं होते हैं, किन्तु पर्यायार्थिकनय से होते हैं। किस दृष्टान्त से यह सिद्ध होता है? सुवर्ण, गोरस, मृत्तिका; बाल; वृद्ध; कुमारादि परिणत पुरुषों में तीनों भङ्गरूप से यह स्पष्ट होता है। इस प्रकार इससे पूर्व गाथा में कहे गए नित्य एकान्त मत के निराकरण को ही दृढ़ किया गया है।

इस गाथा में शुद्ध द्रव्यार्थिकनय की अपेक्षा नर-नारकादि विभाव परिणामों की उत्पत्ति -विनाश से रहित तथा पर्यायार्थिकनय की अपेक्षा वीतराग निर्विकल्प समाधि से उत्पन्न सहज परमानन्द सुख रस के आस्वादमय स्वसम्वेदन ज्ञानपर्याय से परिणत शुद्ध जीवास्तिकाय नामक शुद्ध जीवद्रव्य ही उपादेय है – यह सूत्र/गाथा का तात्पर्य है॥ ११॥

एवं द्रव्यार्थिकपर्यायार्थिकलक्षणनयद्वयव्याख्यानेन सूत्रं गतम्।

अथ द्रव्यपर्यायाणां निश्चयनयेनाभेदं दर्शयति —

पज्जयविजुदं दव्वं दव्वविमुत्ता य पज्जया णत्थि।
दोण्हं अणण्णभूदं भावं समणा परूवेंति॥ १२॥

पज्जयविजुदं दव्वं **दधिदुग्धादिपर्यायरहितगोरसवत्पर्यायरहितं द्रव्यं नास्ति,** ***दव्वविमुत्ता य पज्जया णत्थि*** **गोरसरहितदधिदुग्धादिपर्यायवत् द्रव्यविमुक्ता द्रव्यविरहिताः पर्याया न संति,** ***दोण्हं अणण्णभूदं भावं समणा परूवेंति*** **यत एवमभेदनयेन द्रव्यपर्याययोर्भेदो नास्ति तत एव कारणात् द्वयोर्द्रव्यपर्याययोरनन्यभूतमभिन्नभावं सत्तामस्तित्वस्वरूपं प्ररूपयन्ति। के कथयन्ति? श्रमणा महाश्रमणाः सर्वज्ञ इति। अथवा द्वितीयव्याख्यानं द्वयोर्द्रव्यपर्याययोरनन्यभूतमभिन्नभावं पदार्थं वस्तु श्रमणाः प्ररूपयन्ति। भावशब्देन कथं पदार्थो भण्यत? इति चेत्। द्रव्यपर्यायात्मको भावः पदार्थो वस्त्विति वचनात्।**

इस प्रकार द्रव्यार्थिक-पर्यायार्थिक दो नयों की अपेक्षा (द्रव्य के) लक्षण के व्याख्यान द्वारा गाथा पूर्ण हुई।

अब, निश्चय से द्रव्य-पर्यायों का अभेद दिखाते हैं –

पर्याय बिन न द्रव्य है, न द्रव्य बिन पर्याय भी।
हैं भाव दोनोंऽनन्यमय, यह बात श्रमणों ने कही॥ १२॥

गाथार्थ : पर्यायरहित द्रव्य और द्रव्यरहित पर्यायें नहीं होती हैं। दोनों का अनन्यभूत भाव/अभिन्नपना श्रमण प्ररूपित करते हैं।

टीकार्थ : ***पज्जयविजुदं दव्वं*** दही, दुग्ध आदि पर्यायों से रहित गोरस के समान पर्याय से रहित द्रव्य नहीं है। ***दव्वविमुत्ता य पज्जया णत्थि*** गोरसरहित दही, दुग्ध आदि पर्यायों के समान द्रव्य से विमुक्त/द्रव्य से रहित पर्यायें नहीं हैं। ***दोण्हं अणण्णभूदं भावं समणा परूवेंति*** क्योंकि अभिन्न प्रदेशों द्वारा निष्पन्न होने से अभिन्न क्षेत्रत्व होने के कारण, अभेदनय से द्रव्य और पर्याय में भेद नहीं है; इसी प्रकार द्रव्य-पर्याय – दोनों का अनन्यभूत अभिन्नभाव, सत्ता, अस्तित्व स्वरूप प्ररूपित करते हैं। ऐसा प्ररूपित कौन करते हैं? श्रमण, महाश्रमण, सर्वज्ञ भगवान ऐसा प्ररूपित करते हैं।

अथवा द्वितीय व्याख्यान : द्रव्य और पर्याय दोनों का अनन्यभूत अभिन्नभाव पदार्थ, दोनों की अभिन्न वस्तु श्रमण प्ररूपित करते हैं। भाव शब्द से पदार्थ कैसे कहते हैं? (यदि ऐसा प्रश्न

अत्र सिद्धरूपशुद्धपर्यायादभिन्नं शुद्धजीवास्तिकायसंज्ञं शुद्धजीवद्रव्यं शुद्धनिश्चयनयेनोपादेयमिति भावार्थः॥ १२॥

यस्मिन् वाक्ये नयशब्दोच्चारणं नास्ति तत्र नययोः शब्दव्यवहारः कर्तव्यः क्रियाकारकयोरन्तराध्याहारवत् स्याच्छब्दाध्याहारवद्वा।

अथ द्रव्यगुणानां निश्चयनयेनाभेदं समर्थयति —

दव्वेण विणा ण गुणा गुणेहिं दव्वं विणा ण संभवदि।
अव्वदिरित्तो भावो दव्वगुणाणं हवदि तम्हा॥ १३॥

दव्वेण विणा ण गुणा **पुद्गलरहितवर्णादिवद्द्रव्येण बिना गुणा न संति** ***गुणेहिं दव्वं विणा ण संभवदि*** **वर्णादिगुणरहितपुद्गलद्रव्यवद्गुणैर्बिना द्रव्यं न संभवति** ***अव्वदिरित्तो भावो दव्वगुणाणं हवदि***

हो तो कहते हैं) – भाव, पदार्थ या वस्तु, द्रव्य-पर्यायात्मक है – ऐसे वचन से भाव का अर्थ पदार्थ किया।

यहाँ सिद्धान्तरूप शुद्ध गुणों से अभिन्न, शुद्ध पर्यायों से अभिन्न, शुद्ध जीवास्तिकाय नामक शुद्ध जीवद्रव्य शुद्ध निश्चयनय से उपादेय है – यह भावार्थ है॥ १२॥

क्रिया-कारक में से किसी एक का उल्लेख होने पर अन्य का अध्याहार (ऊपर से ग्रहण) कर लेने के समान अथवा स्यात् शब्द के अध्याहार के समान जिस वाक्य में नय शब्द का उच्चारण नहीं हो, वहाँ दोनों नयों का शब्द-व्यवहार कर लेना चाहिए।

अब, निश्चय से द्रव्य और गुणों के अभेद का समर्थन करते हैं –

द्रव्य बिन गुण नहीं, गुण बिन द्रव्य सम्भव है नहीं।
इसलिए द्रव्य तथा गुणों में, भाव अव्यतिरिक्त ही॥ १३॥

गाथार्थ : द्रव्य के बिना गुण नहीं हैं, गुणों के बिना द्रव्य सम्भव नहीं है; इसलिए द्रव्य और गुणों के अव्यतिरिक्त/अभिन्न भाव है।

टीकार्थ : ***दव्वेण विणा ण गुणा*** पुद्गल से रहित वर्णादि के समान द्रव्य के बिना गुण नहीं हैं। ***गुणेहिं विणा दव्वं ण संभवदि*** वर्णादि गुण से रहित पुद्गलद्रव्य के समान गुणों के बिना द्रव्य सम्भव नहीं है। ***अव्वदिरित्तो भावो दव्वगुणाणं हवदि तम्हा*** द्रव्य और गुण के अभिन्न सत्ता द्वारा निष्पन्न होने से अभिन्न द्रव्यत्व होने के कारण, अभिन्न प्रदेशों द्वारा निष्पन्न होने से अभिन्नक्षेत्रत्व होने के कारण, उत्पाद-व्यय का अबिनाभावी एक काल होने से अभिन्न

तम्हा द्रव्यगुणयोरभिन्न सत्तानिष्पन्नत्वेनाभिन्नद्रव्यत्वात् अभिन्नप्रदेशनिष्पन्नत्वेनाभिन्नक्षेत्रत्वात् एककालोत्पादव्ययाबिनाभावित्वेनाभिन्नकालत्वात् एकस्वरूपत्वेनाभिन्नभावत्वादिति, यस्मात् द्रव्यक्षेत्रकालभावैरभेदस्तस्मात् अव्यतिरिक्तो भवत्यभिन्नो भवति। कोऽसौ ? भावस्सत्तास्तित्वम्। केषां ? द्रव्यगुणानाम्।

अथवा द्वितीयव्याख्यानं – अव्यतिरिक्तो भवत्यभिन्नो भवति। स कः ? भावः पदार्थो वस्तु। केषां संभवित्वेन ? द्रव्यगुणानां; इत्यनेन द्रव्यगुणात्मकः पदार्थ इत्युक्तं भवति।

निर्विकल्पसमाधिबलेन जातमुत्पन्नं वीतरागसहजपरमानन्दसुखसंवित्त्युपलब्धिप्रतीत्यनुभूतिरूपं यत्स्वसंवेदनज्ञानं तेनैव परिच्छेद्यं प्राप्यं रागादिविभावविकल्पजालशून्यमपि केवलज्ञानादिगुणसमूहेन भरितावस्थं यत् शुद्धजीवास्तिकायाभिधानं शुद्धात्मद्रव्यं तदेव मनसा ध्यातव्यं तदेव वचसा वक्तव्यं कायेन तदनुकूलानुष्ठानं कर्तव्यमिति सूत्रतात्पर्यार्थः॥ १३॥

एवं गुणपर्यायरूपत्रिलक्षणप्रतिपादनरूपेण गाथाद्वयम्।

इति पूर्वसूत्रेण सह गाथात्रयसमुदायेन चतुर्थस्थलं गतम्।

अथ सर्वविप्रतिपत्तीनां निराकरणार्थं प्रमाणसप्तभङ्गी कथ्यते –

कालत्व होने के कारण, एक स्वरूपत्व होने से अभिन्न भावत्व होने के कारण, क्योंकि द्रव्य-क्षेत्र-काल-भाव से अभेद है; इसलिए अव्यतिरिक्त है, अभिन्न है। वह क्या अभिन्न है ? भाव, सत्ता, अस्तित्व अभिन्न है। किनकी सत्ता अभिन्न है ? द्रव्य-गुणों की सत्ता अभिन्न है।

अथवा द्वितीय व्याख्यान : अव्यतिरिक्त है, अभिन्न है। वह कौन अभिन्न है ? भाव, पदार्थ, वस्तु अभिन्न है। किनके होने से वह अभिन्न है ? द्रव्य-गुणों के होने से वह अभिन्न है; इस प्रकार इसके द्वारा पदार्थ द्रव्य-गुणात्मक है – ऐसा कहा गया है।

निर्विकल्प समाधि के बल से जात/उत्पन्न वीतराग सहज परमानन्द सुख की सम्वित्ति, उपलब्धि, प्रतीति, अनुभूतिरूप जो स्वसम्वेदन ज्ञान है, उससे ही परिच्छेद्य / जानने-योग्य/प्राप्त करने-योग्य; रागादि विभावरूप विकल्पजालों से शून्य/रहित; केवल (मात्र) ज्ञानादि गुणों के समूह से भरितावस्थ (परिपूर्ण) जो शुद्ध जीवास्तिकाय नामक शुद्धात्मद्रव्य है, वही मन द्वारा ध्यान करने-योग्य है, वही वचन द्वारा कहने-योग्य है तथा काय द्वारा उसके ही अनुकूल अनुष्ठान करने-योग्य है – यह गाथा का तात्पर्यार्थ है॥ १३॥

इस प्रकार गुण-पर्यायरूप तीन लक्षणों के प्रतिपादनरूप से दो गाथाएँ पूर्ण हुईं।

इस प्रकार पूर्व गाथा (१० वीं) के साथ तीन गाथाओं के समूह द्वारा चौथा स्थल पूर्ण हुआ।

सिय अत्थि णत्थि उहयं अव्वत्तव्वं पुणो य तत्तिदयं।
दव्वं खु सत्तभंगं आदेसवसेण संभवदि॥ १४॥

''एकस्मिन्नविरोधेन प्रमाणनयवाक्यतः।
सदादिकल्पना या च सप्तभङ्गीति सा मता॥''

उत्तर – आकाश का आकाश ही आधार के समान; ज्ञान, सूर्य, रत्न, प्रदीपों के स्व-पर प्रकाशक के समान; कालद्रव्य की परिणति में काल ही सहकारीकारण है।

प्रश्न – अब यह मत है कि जैसे कालद्रव्य अपने परिणमन का स्वयं ही सहकारी है; उसी प्रकार शेष द्रव्य भी अपने परिणमन के स्वयं ही सहकारीकारण हो जाएँ; कालद्रव्य से क्या प्रयोजन है ?

उत्तर – सभी द्रव्यों के परिणमन में साधारण सहकारीत्व काल का ही गुण है। वह कैसे ? यदि ऐसा प्रश्न हो तो कहते हैं – आकाश का सभी को साधारण अवकाशदान के समान, धर्मद्रव्य का साधारण गतिहेतुत्व के समान, अधर्म का स्थितिहेतुत्व के समान, काल का परिणमनहेतुत्व है। वह भी कैसे ? यदि यह प्रश्न हो तो उत्तर देते हैं – संकर-व्यतिकर दोषों की प्राप्ति होने से अन्य द्रव्य का गुण, अन्य द्रव्य के गुणरूप नहीं किया जा सकता है।

दूसरी बात यह है कि यदि सभी द्रव्य अपने-अपने परिणमन में उपादानकारण के समान सहकारीकारण भी होते हैं तो गति, स्थिति, अवगाहनरूप परिणमन के विषय में सहकारीकारणभूत धर्म, अधर्म, आकाश द्रव्यों से भी क्या प्रयोजन है ? गति, स्थिति, अवगाहन भी स्वयं ही हो जाएगा।

प्रश्न – वैसा होने पर क्या दोष है ?

उत्तर – (ऐसा होने पर) जीव-पुद्गल नामक दो ही द्रव्य होंगे और यह तो आगम से विरुद्ध है।

सहकारिकारणभूतैः किं प्रयोजनं? गतिस्थित्यवगाह्याः स्वयमेव भविष्यति। तथा सति किं दूषणं? जीवपुद्गलसंज्ञे द्वे एव द्रव्ये, स चागमविरोधः।

अत्र विशुद्धदर्शनज्ञानस्वभावस्य शुद्धजीवास्तिकायस्यालाभेऽतीतानंतकाले संसारचक्रे भ्रमितोऽयं जीवः ततः कारणाद्वीतरागनिर्विकल्पसमाधौ स्थित्वा समस्तरागादिरूपसंकल्पविकल्पकल्लोलमालापरिहारबलेन जीवन् स एव निरंतरं ध्यातव्य इति भावार्थः॥ २४॥

इति निश्चयकालव्याख्यानमुख्यत्वेन गाथाद्वयं गतम्।

अथ समयादिव्यवहारकालस्य निश्चयेन परमार्थकालपर्यायस्यापि जीवपुद्गलनवजीर्णादिपरिणत्या व्यज्यमानत्वात् कथंचित्परायत्तत्वं द्योतयति —

समओ णिमिसो कट्ठा कला य णाली तदो दिवारत्ती।
मासोडुअयणसंवत्सरोत्ति कालो परायत्तो॥ २५॥

समओ मंदगतिपरिणतपुद्गलपरमाणुना निमित्तभूतेन व्यक्तीक्रियमाणः समयः *णिमिसो*

यहाँ विशुद्ध दर्शन-ज्ञान स्वभावी शुद्ध जीवास्तिकाय की प्राप्ति न होने के कारण अतीत अनन्त काल से यह जीव संसारचक्र में घूम रहा है, उस कारण से वीतराग निर्विकल्प समाधि में स्थित होकर, समस्त रागादिरूप सङ्कल्प-विकल्पमयी कल्लोलों की माला (तरङ्गसमूहों) के परिहार के बल से, यही जीव निरन्तर ध्यान करने-योग्य है – ऐसा भावार्थ है॥ २४॥

इस प्रकार निश्चयकाल-व्याख्यान की मुख्यता से दो गाथाएँ पूर्ण हुईं।

अब, निश्चय से परमार्थकाल की पर्याय होने पर भी समय आदि व्यवहारकाल के जीव-पुद्गल की नवीन-पुरानी आदि परिणति से व्यक्त होने के कारण कथञ्चित् परायत्तता/पराधीनता को प्रकाशित करते हैं –

जो समय निमिष कला घड़ी, दिन रात मास ऋतु तथा।
है अयन वर्ष सभी बताते, काल पर आधीनता॥ २५॥

गाथार्थ - समय, निमिष, काष्ठा, कला, नाली, घड़ी से होनेवाले दिन, रात, मास, ऋतु, अयन, वर्ष – ये पराश्रितकाल हैं।

टीकार्थ - ***समओ*** निमित्तभूत, मन्दगति से परिणत पुद्गल परमाणु द्वारा व्यक्त होनेवाला समय है। ***णिमिसो*** नेत्र की पलकों के खुलने से व्यक्त होनेवाला संख्यातीत / असंख्यात समय निमिष है। ***कट्ठा*** पन्द्रह निमिषों से एक काष्ठा होती है। ***कला य*** तीस काष्ठाओं से एक कला,

नयनपुटविघटनेन व्यज्यमानः संख्यातीतसमयो निमिषः *कट्ठा* पञ्चदशनिमिषैः काष्ठा *कला य* त्रिंशत्काष्ठाभिः कला *णाली* साधिकविंशतिकलाभिर्घटिका घटिकाद्वयं मुहूर्तः *तदो दिवारत्ती* त्रिंशन्मुहूर्तैरहोरात्रः *मासो* त्रिंशद्दिवसैर्मासः उडु मासद्वयमृतुः *अयणं* तुत्रयमयनं *संवत्सरोत्ति कालो* अयनद्वयं वर्षं इति। इति शब्देन पल्योपमसागरोपमादिरूपो व्यवहारकालो ज्ञातव्यः। स च मंदगतिपरिणत-पुद्गलपरमाणुव्यज्यमानः समयो जलभाजनादिबहिरङ्गनिमित्तभूतपुद्गलप्रकटीक्रियमाणा घटिका, दिनकरबिंबगमनादिक्रियाविशेषव्यक्तीक्रियमाणो दिवसादिः व्यवहारकालः। कथंभूतः? *परायत्तो* कुम्भकारादिबहिरङ्गनिमित्तोत्पन्नमृत्पिण्डोपादानकारणजनितघटवन्निश्चयेन द्रव्यकालजनितोऽपि व्यवहारेण परायत्तः पराधीन इत्युच्यते।

किंच अन्येन क्रियाविशेषणादित्यगत्यादिना परिच्छिद्यमानोऽन्यस्य जातकादेः परिच्छित्तिहेतुः स एव कालोऽन्यो द्रव्यकालो नास्तीति? तन्न। पूर्वोक्तसमयादिपर्यायरूप आदित्यगत्यादिना व्यज्यमानः स व्यवहारकालः यश्चादित्यगत्यादिपरिणतेः सहकारिकारणभूतः स द्रव्यरूपो निश्चयकालः। ननु

णाली कुछ अधिक बीस कलाओं से एक घड़ी, दो घड़ी का एक मुहूर्त ***तदो दिवारत्ती*** तीस मुहूर्तों से एक दिन-रात, ***मासो*** तीस दिनों से एक मास / माह, ***उडु*** दो माहों की एक ऋतु, ***अयणं*** तीन ऋतुओं का एक अयन, ***संवत्सरोत्ति*** दो अयनों का एक वर्ष होता है। ***'इति'*** शब्द से पल्योपम, सागरोपम आदि रूप व्यवहारकाल जानना चाहिए और वह मन्दगति से परिणत पुद्गल परमाणु द्वारा व्यक्त होनेवाला समय, जलभाजन आदि बहिरङ्ग निमित्तभूत पुद्गलों से प्रगट होनेवाली घड़ी, सूर्यबिम्ब की गमनादि क्रिया-विशेष से व्यक्त होनेवाला दिवस आदि व्यवहारकाल हैं। ये व्यवहारकाल किस कारण हैं? ***परायत्तो*** कुम्भकारादि बहिरङ्ग निमित्त से उत्पन्न और मिट्टी पिण्डरूप उपादानकारण से उत्पन्न घड़े के समान, निश्चय से द्रव्यकालजनित होने पर भी व्यवहार से परायत्त / पराधीन कहलाते हैं।

प्रश्न - जो सूर्य की गति आदि क्रिया-विशेषरूप अन्य द्वारा ज्ञात होता है अथवा जो जातक / उत्पन्न होनेवाले अन्य के ज्ञान का कारण है, वही काल है; इससे भिन्न कोई द्रव्यकाल नहीं है?

उत्तर - ऐसा नहीं है। जो सूर्य की गति आदि द्वारा व्यक्त होता है, वह पूर्वोक्त समय आदि पर्यायरूप व्यवहारकाल है और जो सूर्य के गति आदि परिणमन में सहकारीकारणभूत है, वह द्रव्यरूप निश्चयकाल है।

प्रश्न - सूर्य के गति आदि परिणमन में धर्मद्रव्य सहकारीकारण है; (तब फिर) काल से क्या प्रयोजन है?

आदित्यगत्यादिपरिणतेर्धर्मद्रव्यं सहकारिकारणं कालस्य किमायातं? नैवम्। गतिपरिणतेर्धर्मद्रव्यं सहकारिकारणं भवति कालद्रव्यं च, सहकारिकारणानि बहून्यपि भवन्ति यतः कारणात् घटोत्पत्तौ कुम्भकारचक्रचीवरादिवत्, मत्स्यादीनां जलादिवत्, मनुष्याणां शकटादिवत्, विद्याधराणां विद्यामन्त्रौषधादिवत्, देवानां विमानवदित्यादिकालद्रव्यं गतिकारणम्। कुत्र भणितं तिष्ठतीति चेत्?

''*पोग्गलकरणा जीवा खंधा खलु कालकरणेहिं*'' — क्रियावंतो भवंतीति कथयत्यग्रे। ननु यावता कालेनैकप्रदेशातिक्रमं करोति पुद्गलपरमाणुस्तत्प्रमाणेन समयव्याख्यानं कृतं स एकसमये चतुर्दशरज्जुकाले गमनकाले यावंतः प्रदेशास्तावंतः समया भवंतीति? नैवम्। एकप्रदेशातिक्रमेण या समयोत्पत्तिर्भणिता सा मंदगतिगमनेन, चतुर्दशरज्जुगमनं यदेकसमये भणितं तदक्रमेण शीघ्रगत्या कथितमिति नास्ति दोषः। अत्र दृष्टांतमाह — यथा कोऽपि देवदत्तो योजनशतं दिनशतेन गच्छति स एव विद्याप्रभावेण दिनेनैकेन गच्छति तत्र किं दिनशतं भवति नैवमेकदिनमेव तथा शीघ्रगतिगमने सति चतुर्दशरज्जुगमनेऽप्येकसमय एव नास्ति दोषः इति॥ २५॥

उत्तर – ऐसा नहीं है। गतिरूप परिणमन में धर्मद्रव्य भी सहकारीकारण है और कालद्रव्य भी; क्योंकि सहकारीकारण अनेक भी होते हैं। घट की उत्पत्ति में कुम्भकार, चक्र, चीवर आदि के समान; मछलिओं को जलादि के समान; मनुष्यों को गाड़ी आदि के समान; विद्याधरों को विद्या, मन्त्र, औषधि आदि के समान; देवों को विमान के समान इत्यादि के समान कालद्रव्य गति में कारण है।

यह कहाँ कहा गया है? यदि ऐसा प्रश्न हो तो कहते हैं – '***पोग्गल...*** जीव पुद्गल-करण से और स्कन्ध काल-करण से क्रियावान हैं' – ऐसा प्रस्तुत ग्रन्थ की गाथा ९८, उत्तरार्ध में कहा गया है।

प्रश्न – पुद्गल परमाणु जितने काल में एक प्रदेश का अतिक्रमण करता है, उतने प्रमाण का समयरूप से व्याख्यान किया गया, तो क्या उस एक समय में पुद्गल द्वारा चौदह राजूप्रमाण गमन के काल में जितने प्रदेश हैं, उतने समय होते हैं?

उत्तर – ऐसा नहीं है। एक प्रदेश के अतिक्रमण द्वारा जो समय की उत्पत्ति कही गई है, वह मन्दगति से गमन द्वारा कही है; तथा जो एक समय में चौदह राजू गमन कहा है, वह अक्रम से शीघ्र गति की अपेक्षा कहा गया है – इस प्रकार इसमें दोष नहीं है। यहाँ दृष्टान्त कहते हैं – जैसे कोई देवदत्त सौ दिन में सौ योजन जाता है, वही विद्या के प्रभाव से उतना ही एक दिन में चला जाता है तो क्या वहाँ सौ दिन हैं? नहीं, एक ही है; उसी प्रकार शीघ्रगति से गमन होने पर चौदह राजू गमन में भी एक समय ही है – इस प्रकार दोष नहीं है॥ २५॥

अथ पूर्वगाथायां यद्व्यवहारकालस्य कथंचित्परायत्तत्वं कथितं तत्केन रूपेण संभवतीति पृष्टे युक्तिं दर्शयति —

णत्थि चिरं वा खिप्पं मत्तारहियं तु सा वि खलु मत्ता।
पुग्गलदव्वेण विणा तम्हा कालो पडुच्चभवो॥ २६॥

णत्थि नास्ति न विद्यते। किं ? *चिरं वा खिप्पं* चिरं बहुतरकालस्वरूपं क्षिप्रं शीघ्रं च। कथंभूतं ? *मत्तारहियं तु* मात्रारहितं परिमाणरहितं मानविशेषरहितं च तन्मात्राशब्दवाच्यं परिमाणं चिरकालस्य घटिकाप्रहरादिरिति क्षिप्रस्य सूक्ष्मकालस्य च मात्राशब्दवाच्यं परिमाणं च। किं ? समयावलिकादीति। *सावि खलु मत्ता पोग्गलदव्वेण विणा* सूक्ष्मकालस्य या समयादिमात्रा सा मंदगतिपरिणतपुद्गलपरमाणु-नयनपुटविघटनादिपुद्गलद्रव्येण विना न ज्ञायते चिरकालघटिकादिरूपा मात्रा च घटिकानिमित्तभूतजल-भाजनादिद्रव्येण बिना न ज्ञायते *तम्हा कालो पडुच्चभवो* तस्मात्कारणात्समयघटिकादिसूक्ष्मस्थूलरूपो व्यवहारकालो यद्यपि निश्चयेन द्रव्यकालस्य पर्यायस्तथापि व्यवहारेण परमाणुजलादिपुद्गलद्रव्यं

अब, पहली गाथा में व्यवहारकाल की जो कथञ्चित् पराधीनता कही है, वह किस रूप से सम्भव है, ऐसा पूछने पर युक्ति दिखाते हैं —

चिर शीघ्र ना मात्रा बिना, वह मात्रा पुद्गल बिना।
होती नहीं अतएव काल, प्रतीत्यभव भी है कहा॥ २६॥

गाथार्थ - चिर अथवा क्षिप्र / शीघ्र मात्रा (परिमाण) के बिना नहीं होता है और वह मात्रा वास्तव में पुद्गलद्रव्य के बिना नहीं है; इसलिए काल प्रतीत्यभव है (पर का आश्रय लेकर व्यक्त होता है)।

टीकार्थ - ***णत्थि*** नहीं है। क्या नहीं है ? ***चिर वा खिप्पं*** चिर / बहुत कालस्वरूप / दीर्घकाल और शीघ्र नहीं हैं। ये कैसे नहीं हैं ? ***मत्तारहियं तु*** मात्रारहित / परिमाणरहित / मान / माप विशेषरहित नहीं हैं; उस मात्रा शब्द से वाच्य चिरकाल का परिमाण घड़ी-प्रहर आदि है और क्षिप्र / सूक्ष्मकाल का मात्रा शब्द से वाच्य परिमाण है। वह क्या है ? वह समय, आवली आदि है। ***सावि खलु मत्ता पोग्गलदव्वेण विणा*** सूक्ष्म काल की जो समय आदि मात्रा है, वह मन्दगति से परिणत पुद्गल परमाणु के बिना, नेत्र पलकों के खुलने आदि पुद्गलद्रव्य के बिना ज्ञात नहीं होती; तथा चिरकाल, घड़ी आदि रूप मात्रा घड़ी के निमित्तभूत जलभाजन आदि द्रव्य के बिना ज्ञात नहीं होती है। ***तम्हा कालो पडुच्चभवो*** उस कारण समय, घटिका आदि सूक्ष्म-स्थूलरूप व्यवहारकाल यद्यपि निश्चय से द्रव्यकाल की पर्याय है; तथापि व्यवहार से परमाणु,

प्रतीत्याश्रित्य निमित्तीकृत्य भव उत्पन्नो जात इत्यभिधीयते। केन दृष्टांतेन ? यथा निश्चयेन पुद्गलपिंडोपादानकारणेन समुत्पन्नोऽपि घटः व्यवहारेण कुम्भकारनिमित्तेनोत्पन्नत्वात्कुम्भकारेण कृत इति भण्यते तथा समयादिव्यवहारकालो यद्यपि निश्चयेन परमार्थकालोपादानकारणेन समुत्पन्नः तथापि समयनिमित्तभूतपरमाणुना घटिकानिमित्तभूतजलादिपुद्गलद्रव्येण च व्यज्यमानत्वात् प्रकटीक्रियमाणत्वात्पुद्गलोत्पन्न इति भण्यते।

पुनरपि कश्चिदाह — समयरूप एव परमार्थकालो न चान्यः कालाणुद्रव्यरूप इति ? परिहारमाह — समयस्तावत्सूक्ष्मकालरूपः प्रसिद्धः स एव पर्यायः न च द्रव्यम्। कथं पर्यायत्वमिति चेत् ? उत्पन्नप्रध्वंसित्वात्पर्यायस्य *''समओ उप्पण्णपद्धंसीति''* वचनात्। पर्यायस्तु द्रव्यं बिना न भवति द्रव्यं च निश्चयेनाविनश्वरं तच्च कालपर्यायस्योपादानकारणभूतं कालाणुरूपं कालद्रव्यमेव न च पुद्गलादि। तदपि कस्मात् ? उपादानकारणसदृशत्वात्कार्यस्य मृत्पिंडोपादानकारणसमुत्पन्नघटकार्यवदिति। किंच कालशब्द एव परमार्थकालवाचकभूतः स्वकीयवाच्यं परमार्थकालस्वरूपं व्यवस्थापयति साधयति। किंवत् ? सिंहशब्दः सिंहपदार्थवत्, सर्वज्ञशब्दः सर्वज्ञपदार्थवत्, इंद्रशब्दः इंद्रपदार्थवदित्यादि।

जल आदि पुद्गलद्रव्य को प्रतीत्य / उसका आश्रयकर / उसे निमित्तकर उत्पन्न होता है – ऐसा कहा जाता है। ऐसा किस उदाहरण से ज्ञात होता है ? जैसे निश्चय से पुद्गलपिण्डरूप उपादानकारण से उत्पन्न होने पर भी व्यवहार से कुम्भकार के निमित्त से उत्पन्न होने के कारण, घड़ा कुम्भकार ने बनाया – ऐसा कहा जाता है; उसी प्रकार समय आदि व्यवहारकाल यद्यपि निश्चय से परमार्थ कालरूप उपादानकारण से समुत्पन्न है; तथापि निमित्तभूत परमाणु द्वारा समय और निमित्तभूत जलादि पुद्गलद्रव्य द्वारा घड़ी के व्यक्त होने से, प्रगट किए जाने से, वह पुद्गल से उत्पन्न है – ऐसा कहा जाता है।

इस पर से कोई कहता है – समयरूप ही परमार्थ काल है, इससे भिन्न कोई द्रव्यरूप कालाणु नहीं है ? **उसका परिहार कहते / करते हैं** – जो सूक्ष्मकालरूप प्रसिद्ध समय है, वह पर्याय ही है; द्रव्य नहीं। उसके पर्यायत्व कैसे है ? यदि ऐसा प्रश्न हो तो कहते हैं – पर्याय के उत्पन्न-प्रध्वंसी होने से; 'समय उत्पन्न-प्रध्वंसी है' – ऐसा वचन होने से (प्रवचनसार, गाथा १३९) समय, पर्याय है। पर्याय, द्रव्य के बिना नहीं होती तथा द्रव्य निश्चय से अविनश्वर है और वह कालपर्याय का उपादानकारणभूत कालाणुरूप कालद्रव्य ही है; पुद्गल आदि नहीं है। वह भी कैसे है ? मिट्टी-पिण्डरूप उपादानकारण से समुत्पन्न घट-कार्य के समान, कार्य उपादानकारण के समान होने से समयरूप पर्याय कालद्रव्य की है।

दूसरी बात यह है कि परमार्थ काल-वाचकभूत 'काल' शब्द ही अपने वाच्य परमार्थ

पुनरप्युपसंहाररूपेण निश्चयव्यवहारकालस्वरूपं कथ्यते। तद्यथा – समयादिरूपसूक्ष्मव्यवहार-काल घटिकादिरूपस्थूलव्यवहारकालस्य च यद्युपादानकारणभूतकालस्तथापि समयघटिकारूपेण या विवक्षिता व्यवहारकालस्य भेदकल्पना तया रहितस्त्रिकालस्थायित्वेनानाद्यनिधनो लोकाकाशप्रदेश-प्रमाणकालाणुद्रव्यरूपः परमार्थकालः। यस्तु निश्चयकालोपादानकारणजन्योऽपि पुद्गलपरमाणुजल-भाजनादिव्यज्यमानत्वात्समयघटिकादिवसादिरूपेण विवक्षितव्यवहारकल्पनारूपः स व्यवहारकाल इति।

अत्र व्याख्यानेऽतीतानंतकाले दुर्लभो योऽसौ शुद्धजीवास्तिकायस्तस्मिन्नेव चिदानंदैककाल-स्वभावे सम्यक्श्रद्धानं रागादिभ्यो भिन्नरूपेण भेदज्ञानं रागादिविभावरूपसमस्तसंकल्पविकल्प-जालत्यागेन तत्रैव स्थिरचित्तं च कर्तव्यमिति तात्पर्यार्थः॥ २६॥

इति व्यवहारकालव्याख्यानमुख्यत्वेन गाथाद्वयं गतम्।

अत्र पञ्चास्तिकायषड्द्रव्यप्ररूपणप्रवणेऽष्टांतराधिकारसहितप्रथममहाधिकारमध्ये निश्चय-

---

काल के स्वरूप को व्यवस्थापित करता है, साधता है। वह किसके समान साधता है? 'सिंह' शब्द, सिंह पदार्थ के समान; 'सर्वज्ञ' शब्द, सर्वज्ञ पदार्थ के समान; 'इन्द्र' शब्द, इन्द्र पदार्थ के समान इत्यादि के समान 'काल' शब्द, काल पदार्थ को साधता है।

अब और भी उपसंहाररूप से निश्चय-व्यवहार काल-स्वरूप को कहते हैं। वह इस प्रकार – समय आदि रूप सूक्ष्म व्यवहारकाल का और घड़ी आदि रूप स्थूल व्यवहारकाल का यद्यपि उपादानकारणभूत काल है; तथापि जो समय, घड़ीरूप से विवक्षित व्यवहारकाल की भेद कल्पना है, उससे रहित त्रिकाल स्थायी होने से अनादिनिधन, लोकाकाश प्रदेश प्रमाण कालाणुरूप द्रव्य ही परमार्थ काल है; और जो निश्चयकालरूप उपादानकारण से उत्पन्न होने पर भी, पुद्गल परमाणु, जलभाजन आदि से व्यक्त होने के कारण समय, घड़ी, दिवस आदि रूप से विवक्षित व्यवहार कल्पनारूप है, वह व्यवहारकाल है।

इस व्याख्यान में अतीत अनन्त काल में दुर्लभ जो वह शुद्ध जीवास्तिकाय है, उस चिदानन्द एक काल स्वभाव में ही सम्यक्श्रद्धान, रागादि से भिन्नरूप में भेदज्ञान और रागादि विभावरूप समस्त सङ्कल्प-विकल्प जाल के त्याग से उसमें ही चित्त स्थिर करना चाहिए – यह तात्पर्यार्थ है॥ २६॥

इस प्रकार काल के व्याख्यान की मुख्यता से दो गाथाएँ पूर्ण हुईं।

यहाँ पञ्चास्तिकाय, षट्द्रव्य के प्ररूपण में प्रवण आठ अन्तराधिकारसहित प्रथम महाधिकार

व्यवहारकालप्ररूपणाभिधानः पञ्चगाथाभिः स्थलत्रयेण तृतीयोऽन्तराधिकारो गतः।

एवं समयशब्दार्थपीठिका द्रव्यपीठिका निश्चयव्यवहारकालव्याख्यानमुख्यतया चान्तराधिकारत्रयेण षड्विंशतिगाथाभिः *पंचास्तिकायपीठिका* समाप्ता।

अथ पूर्वोक्तषड्द्रव्याणां चूलिकारूपेण विस्तरव्याख्यानं क्रियते। तद्यथा —

परिणाम जीव मुत्तं सपदेसं एय खेत किरिया च।
णिच्चं कारण कत्ता सव्वगदिदरं हि यप्पवेसो॥

परिणाम परिणामिनौ जीवपुद्गलौ स्वभावविभावपरिणामाभ्यां शेषचत्वारि द्रव्याणि विभावव्यञ्जनपर्यायाभावाद् मुख्यवृत्त्या पुनरपरिणामीनि। *जीव* शुद्धनिश्चयनयेन विशुद्धज्ञानदर्शनस्वभावं शुद्धचैतन्यं प्राणशब्देनोच्यते तेन जीवतीति जीवः व्यवहारनयेन पुनः कर्मोदयजनितद्रव्यभावरूपैश्चतुर्भिः प्राणैर्जीवति जीविष्यति जीवितपूर्वो वा जीवः पुद्गलादिपञ्चद्रव्याणि पुनरजीवरूपाणि। *मुत्तं*

में तीन स्थलरूप पाँच गाथाओं द्वारा निश्चय-व्यवहार कालप्ररूपण नामक तीसरा अन्तराधिकार पूर्ण हुआ।

इस प्रकार समय शब्दार्थ पीठिका, द्रव्य पीठिका और निश्चय-व्यवहार काल के व्याख्यान की मुख्यतावाले तीन अन्तराधिकारयुक्त छब्बीस गाथाओं द्वारा ***पञ्चास्तिकाय पीठिका*** समाप्त हुई।

अब, पूर्वोक्त छह द्रव्यों का चूलिकारूप से विस्तृत व्याख्यान करते हैं। वह इस प्रकार —

परिणाम जीव प्रदेश कर्ता, नित्य सक्रिय सर्वगत।
प्रविष्ट कारण क्षेत्र रूपी, एक ये विपरीत युत॥

[यह गाथा मूलाचार में ५४७ वीं तथा वसुनन्दीश्रावकाचार में २३ वीं है।]

गाथार्थ - परिणाम, जीव, मूर्त, सप्रदेश, एक, क्षेत्र, क्रियावान, नित्य, कारण, कर्ता और सर्वगत तथा इससे विपरीत अप्रवेश आदि रूप छहों द्रव्यों को जानना चाहिए।

टीकार्थ - ***परिणाम*** स्वभाव-विभावरूप से परिणमन करने के कारण जीव-पुद्गल परिणाम-स्वभावी / परिणामी हैं। शेष चार द्रव्यों में विभाव व्यञ्जनपर्याय का अभाव होने से, इसकी मुख्यता की अपेक्षा अपरिणामी हैं। ***जीव*** शुद्ध निश्चयनय से विशुद्ध ज्ञान-दर्शन स्वभावी शुद्ध चैतन्य को प्राण शब्द से कहा जाता है, उससे जो जीता है, वह जीव है; तथा व्यवहारनय की अपेक्षा कर्म के उदय से उत्पन्न द्रव्य-भावरूप चार प्राणों से जो जीता है, जिएगा अथवा पहले

अमूर्तशुद्धात्मनो विलक्षणा स्पर्शरसगंधवर्णवती मूर्तिरुच्यते तत्सद्भावात् मूर्तः पुद्गलः, जीवद्रव्यं पुनरनुपचरितासद्भूतव्यवहारेण मूर्तमपि शुद्धनिश्चयनयेनामूर्तं धर्माधर्माकाशकालद्रव्याणि चामूर्तानि। *सपदेसं* लोकमात्रप्रमितासंख्येयप्रदेशलक्षणं जीवद्रव्यमादिं कृत्वा पञ्चद्रव्याणि पञ्चास्तिकायसंज्ञानि सप्रदेशानि, कालद्रव्यं पुनर्बहुप्रदेशलक्षणं कायत्वाभावादप्रदेशम्। *एय* द्रव्यार्थिकनयेन धर्माधर्माकाश-द्रव्याण्येकानि भवन्ति, जीवपुद्गलकालद्रव्याणि पुनरनेकानि। *खेत्त* सर्वद्रव्याणामवकाशदानसामर्थ्या-त्क्षेत्रमाकाशमेकं शेषपंचद्रव्याण्यक्षेत्राणि। *किरिया य* क्षेत्रात् क्षेत्रांतरगमनरूपा परिस्पंदवती चलनवती क्रिया सा विद्यते ययोस्तौ क्रियावंतौ जीवपुद्गलौ धर्माधर्माकाशकालद्रव्याणि पुनर्निष्क्रियाणि। *णिच्चं* धर्माधर्माकाशकालद्रव्याणि यद्यप्यर्थपर्यायत्वेनानित्यानि तथापि मुख्यवृत्त्या विभावव्यंजनपर्याया-भावान्नित्यानि; द्रव्यार्थिकनयेन च जीवपुद्गलद्रव्ये पुनर्यद्यपि द्रव्यार्थिकनयापेक्षया नित्ये तथाप्यगुरुलघु-परिणतिरूपस्वभावपर्यायापेक्षया विभावव्यञ्जनपर्यायापेक्षया चानित्ये। *कारण* पुद्गलधर्माधर्माकाश-कालद्रव्याणि व्यवहारनयेन जीवस्य शरीरवाङ्मनःप्राणापानादिगतिस्थित्यवगाहवर्तनाकार्याणि कुर्वंतीति

जीता था, वह जीव है। पुद्गल आदि पाँच द्रव्य अजीवरूप हैं। ***मुत्तं*** अमूर्त शुद्धात्मा से विलक्षण स्पर्श, रस, गन्ध, वर्णवाली मूर्ति कहलाती है, उसके सद्भाव से पुद्गल मूर्त है; जीवद्रव्य भी अनुपचरित असद्भूत व्यवहारनय से मूर्त है, शुद्ध निश्चयनय से अमूर्त है; तथा धर्म, अधर्म, आकाश और काल अमूर्त हैं। ***सपदेसं*** लोकमात्र प्रमित असंख्येय प्रदेश लक्षण जीवद्रव्य से प्रारम्भकर पञ्चास्तिकाय नामक पाँच द्रव्य सप्रदेश हैं तथा बहु प्रदेश लक्षण कायत्व का अभाव होने से कालद्रव्य अप्रदेश है।

एय द्रव्यार्थिकनय से धर्म, अधर्म, आकाशद्रव्य एक-एक हैं तथा जीव, पुद्गल, कालद्रव्य अनेक हैं। ***खेत्त*** सभी द्रव्यों को अवकाश / स्थान देने की सामर्थ्य होने से एक आकाश क्षेत्र है, शेष पाँच द्रव्य अक्षेत्र हैं। ***किरिया य*** क्षेत्र से क्षेत्रान्तर गमनरूप, परिस्पन्दात्मक, हलन-चलन युक्त क्रिया है, वह जिनके है, वे जीव और पुद्गल दो क्रियावान् हैं; धर्म, अधर्म, आकाश, कालद्रव्य निष्क्रिय हैं। ***णिच्चं*** धर्म, अधर्म, आकाश, कालद्रव्य यद्यपि अर्थ-पर्यायरूप से अनित्य हैं; तथापि मुख्यरूप से विभाव-व्यञ्जन-पर्याय का अभाव होने से द्रव्यार्थिकनय की अपेक्षा नित्य हैं। जीव, पुद्गलद्रव्य भी यद्यपि द्रव्यार्थिकनय की अपेक्षा नित्य हैं; तथापि अगुरुलघु परिणतिरूप स्वभावपर्याय की अपेक्षा और विभाव व्यञ्जनपर्याय की अपेक्षा अनित्य हैं।

कारण पुद्गल, धर्म, अधर्म, आकाश, कालद्रव्य व्यवहारनय से जीव को शरीर, वचन, मन, प्राणापान / श्वासोच्छ्वास आदि तथा गति, स्थिति, अवगाह, वर्तनारूप कार्य करने में निमित्तकारण होते हैं; अतः कारण हैं। जीवद्रव्य भी यद्यपि गुरु-शिष्यादिरूप से परस्पर में निमित्त

कारणानि भवन्ति, जीवद्रव्यं पुनर्यद्यपि गुरुशिष्यादिरूपेण परस्परोग्रहं करोति तथापि पुद्गलादिपञ्च-द्रव्याणां किमपि न करोति इत्यकारणम्। *कत्ता* शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन यद्यपि बंधमोक्षद्रव्यभावरूपपुण्यपापघटपटादीनामकर्ता जीवस्तथाप्यशुद्धनिश्चयेन शुभाशुभो-पयोगाभ्यां परिणतः सन् पुण्यपापबंधयोः कर्ता तत्फलभोक्ता च भवति विशुद्धज्ञानदर्शनस्वभावनिज-शुद्धात्मद्रव्यसम्यक्श्रद्धानज्ञानानुष्ठानरूपेण शुद्धोपयोगेन तु परिणतः सन् मोक्षस्यापि कर्ता तत्फलभोक्ता च शुभाशुभशुद्धपरिणामानां परिणमनमेव कर्तृत्वं सर्वत्र ज्ञातव्यमिति पुद्गलादीनां पञ्चद्रव्याणां च स्वकीयस्वकीयपरिणामेन परिणमनमेव कर्तृत्वं वस्तुवृत्त्या पुनः पुण्यपापादिरूपेणाकर्तृत्वमेव। *सव्वगदं* लोकालोकव्याप्तपेक्षया सर्वगतमाकाशं भण्यते लोकव्याप्त्यपेक्षया धर्माधर्मौ च, जीवद्रव्यं पुनरेकैक-जीवापेक्षया लोकपूरणावस्थां विहायासर्वगतं, नानाजीवापेक्षया सर्वगतमेव भवति, पुद्गलद्रव्यं पुनर्लोक-रूपमहास्कंदापेक्षया सर्वगतं, शेषपुद्गलापेक्षया सर्वगतं न भवतीति, कालद्रव्यं पुनरेककालाणुद्रव्यापेक्षया सर्वगतं न भवति, लोकप्रदेशप्रमाणनानाकालाणुविवक्षया लोके सर्वगतम्। *इदरंहि यप्पवेसो* यद्यपि सर्वद्रव्याणि व्यवहारेणैकक्षेत्रावगाहेनान्योन्यानुप्रवेशेन तिष्ठन्ति तथापि निश्चयेन चेतनाचेतनादि-

होता है; तथापि पुद्गलादि पाँच द्रव्यों को किसी भी प्रकार निमित्त नहीं होता; अतः अकारण है।

कत्ता शुद्ध पारिणामिक परमभाव ग्राहक शुद्ध द्रव्यार्थिकनय से यद्यपि बन्ध, मोक्ष, द्रव्य-भावरूप पुण्य-पाप, घट-पट आदि का जीव अकर्ता है; तथापि अशुद्ध निश्चय से शुभ-अशुभ उपयोगरूप परिणमित होता हुआ, पुण्य-पाप के बन्ध का कर्ता है और उसके फल का भोक्ता है। विशुद्ध ज्ञान-दर्शन स्वभावी निज शुद्धात्मद्रव्य के सम्यक् श्रद्धान-ज्ञान-अनुष्ठानरूप शुद्धोपयोग से परिणत होता हुआ मोक्ष का भी कर्ता है और उसके फल का भोक्ता है। शुभ, अशुभ, शुद्ध परिणामों का परिणमन ही कर्तृत्व है – ऐसा सर्वत्र जानना चाहिए। पुद्गलादि पाँच द्रव्यों का अपने-अपने परिणामरूप से परिणमन ही कर्तृत्व है; वस्तु की अपेक्षा पुण्य-पाप आदि रूप से अकर्तृत्व ही है।

सव्वगदं लोक-अलोक में व्याप्त होने की अपेक्षा आकाश सर्वगत कहलाता है, लोक में व्याप्त होने की अपेक्षा धर्म और अधर्मद्रव्य सर्वगत हैं; जीवद्रव्य भी एक जीव की अपेक्षा लोकपूरण अवस्था को छोड़कर असर्वगत है, अनेक जीवों की अपेक्षा सर्वगत ही है; पुद्गलद्रव्य भी लोकरूप महा-स्कन्ध की अपेक्षा सर्वगत है, शेष पुद्गलों की अपेक्षा सर्वगत नहीं है; कालद्रव्य भी एक कालाणुद्रव्य की अपेक्षा सर्वगत नहीं है, लोकाकाश के प्रदेशप्रमाण अनेक कालाणुओं की विवक्षा से लोक में सर्वगत है। ***इदरंहि यप्पवेसो*** यद्यपि सभी द्रव्य व्यवहार से एक क्षेत्रावगाही की अपेक्षा अन्योन्य अनुप्रविष्ट हैं; तथापि निश्चय से चेतन-अचेतन आदि

स्वकीयस्वकीयस्वरूपं न त्यजंतीति।

अत्र षड्द्रव्येषु मध्ये वीतरागचिदानंदैकादिगुणस्वभावं शुभाशुभमनोवचनकायव्यापाररहितं निजशुद्धात्मद्रव्यमेवोपादेयमिति भावार्थः।

इत ऊर्ध्वं *जीवा पोग्गलकाया* इत्यादिगाथायां पूर्वं पञ्चास्तिकाया ये सूचितास्तेषामेव विशेष-व्याख्यानं क्रियते। तत्र पाठक्रमेण त्रिपंचाशद्गाथाभिर्नवांतराधिकारैर्जीवास्तिकायव्याख्यानं प्रारभ्यते। तासु त्रिपञ्चाशद्गाथासु मध्ये प्रथमतस्तावत् चार्वाकमतानुसारिशिष्यं प्रति जीवसिद्धिपूर्वकत्वेन नवाधिकारक्रमसूचनार्थं *जीवोत्ति हवदि चेदा...* इत्याद्येकाधिकारसूत्रगाथा भवति।

तत्रादौ प्रभुता तावज्जीवत्वं देहमात्रता। अमूर्तत्वं च चैतन्यमुपयोगात्तथा क्रमात्॥
कर्तृता भोक्तृता कर्मायुक्तत्वं च त्रयं तथा। कथ्यते यौगपद्येन यत्र तत्रानुपूर्व्यतः॥

इत श्लोकद्वयेन भट्टमतानुसारिशिष्यं प्रति सर्वज्ञसिद्धिपूर्वकत्वेनाधिकारव्याख्यानं क्रमशः सूचितम्। तत्रादौ प्रभुत्वव्याख्यानमुख्यत्वेन भट्टचार्वाकमतानुसारिशिष्यं प्रति सर्वज्ञसिद्ध्यर्थं *कम्ममल...* इत्यादिगाथाद्वयं भवति। तदनंतरं चार्वाकमतानुसारिशिष्यं प्रति जीवसिद्ध्यर्थं जीवत्वव्याख्यानरूपेण *पाणेहिं चदुहिं...* इत्यादि गाथात्रयम्। अथ नैयायिकमीमांसकसांख्यमताश्रितशिष्यं प्रति जीवस्य

अपने-अपने स्वरूप को नहीं छोड़ते।

यहाँ छह द्रव्यों में से वीतराग, चिदानन्द, एक आदि गुणस्वभावी; शुभ-अशुभ सम्बन्धी मन-वचन-काय के व्यापार से रहित, निज शुद्धात्मद्रव्य ही उपादेय है – यह भावार्थ है।

इससे आगे ***जीवा पोग्गलकाया*** इत्यादि गाथा में पहले जो पञ्चास्तिकाय सूचित किए थे, उनका ही विशेष व्याख्यान करते हैं। वहाँ पाठक्रम से त्रेपन गाथाओंवाले नौ अन्तराधिकारों द्वारा जीवास्तिकाय का व्याख्यान प्रारम्भ करते हैं। उन त्रेपन गाथाओं में से सर्व प्रथम चार्वाकमतानुसारी शिष्य के प्रति जीव-सिद्धिपूर्वक नौ अधिकारों के क्रम की सूचना के लिए ***जीवोत्ति हवदि चेदा*** इत्यादि एक अधिकार सूत्रगाथा है।

'वहाँ सर्व प्रथम प्रभुता, फिर जीवत्व, देहमात्रता और अमूर्तत्व, उसी क्रम से चैतन्य, उपयोग तथा कर्तृता, भोक्तृता और कर्मों से पृथक्ता – ये तीन युगपत् यत्र-तत्रानुपूर्वी से कहते हैं।'

इन दो श्लोकों द्वारा भट्टमतानुसारी शिष्य के प्रति सर्वज्ञ-सिद्धिपूर्वक क्रमशः अधिकार का व्याख्यान सूचित किया है। वहाँ सर्व प्रथम प्रभुत्व-व्याख्यान की मुख्यता से भट्ट चार्वाकमतानुसारी शिष्य के प्रति सर्वज्ञ-सिद्धि हेतु ***कम्ममल...*** इत्यादि दो गाथाएँ हैं। तत्पश्चात् चार्वाकमतानुसारी शिष्य के प्रति जीव-सिद्धि के लिए जीवत्व-व्याख्यानरूप से ***पाणेहिं चदुहिं...***

स्वदेहमात्रस्थापनार्थं *जह पउम* इत्यादिसूत्रद्वयम्। तदनंतरं भट्टचार्वाकमतानुकूलशिष्यं प्रति जीवस्यामूर्तत्वज्ञापनार्थं *जेसिं जीवसहावो* इत्यादिसूत्रत्रयम्। अथानादिचैतन्यसमर्थनव्याख्यानेन पुनरपि चार्वाकमतनिराकरणार्थं *कम्माणं फल...* इत्यादि सूत्रद्वयम्। एवमधिकारगाथामादिं कृत्वांतराधिकारपञ्चकसमुदायेन त्रयोदशगाथा गताः।

अथ नैयायिकमतानुसारिशिष्यसंबोधनार्थं *उवओगो खलु दुविहो...* इत्याद्येकोनविंशतिगाथापर्यन्तमुपयोगाधिकारः कथ्यते — तत्रैकोनविंशतिगाथासु मध्ये प्रथमतस्तावत् ज्ञानदर्शनोपयोगद्वयसूचनार्थं *उवओगे खलु...* इत्यादिसूत्रमेकम्। तदनंतरमष्टविधज्ञानोपयोगसंज्ञाकथनार्थं *आभिणि...* इत्यादि सूत्रमेकम्। अथ मत्यादिसंज्ञानपञ्चकविवरणार्थं *मदिणाण...* इत्यादिपाठक्रमेण सूत्रपञ्चकम्।

इत्यादि तीन गाथाएँ हैं। तदनन्तर नैयायिक, मीमांसक, सांख्यमताश्रित शिष्य के प्रति जीव को स्वदेहमात्र स्थापनहेतु ***जह पउम...*** इत्यादि दो गाथाएँ हैं। तदुपरान्त भट्ट-चार्वाकमतानुकूल शिष्य के प्रति जीव के अमूर्तत्व का ज्ञान कराने के लिए ***जेसिं जीवसहावो...*** इत्यादि तीन गाथाएँ हैं। उसके बाद अनादि चैतन्य समर्थन परक व्याख्यान द्वारा पुनः चार्वाकमत के निराकरण-हेतु ***कम्माणं फल...*** इत्यादि दो गाथाएँ हैं। – इस प्रकार अधिकार गाथा से प्रारम्भ कर पाँच अन्तराधिकारों के समूह द्वारा तेरह गाथाएँ पूर्ण हुईं।

प्रथम अवान्तराधिकारगत पाँच अधिकारों के समुदायपरक १३ गाथाओं की सारणी

स्थलक्रम	विषय	कहाँ से कहाँ पर्यन्त	कुल गाथाएँ
१	अधिकार सूत्रगाथा	२८ वीं	१
२	सर्वज्ञ सिद्धि परक	२९-३० वीं	२
३	जीव सिद्धि परक	३१-३३ वीं	३
४	जीव की स्वदेह मात्र स्थिति	३४-३५ वीं	२
५	जीव का अमूर्तत्व ज्ञापनार्थ	३६-३८ वीं	३
६	चार्वाक मत निराकरणार्थ	३९-४० वीं	२

अब, नैयायिकमतानुसारी शिष्य के सम्बोधन-हेतु ***उवओगो खलु दुविहो...*** इत्यादि उन्नीस गाथापर्यन्त उपयोगाधिकार कहते हैं। वहाँ उन्नीस गाथाओं में से सर्व प्रथम ज्ञान-दर्शन दो उपयोगों की सूचना के लिए ***उवओगो खलु...*** इत्यादि एक गाथा है। उसके बाद आठ प्रकार के ज्ञानोपयोग का नाम कहने के लिए ***आभिणि...*** इत्यादि एक गाथा है। तत्पश्चात् मति आदि पाँच सम्यग्ज्ञानों के विवरण-हेतु ***मदिणाण...*** इत्यादि पाँच गाथाएँ हैं। तदनन्तर तीन अज्ञान के कथनरूप से **मिच्छत्ता अण्णाणं...** इत्यादि – इस प्रकार ज्ञानोपयोग सम्बन्धी आठ गाथाएँ हैं।

तदनंतरमज्ञानत्रय-कथनरूपेण *मिच्छत्ता अण्णाणं...* इत्यादि सूत्रमेकं इति ज्ञानोपयोगसूत्राष्टकम्। अथ चक्षुरादिदर्शनचतुष्टयप्रतिपादनमुख्यत्वेन *दंसणमवि...* इत्यादि सूत्रमेकम्। एवं ज्ञानदर्शनोपयोगाधिकार-गाथामादिं कृत्वान्तरस्थलपञ्चकसमुदायेन गाथानवकं गतम्।

अथ गाथादशकपर्यन्तं व्यवहारेण जीवज्ञानयोः संज्ञालक्षणप्रयोजनादिभेदेऽपि निश्चयनयेन प्रदेशास्तित्वाभ्यां नैयायिकं प्रत्यभेदस्थापनं क्रियते अग्न्युष्णत्वयोरभेदवत्। जीवज्ञानयोः संज्ञालक्षण-प्रयोजनानां स्वरूपं कथ्यते तथापि जीवद्रव्यस्य जीव इति संज्ञा ज्ञानगुणस्य ज्ञानमिति संज्ञा; चतुर्भिः प्राणैर्जीवति जीविष्यति जीवितपूर्वो वा जीव इति जीवद्रव्यलक्षणं, ज्ञायंते पदार्था अनेनेति ज्ञानगुणलक्षणं; जीवद्रव्यस्य बंधमोक्षादिपर्यायैरविनष्टरूपेण परिणमनं प्रयोजनं, ज्ञानगुणस्य पुनः पदार्थपरिच्छित्ति-मात्रमेव प्रयोजनमिति संक्षेपेण संज्ञालक्षणप्रयोजनानि ज्ञातव्यानि।

तत्र दशगाथासु मध्ये जीवज्ञानयोः संक्षेपेणाभेदस्थापनार्थं *ण विअप्पदि...* इत्यादि सूत्रत्रयम्। अथ व्यपदेशादयो द्रव्यगुणानां भेदे कथंचिदभेदेऽपि घटंत इत्यादि समर्थनरूपेण *ववदेसा...* इत्यादि-गाथात्रयं; तदनंतरमेकक्षेत्रावगाहित्वेनायुतसिद्धानामभेदसिद्धानामाधाराधेयभूतानां पदार्थानां प्रदेश-भेदेऽपि सति इहात्मनि ज्ञानमिह तंतुषु पट इत्यादिरूपेण इहेदमिति प्रत्ययः सम्बन्धः समवाय इत्यभिधीयते

तदुपरान्त चक्षु आदि चार दर्शन के प्रतिपादन की मुख्यता से ***दंसणमवि...*** इत्यादि एक गाथा है। इस प्रकार ज्ञान-दर्शन उपयोग अधिकार सम्बन्धी गाथा से प्रारम्भकर पाँच अन्तरस्थलों के समूह द्वारा नौ गाथाएँ पूर्ण हुईं।

अब, दश गाथाओं पर्यन्त व्यवहार से जीव और ज्ञान में संज्ञा, लक्षण, प्रयोजन आदि का भेद होने पर भी निश्चय से प्रदेशों के अस्तित्व द्वारा नैयायिक के प्रति अग्नि-उष्णता के अभेद समान अभेदस्थापन करते हैं। जीव और ज्ञान में संज्ञा, लक्षण, प्रयोजन का स्वरूप कहते हैं – जीवद्रव्य की ***'जीव'*** यह संज्ञा (नाम) है, ज्ञान गुण की ***'ज्ञान'*** यह संज्ञा है। चार प्राणों से जो जीता है, जिएगा अथवा पहले जीता था, वह जीव है – यह जीव द्रव्य का लक्षण है; जिसके द्वारा पदार्थ ज्ञात होते हैं (वह ज्ञान है) – यह ज्ञान गुण का लक्षण है। बन्ध-मोक्षादि पर्यायों से परिणमित होने पर भी अविनष्टरूप से रहना / नष्ट नहीं होना, जीवद्रव्य का प्रयोजन है तथा ज्ञानगुण का परिच्छित्तिमात्र ही प्रयोजन है। – इस प्रकार संक्षेप से संज्ञा, लक्षण, प्रयोजन जानना चाहिए।

वहाँ दश गाथाओं में से जीव और ज्ञान में संक्षेप से अभेद-स्थापनहेतु ***ण वियप्पदि...*** इत्यादि तीन गाथाएँ हैं। तत्पश्चात् द्रव्य-गुणों में व्यपदेश आदि भेद होने पर भी कथञ्चित् अभेद भी घटित होता है, इत्यादि समर्थनरूप से ***ववदेसा*** इत्यादि तीन गाथाएँ हैं। तदनन्तर प्रदेशभेद होने पर भी एकक्षेत्रावगाही होने से, नैयायिकमत में अयुतसिद्ध, अभेदसिद्ध, आधार-आधेयभूत पदार्थों के 'इस आत्मा में ज्ञान,' 'इन तन्तुओं में वस्त्र' इत्यादिरूप से 'इहेदं प्रत्यय' (यहाँ यह-

नैयायिकमते, तस्य निषेधार्थं *ण हि सो समवायाहिं...* इत्यादि सूत्रद्वयं, पुनश्च गुणगुणिनोः कथंचिद्-भेदविषये दृष्टांतदार्ष्टांतव्याख्यानार्थं *वण्णरस...* इत्यादि सूत्रद्वयमिति।

दृष्टान्तलक्षणमाह — दृष्टावंतो धर्मौ स्वभावाग्निधूमयोरिव साध्यसाधकयोर्वादिप्रतिवादिभ्यां कर्तृभूताभ्यामविवादेन यत्र वस्तुनि स दृष्टांत इति अथवा संक्षेपेण यथेति दृष्टांतलक्षणं तथेति दार्ष्टांत-लक्षणमिति।

एवं पूर्वोक्तगाथानवके स्थलपञ्चकमत्र तु गाथादशके स्थलचतुष्टयं चेति समुदायेन नवभिरंत-रस्थलैरेकोनविंशतिसूत्रैरुपयोगाधिकारपातनिका।

ऐसा ज्ञान करानेवाला) सम्बन्ध समवाय कहा गया है, उसके निषेध के लिए ***ण हि सो समवायाहिं...*** इत्यादि दो गाथाएँ हैं। तदुपरान्त गुण-गुणी के कथञ्चित् अभेद विषय में दृष्टान्त-दार्ष्टान्त के व्याख्यान-हेतु ***वण्णरस...*** इत्यादि दो गाथाएँ हैं।

दृष्टान्त का लक्षण कहते हैं – कर्तारूप वादी-प्रतिवादिओं द्वारा धूम-अग्नि के समान जिस वस्तु में साध्य-साधक के अन्त / धर्म / स्वभाव देखे जाते हैं, वह दृष्टान्त है; अथवा संक्षेप में यथा / जैसे / जिस प्रकार – यह दृष्टान्त का लक्षण है और तथा / वैसे ही / उसी प्रकार – यह दार्ष्टान्त का लक्षण है।

इस प्रकार पूर्वोक्त नौ गाथाओं में पाँच स्थल और यहाँ दश गाथाओं में चार स्थल – इस प्रकार नौ अन्तरस्थलोंवाली उन्नीस गाथाओं द्वारा समुदायरूप से उपयोगाधिकार की पातनिका है।

द्वितीय अवान्तराधिकारगत उपयोगाधिकारपरक १९ गाथाओं की सारणी

गाथा नवक के स्थल पञ्चक

स्थलक्रम	विषय	कहाँ से कहाँ पर्यन्त	कुल गाथाएँ
१	दो उपयोग सूचक	४१ वीं	१
२	आठ ज्ञानोपयोगसंज्ञक	४२ वीं	१
३	मत्यादि संज्ञान पञ्चक विवरण	४३-४७ वीं	५
४	अज्ञानत्रय कथन परक	४८ वीं	१
५	चक्षु आदि चार दर्शन प्रतिपादक	४९ वीं	१

गाथा दशक के स्थल चतुष्क

१	जीव-ज्ञान में अभेद स्थापनार्थ	५०-५२ वीं	३
२	द्रव्य-गुण में कथञ्चित् अभेद के समर्थनार्थ	५३-५५ वीं	३
३	समवाय सम्बन्ध निराकरणार्थ	५६-५७ वीं	२
४	गुण-गुणी अभेद विषय में दृष्टान्त-दार्ष्टान्त व्याख्यान	५८-५९ वीं	२

अथानंतरं वीतरागपरमानंदसुधारसपरमसमरसीभावपरिणतिस्वरूपात् शुद्धजीवास्तिकायात्सकाशाद्भिन्नं यत्कर्मकर्तृत्वभोक्तृत्वकर्मसंयुक्तत्वत्रयस्वरूपं सदसत्प्रतिपादनार्थं यत्र तत्रानुपूर्व्यष्टादशगाथापर्यंतं व्याख्यानं करोति। तत्राष्टादशगाथासु मध्ये प्रथमस्थले *जीवा अणाइणिहणा...* इत्यादि गाथात्रयेण समुदायकथनं; तदनंतरं द्वितीयस्थले *उदयेण...* इत्याद्येकगाथायामौदयिकादिपञ्चभावव्याख्यानं; अथ तृतीयस्थले *कम्मं वेदयमाणो...* इत्यादिगाथाषट्केन कर्तृत्वमुख्यतया व्याख्यानं; अथ चतुर्थस्थले *कम्मं कम्मं कुव्वदि...* इत्याद्येका पूर्वपक्षगाथा; तदनंतरं पञ्चमस्थले परिहारगाथाः सप्त।

तत्र सप्तगाथासु मध्ये प्रथमं *ओगाढगाढ...* इत्यादि गाथात्रयेण निश्चयनयेन द्रव्यकर्मणां जीवः कर्ता न भवतीति कथ्यते; तदनंतरं निश्चयनयेन जीवस्य द्रव्यकर्तृत्वेऽपि *जीवा पोग्गलकाया...* इत्याद्येकगाथया कर्मफले भोक्तृत्वं; अथ *तम्हा कम्मं कत्ता....* इत्याद्येकसूत्रेण कर्तृत्वभोक्तृत्वयोरुपसंहारः; तदनंतरं *एवं कत्ता...* इत्यादिगाथाद्वयेन *क्रमेण* कर्मसंयुक्तकर्मरहितत्वं च कथयतीति परिहारमुख्यत्वेन सप्तगाथा गताः।

एवं पाठक्रमेणाष्टादशगाथाभिः स्थलपञ्चकेनैकांतमतनिराकरणाय तथैवानेकांतमतस्थापनाय

इसके बाद वीतराग परमानन्द सुधारसरूप परम समरसी भावमय परिणतिस्वरूप शुद्ध जीवास्तिकाय से भिन्न, उन कर्मों के कर्तृत्व, भोक्तृत्व, कर्मसंयुक्तत्व – तीनों के स्वरूप के सत् -असत् प्रतिपादन-हेतु यत्रतत्रानुपूर्वी से व्याख्यान करते हैं। वहाँ अठारह गाथाओं में से प्रथम स्थल में ***जीवा अणाइणिहणा...*** इत्यादि तीन गाथाओं द्वारा समुदाय कथन है। तदनन्तर द्वितीय स्थल में ***उदयेण...*** इत्यादि एक गाथा में औदयिक आदि पाँच भावों का व्याख्यान है। उसके बाद तृतीय स्थल में ***कम्मं वेदयमाणो...*** इत्यादि छह गाथाओं द्वारा कर्तृत्व की मुख्यता से व्याख्यान है। तत्पश्चात् चतुर्थ स्थल में ***कम्मं कम्मं कुव्वदि...*** इत्यादि एक गाथा पूर्वपक्ष रूप में है और तदनन्तर पञ्चम स्थल में सात परिहार गाथाएँ हैं।

उन सात गाथाओं में से प्रथम ***ओगाढगाढ...*** इत्यादि तीन गाथाओं द्वारा निश्चयनय से जीव द्रव्यकर्मों का कर्ता नहीं है – ऐसा कहते हैं। तदुपरान्त निश्चयनय से जीव के द्रव्यकर्मों का अकर्तृत्व होने पर भी ***जीवा पोग्गलकाया...*** इत्यादि एक गाथा द्वारा कर्मफल का भोक्तृत्व बताया है। उसके बाद ***तम्हा कम्मं कत्ता...*** इत्यादि क्रम से दो गाथा द्वारा कर्तृत्व-भोक्तृत्व का उपसंहार किया है। तदनन्तर ***एवं कत्ता...*** इत्यादि क्रम से दो गाथाओं द्वारा कर्मसंयुक्तता और कर्मरहितता कहते हैं। – इस प्रकार परिहार की मुख्यता से सात गाथाएँ पूर्ण हुईं।

इस प्रकार पाठक्रम से अठारह गाथाओं द्वारा पाँच स्थलों से एकान्तमत के निराकरणार्थ और उसी प्रकार अनेकान्तमत के स्थापनार्थ सांख्यमतानुसारी शिष्य के सम्बोधन-हेतु कर्तृत्व,

च सांख्यमतानुसारिशिष्यसम्बोधनार्थं कर्तृत्वं, बौद्धमतानुयायिशिष्यं प्रतिबोधनार्थं भोक्तृत्वं, सदाशिवमताश्रितशिष्यसंदेहविनाशार्थं कर्मसंयुक्तत्वमिति कर्तृत्वभोक्तृत्वकर्मसंयुक्तत्वाधिकारत्रयं ज्ञातव्यम्। इत ऊर्ध्वं जीवास्तिकायसम्बन्धिनवाधिकारव्याख्यानानंतरं *एक्को जेम महप्पा* इत्यादिगाथात्रयेण जीवास्तिकायचूलिका।

बौद्धमतानुयायी शिष्य को समझाने के लिए भोक्तृत्व, सदाशिवमत का आश्रय लेनेवाले शिष्य के सन्देह को नष्ट करने-हेतु कर्मसंयुक्तत्व – इस प्रकार कर्तृत्व, भोक्तृत्व, कर्मसंयुक्तत्व – ये तीन अधिकार जानना चाहिए।

कर्म कर्तृत्व-भोक्तृत्व-संयुक्तत्वपरक तृतीय अवान्तराधिकारगत १८ गाथाओं की सारणी

स्थलक्रम	विषय	गाथा कहाँ से कहाँ पर्यन्त	कुल गाथाएँ
१	समुदाय कथन	६०-६२ वीं	३
२	औदयिकादि पञ्चभाव व्याख्यान	६३ वीं	१
३	कर्तृत्व मुख्यतया	६४-६९ वीं	६
४	पूर्वपक्ष गाथा	७० वीं	१
५	परिहार गाथा	७१-७७ वीं	७
परिहार गाथा परक गाथाओं का विवरण			
अ	द्रव्यकर्म का जीव अकर्ता	७१-७३ वीं	३
ब	कर्मफल-भोक्ता	७४ वीं	१
स	कर्तृत्व-भोक्तृत्व उपसंहार	७५ वीं	१
द	कर्म संयुक्त-रहितत्व	७६-७७ वीं	२

इससे आगे जीवास्तिकाय सम्बन्धी नौ अधिकारों के व्याख्यान के बाद ***एक्को जेम महप्पा*** इत्यादि तीन गाथाओं द्वारा जीवास्तिकाय की चूलिका है।

[जिनागम में किसी भी विषय के प्रतिपादन की तीन शैलियाँ प्रसिद्ध हैं – पूर्वानुपूर्वी, पश्चादानुपूर्वी और यत्रतत्रानुपूर्वी। इन्हें हम इस प्रकार समझ सकते हैं – स्पर्श, रस, गन्ध, वर्ण के कथन क्रम में स्पर्श से विषय का विस्तार करनेवाली शैली को पूर्वानुपूर्वी शैली कहते हैं। वर्ण से प्रारम्भकर विषय का विस्तार करनेवाली शैली को पश्चादानुपूर्वी शैली कहते हैं तथा क्रम की मुख्यता न कर कहीं से भी विषय का विस्तार करनेवाली शैली को यत्रतत्रानुपूर्वी शैली कहते हैं।]

एवं पञ्चास्तिकायषड्द्रव्यप्रतिपादकप्रथममहाधिकारसम्बन्धिषष्ठांतराधिकारेषु मध्ये त्रिपञ्चाशद्गाथाप्रमितचतुर्थांतराधिकारे समुदायपातनिका।

तद्यथा – अथ संसारावस्थस्याप्यात्मनः शुद्धनिश्चयेन निरुपाधिविशुद्धभावान् तथैवाशुद्धनिश्चयेन सोपाधिभावकर्मरूपरागादिभावान् तथा चासद्भूतव्यवहारेण द्रव्यकर्मोपाधिजनिताशुद्धभावांश्च यथासंभवं प्रतिपादयति –

जीवोत्ति हवदि चेदा उवओगविसेसिदो पहू कत्ता।
भोत्ता सदेहमत्तो ण हि मुत्तो कम्मसंजुतो॥ २७॥

***जीवोत्ति हवदि* आत्मा हि शुद्धनिश्चयेन सत्ता चैतन्यबोधादिशुद्धप्राणैर्जीवति तथा चाशुद्ध-**

इस प्रकार पञ्चास्तिकाय, षट्द्रव्य प्रतिपादक प्रथम महाधिकार सम्बन्धी छह अन्तराधिकारों में से त्रेपन गाथाओंवाले चतुर्थ अन्तराधिकार में समुदाय पातनिका हुई।

५३ गाथावाले चतुर्थ अन्तराधिकार का विभाजन

स्थलक्रम	विषय	गाथा कहाँ से कहाँ पर्यन्त	कुल गाथाएँ
१	पाँच अधिकारों का समुदाय	२८-४० वीं	१३
२	उपयोग अधिकार	४१-५९ वीं	१९
३	कर्म कर्तृत्व-भोक्तृत्व-संयुक्तत्व	६०-७७ वीं	१८
४	जीवास्तिकाय चूलिका	७८-८० वीं	३

(अब, चार भागों में विभक्त चतुर्थ अन्तराधिकार की त्रेपन गाथाओं में से प्रथम भाग की तेरह गाथाओं का विस्तार करते हैं। उसमें सर्व प्रथम एक अधिकार गाथा है। वह इस प्रकार -)

अब, संसार अवस्थावाले आत्मा के भी शुद्ध निश्चय से निरुपाधि विशुद्धभावों का, उसी प्रकार अशुद्ध निश्चय से सोपाधिभावमय कर्मरूप रागादि भावों का तथा असद्भूत व्यवहार से द्रव्यकर्म उपाधिजनित अशुद्धभावों का यथासम्भव प्रतिपादन करते हैं -

है जीव जीव चिदात्मक, उपयोगलक्षित प्रभू है।
कर्ता व भोक्ता तन प्रमाण, अमूर्त कर्मसंयुक्त है॥ २७॥

गाथार्थ - (संसारस्थित आत्मा) जीव, चेतयिता, उपयोगलक्षित, प्रभु, कर्ता, भोक्ता, देह प्रमाण, अमूर्त और कर्मसंयुक्त है।

निश्चयेन क्षायोपशमिकौदयिकभावप्राणैर्जीवति तथैव चानुपचरितासद्भुतव्यवहारेण द्रव्यप्राणैश्च यथासंभवं जीवति जीविष्यति जीवितपूर्वश्चेति जीवो भवति। *चेदा* शुद्धनिश्चयेन शुद्धज्ञानचेतनया तथैवाशुद्धनिश्चयेन कर्मकर्मफलरूपया चाशुद्धचेतनया युक्तत्वाच्चेतयिता भवति। *उवओगविसेसिदो* निश्चयेन केवलज्ञानदर्शनरूपशुद्धोपयोगेन तथैव चाशुद्धनिश्चयेन मतिज्ञानादिक्षायोपशमिकाशुद्धोपयोगेन युक्तत्वादुपयोगविशेषितो भवति। *पहू* निश्चयेन मोक्षमोक्षकारणरूपशुद्धपरिणामपरिणमनसमर्थत्वात्तथैव चाशुद्धनयेन संसारसंसारकारणरूपाशुद्धपरिणामपरिणमनसमर्थत्वात् प्रभुर्भवति। *कत्ता* शुद्धनिश्चयनयेन शुद्धभावानां परिणामानां तथैवाशुद्धनिश्चयेन भावकर्मरूपरागादिभावानां तथा चानुपचरितासद्भूतव्यवहारेण द्रव्यकर्मनोकर्मादीनां कर्तृत्वात्कर्ता भवति। *भोत्ता* शुद्धनिश्चयेन शुद्धात्मोत्थवीतरागपरमानंदरूपसुखस्य तथैवाशुद्धनिश्चयेनेन्द्रियजनितसुखदुःखानां तथा चानुपचरितासद्भूतव्यवहारेण सुखदुःखसाधकेष्टानिष्टाशनपानादिबहिरङ्गविषयाणां च भोक्तृत्वात् भोक्ता भवति। *सदेहमेत्तो* निश्चयेन लोकाकाशप्रमितासंख्येयप्रदेशप्रमितोऽपि व्यवहारेण शरीरनामकर्मोदयजनिताणुमहच्छरीरप्रमाणत्वात्स्वदेहमात्रो भवति। *ण हि मुत्तो कम्मसंजुत्तो* मूर्तिरहितः असद्भूतव्यवहारेणानादि-

टीकार्थ - ***जीवोत्ति हवदि*** आत्मा शुद्ध निश्चय से सत्ता, चैतन्य, बोधादि शुद्ध प्राणों से जीता है तथा अशुद्ध निश्चय से क्षायोपशमिक, औदयिकभाव प्राणों से जीता है; उसी प्रकार अनुपचरित असद्भूत व्यवहार से यथासम्भव द्रव्य प्राणों से जीता है, जिएगा और पहले जीता था, वह जीव है। ***चेदा*** शुद्ध निश्चय से शुद्ध ज्ञानचेतना से, उसी प्रकार अशुद्धनिश्चय से कर्म, कर्म फलरूप अशुद्धचेतना से युक्त होने के कारण उपयोग विशेषित है। ***पहू*** निश्चय से मोक्ष, मोक्ष के कारणरूप शुद्धपरिणाम से परिणमन की सामर्थ्य होने से और उसी प्रकार अशुद्धनय से संसार, संसार के कारणरूप अशुद्धपरिणाम से परिणमन की सामर्थ्य होने से प्रभु है। ***कत्ता*** शुद्ध निश्चयनय से शुद्धभावरूप परिणामों का और उसी प्रकार अशुद्ध निश्चय से भावकर्मरूप रागादि भावों का तथा अनुपचरित असद्भूत व्यवहार से द्रव्यकर्म, नोकर्म आदि का कर्तृत्व होने से कर्ता है। ***भोक्ता*** शुद्ध निश्चय से शुद्धात्मा के आश्रय से उत्पन्न वीतराग परमानन्दरूप सुख का, उसी प्रकार अशुद्ध निश्चय से इन्द्रियजनित सुख-दुःखों का, वैसे ही अनुपचरित असद्भूत व्यवहार से सुख-दुःख के साधक इष्ट-अनिष्ट भोजन-पान आदि बहिरङ्ग विषयों का भोक्तृत्व होने से भोक्ता है। ***सदेहमेत्तो*** निश्चय से लोकाकाशप्रमाण असंख्येय प्रदेश प्रमित होने पर भी व्यवहार की अपेक्षा शरीर नामकर्मोदय से उत्पन्न छोटे-बड़े शरीर प्रमाण होने से स्वदेहमात्र है। ***ण हि मुत्तो कम्मसंजुत्तो*** मूर्तिरहित है और असद्भूत व्यवहार से अनादि कर्मबन्धसहित होने के कारण कर्मसंयुक्त है।

कर्मबंधसहितत्वात्कर्मसंयुक्तश्च भवति। इति शब्दार्थनयार्थौ कथितौ। इदानीं मतार्थः कथ्यते; जीवत्वव्याख्याने —

''वच्छक्खरं भवसारित्थसग्गणिरयपियराय।
चुल्लियहंडयिपुणमयउ णव दिट्ठंता जाय॥''

इति दोहकसूत्रकथितनवदृष्टांतैश्चार्वाकमतानुसारिशिष्यापेक्षया जीवसिद्ध्यर्थं अनादिचेतना-गुणव्याख्यानं च तदर्थमेव अथवा सामान्यचेतनाव्याख्यानं सर्वमतसाधारणं ज्ञातव्यं, अभिन्नज्ञानदर्शनो-पयोगव्याख्यानं तु नैयायिकमतानुसारिशिष्यप्रतिबोधनार्थं मोक्षोपदेशकमोक्षसाधकप्रभुत्वव्याख्यानं वीतरागसर्वज्ञप्रणीतं वचनं प्रमाणं भवतीति —

''रयणदीवदिणयरुदहिउ दुद्धुघीवपासाणु।
सुण्णुरुप्पफलिहउ अगणि णव दिट्ठंता जाणु॥''

इति दोहकसूत्रकथितनवदृष्टांतैर्भट्टचार्वाकमताश्रितशिष्यापेक्षया सर्वज्ञसिद्ध्यर्थं, शुद्धाशुद्ध-परिणामकर्तृत्वव्याख्यानं तु नित्याकर्तृत्वैकांतसांख्यमतानुयायिशिष्यसंबोधनार्थं भोक्तृत्वव्याख्यानं कर्ता

इस प्रकार शब्दार्थ, नयार्थ कहे। अब, मतार्थ कहते हैं। जीवत्व के व्याख्यान में —

'वत्स (पुत्र), अक्षर, भव (जन्म), (संज्ञाओं आदि का) सादृश्य, स्वर्ग, नरक, पितर, चूल्हे पर चढ़ाई गई हाँडी और मृतक — इन नौ दृष्टान्तों से (जीव को) जानो।'

इस प्रकार दोहक सूत्र में कहे गए नौ दृष्टान्तों द्वारा चार्वाकमतानुसारी शिष्य की अपेक्षा जीव की सिद्धि के लिए (जीव का) और उसके लिए ही अनादि चेतनागुण का व्याख्यान किया है; अथवा सामान्य चेतना का व्याख्यान सभी मतों के प्रति साधारण जानना चाहिए और अभिन्न ज्ञान-दर्शन उपयोग का व्याख्यान नैयायिकमतानुसारी शिष्य को समझाने के लिए किया है।

मोक्ष के उपदेशक और मोक्ष के साधक प्रभुत्व का व्याख्यान वीतराग सर्वज्ञ प्रणीत वचन प्रमाण है; इस प्रकार - 'रत्न, दीप, सूर्य, चन्द्रमा, घी, सुवर्ण, चाँदी, स्फटिकमणि, अग्नि — नौ दृष्टान्तों से जानो।'॥ योगसार, दोहा ५७॥

इस दोहक सूत्र में कहे नौ दृष्टान्तों द्वारा (प्रभुत्व का कथन) भट्ट-चार्वाकमताश्रित शिष्य की अपेक्षा सर्वज्ञ-सिद्धि के लिए किया है।

शुद्धाशुद्ध परिणामों के कर्तृत्व का व्याख्यान एकान्त से नित्य अकर्तृत्व माननेवाले सांख्यमतानुयायी शिष्य के सम्बोधन-हेतु है। भोक्तृत्व-व्याख्यान, 'कर्ता कर्मफल को नहीं भोगता

कर्मफलं न भुंक्त इति बौद्धमतानुसारिशिष्यप्रतिबोधनार्थं स्वदेहप्रमाणं व्याख्यानं नैयायिकमीमांसक-कपिलमतानुसारिशिष्यसंदेहविनाशार्थं अमूर्तत्वव्याख्यानं भट्टचार्वाकमतानुसारिशिष्यसंबोधनार्थं द्रव्यभावकर्मसंयुक्तत्वव्याख्यानं च सदामुक्तनिराकरणार्थमिति मतार्थो ज्ञातव्यः।

आगमार्थव्याख्यानं पुनर्जीवत्वचेतनादिधर्माणां सम्बन्धित्वेन परमागमे प्रसिद्धमेव। कर्मोपाधि-जनितमिथ्यात्वरागादिरूपसमस्तविभावपरिणामांस्त्यक्त्वा निरुपाधिकेवलज्ञानादिगुणयुक्तशुद्ध-जीवास्तिकाय एव निश्चयनयोपादेयत्वेन भावयितव्य इति भावार्थः। एवं शब्दनयमतागमभावार्था व्याख्यानकाले यथासंभवं सर्वत्र ज्ञातव्याः।

जीवास्तिकायसमुदायपातनिकायां पूर्वं चार्वाकादिमतव्याख्यानं कृतं पुनरपि किमर्थमिति शिष्येण पूर्वपक्षे कृते सति परिहारमाहुः – तत्र वीतरागसर्वज्ञसिद्धे सति व्याख्यानं प्रमाणं प्राप्नोतीति व्याख्यानक्रमज्ञापनार्थं प्रभुताधिकारमुख्यत्वेनाधिकारनवकं सूचितम्। तथा चोक्तं – वक्तृप्रामाण्याद्व-चनप्रामाण्यमिति। अत्र तु सति धर्मिणि धर्माश्चिन्त्यन्त इति वचनाच्चेतनागुणादिविशेषणरूपाणां

है' – ऐसी मान्यतावाले बौद्धमतानुसारी शिष्य के प्रति सम्बोधन-हेतु है। स्वदेह प्रमाण का व्याख्यान नैयायिक, मीमांसक, कपिल मतानुसारी शिष्य के सन्देह को नष्ट करने-हेतु है। अमूर्तत्व का व्याख्यान भट्ट-चार्वाकमतानुसारी शिष्य के सम्बोधनार्थ है; तथा द्रव्य-भाव कर्म-संयुक्तत्व का व्याख्यान सदामुक्त के निराकरणार्थ है। – इस प्रकार मतार्थ जानना चाहिए।

चेतना आदि धर्मों का जीवत्व से सम्बन्ध होने के कारण आगमार्थ का व्याख्यान तो परमागम में प्रसिद्ध ही है।

कर्मोपाधिजनित मिथ्यात्व-रागादिरूप समस्त विभावपरिणामों को छोड़कर निरुपाधि केवलज्ञानादि गुणयुक्त शुद्ध जीवास्तिकाय ही निश्चयनय की अपेक्षा उपादेयरूप से भावनीय है – ऐसा भावार्थ है।

इस प्रकार व्याख्यान के समय यथासम्भव सर्वत्र शब्दार्थ, नयार्थ, मतार्थ, आगमार्थ, भावार्थ जानना चाहिए।

पहले २६ वीं गाथा द्वारा जीवास्तिकाय की समुदाय पातनिका में चार्वाक आदि मतों का व्याख्यान किया था; यहाँ पुनः किसलिए किया है ? शिष्य द्वारा ऐसा पूर्वपक्ष (प्रश्न) किए जाने पर परिहार कहते / करते हैं – वहाँ तो वीतराग-सर्वज्ञरूप से सिद्ध होने पर (वीतराग-सर्वज्ञ हो जाने पर ही) व्याख्यान प्रमाणता को प्राप्त होता है – इस प्रकार व्याख्यान का क्रम बताने के लिए, प्रभुता अधिकार की मुख्यता से नौ अधिकार सूचित किए थे। वैसा ही कहा भी है – 'वक्ता की प्रमाणता से वचन की प्रमाणता होती है।' और यहाँ 'धर्मी होने पर ही धर्मों का विचार

धर्माणामाधारभूते विशेष्यलक्षणे जीवे धर्मिणि सिद्धे सति तेषां चेतनागुणादिविशेषणरूपाणां धर्माणां व्याख्यानं घटत इति ज्ञापनार्थं जीवसिद्धिपूर्वकत्वेन मतांतरनिराकरणसहितमधिकारनवकमुपदिष्टमिति नास्ति दोषः॥ २७॥

एवमधिकारगाथा गता।

अथ मोक्षसाधकत्वप्रभुत्वगुणद्वारेण सर्वज्ञसिद्ध्यर्थं मुक्तावस्थस्यात्मनः केवलज्ञानादिरूपं निरुपाधिस्वरूपं दर्शयति —

कम्ममलविप्पमुक्को उड्ढं लोगस्स अंतमधिगंता।
सो सव्वणाणदरिसी लहइ सुहमणिंदियमणंतं॥ २८॥

कम्ममलविप्पमुक्को द्रव्यकर्मभावकर्मविप्रमुक्तः सन् *उड्ढं लोगस्स अंतमधिगंता* ऊर्ध्वगति-स्वभावत्वाल्लोकस्यांतमधिगम्य प्राप्य परतो धर्मास्तिकायाभावात्तत्रैव लोकाग्रे स्थितः सन् *सो सव्वणाणदरिसी* सर्वविषये ज्ञानदर्शने सर्वज्ञानदर्शने ते विद्येते यस्य स भवति सर्वज्ञानदर्शी। एवंभूतः

किया जाता है।' – ऐसा वचन होने से चेतनगुणादि विशेषणरूप धर्मों के आधारभूत विशेष्य लक्षणमय जीवरूप धर्मी के सिद्ध होने पर, उनके चेतनगुण आदि विशेषणरूप धर्मों का व्याख्यान घटित होता है – ऐसा बताने के लिए जीव-सिद्धि के माध्यम से मतान्तरों के निराकरणसहित नौ अधिकारों का उपदेश दिया गया है – इस प्रकार दोष नहीं है॥ २७॥

इस प्रकार अधिकार गाथा पूर्ण हुई।

अब, मोक्ष-साधकत्व सम्बन्धी प्रभुतागुण के माध्यम से सर्वज्ञ की सिद्धि के लिए, मुक्त अवस्था को प्राप्त आत्मा के केवलज्ञानादिरूप निरुपाधिस्वरूप को दिखाते हैं –

वे कर्ममल से मुक्त, ऊरध लोक के पा अन्त को।
सर्वज्ञदर्शी भोगते सुख, अतीन्द्रिय अनवधि जो॥ २८॥

गाथार्थ - कर्ममल से विप्रमुक्त, ऊर्ध्वलोक के अन्त को प्राप्त वे सर्वज्ञ-सर्वदर्शी आत्मा अनन्त अतीन्द्रिय सुख का अनुभव करते हैं।

टीकार्थ - ***कम्ममलविप्पमुक्को*** द्रव्यकर्म, भावकर्म से विप्रमुक्त होते हुए। ***उड्ढं लोगस्स अंतमधिगंता*** ऊर्ध्वगति स्वभाव होने से लोक के अन्त को प्राप्तकर, आगे धर्मास्तिकाय का अभाव होने से वहाँ लोकाग्र में ही स्थित रहते हुए ***सो सव्वणाणदरसी*** सभी विषय सम्बन्धी ज्ञान-दर्शन, वह सब ज्ञान-दर्शन; वे दोनों जिनके विद्यमान हैं, वे सर्वज्ञानदर्शी हैं। ऐसे होते हुए वे क्या करते हैं? ***लहदि सुहमणिंदियमणंतं*** प्राप्त करते हैं / अनुभव करते हैं।

सन् किं करोति? *लहइ सुहमणिंदियमणंतं* लभते। किं? सुखम्। कथंभूतं? अतीन्द्रियम्। पुनरपि कथंभूतं? अनंतमिति।

किंच पूर्वसूत्रोदितजीवतत्त्वादिनवाधिकारेषु मध्ये कर्मसंयुक्तत्वं विहाय शुद्धजीवत्वशुद्धचेतनाशुद्धोपयोगादयोऽष्टाधिकारा यथासंभवमागमाविरोधेनात्र मुक्तावस्थायामपि योजनीया इति सूत्राभिप्रायः॥ २८॥

अथ यदेव पूर्वोक्तं निरुपाधिज्ञानदर्शनसुखस्वरूपं तस्यैव *जादो सयं* इतिवचनेन पुनरपि समर्थनं करोति —

जादो सयं स चेदा सव्वण्हू सव्वलोयदरिसी य।
पावदि इंदियरहिदं अव्वाबाहं सगममुत्तं॥ २९॥

जादो सयं स चेदा सव्वण्हू सव्वलोयदरिसी य आत्मा हि निश्चयनयेन केवलज्ञानदर्शनसुख-

---

किसका अनुभव करते हैं? सुख का अनुभव करते हैं। वह सुख कैसा है? अतीन्द्रिय है। और भी वह कैसा है? अनन्त है।

विशेष यह है कि पहले गाथा (२७ वीं में) कहे गए जीवतत्त्व आदि नौ अधिकारों में से कर्मसंयुक्तता को छोड़कर शुद्ध जीवत्व, शुद्धचेतना, शुद्धोपयोग आदि आठ अधिकारों को, आगम के अविरोधपूर्वक यथासम्भव मुक्तावस्था में भी लगा लेना चाहिए। – यह सूत्र का अभिप्राय है॥ २८॥

[*आचार्य अमृतचन्द्र ने इस गाथा-टीका में उपर्युक्त आठों अधिकारों को भी घटितकर विश्लेषित किया है तथा सर्वज्ञत्व और सर्वदर्शित्व की प्रगटता के हेतुओं का प्रतिपादनकर, भोक्तृत्व का स्पष्टीकरण अस्ति-नास्ति शैली से किया है, जो मूलतया पठनीय है।*]

अब, जो पूर्वोक्त निरुपाधि ज्ञान-दर्शन-सुख स्वरूप है, उसका ही ***जादोसयं*** इस प्रकार के वचन द्वारा पुनः समर्थन करते हैं –

वह आत्मा सर्वज्ञ सबदर्शी, स्वयं होता हुआ।
पाता अतीन्द्रिय मूर्त बिन, व्याबाध बिन सुख स्वयं का॥ २९॥

गाथार्थ - वह चेतयिता, स्वयं सर्वज्ञ और सर्वलोकदर्शी होता हुआ, अपने अतीन्द्रिय, अव्याबाध, अमूर्त सुख को प्राप्त करता है।

टीकार्थ - ***जादो सयं स चेदा सव्वण्हू सव्वलोयदरसी य*** वास्तव में तो आत्मा

स्वभावस्तावत् इत्थंभूतोऽपि संसारावस्थायां कर्मावृतः सन् क्रमकरणव्यवधानजनितेन क्षायोपशमिक-ज्ञानेन किमपि किमपि जानाति तथाभूतदर्शनेन किमपि किमपि पश्यति तथा चेन्द्रियजनितं बाधासहितं पराधीनं मूर्तसुखं चानुभवति स एव चेतयितात्मा निश्चयनयेन स्वयमेव कालादिलब्धिवशात्सर्वज्ञो जातः सर्वदर्शी च जातः। एवं जातः सन् किं करोति ? *पावदि इंदियरहिदं अव्वाबाहं सगममुत्तं* प्राप्नोति लभते। किं ? सुखमित्यध्याहारः। कथंभूतं सुखं ? इन्द्रियरहितम्। पुनरपि कथंभूतं ? बाधारहितम्। पुनरपि किं विशिष्टं ? स्वकमात्मोत्थम्। पुनश्च किंरूपं ? मूर्तेन्द्रियनिरपेक्षत्वादमूर्तं च। अत्र स्वयं जातमिति वचनेन पूर्वोक्तमेव निरुपाधित्वं समर्थितम्। तथा च स्वयमेव सर्वज्ञो जातः सर्वदर्शी च जातो निश्चयनयेनेति पूर्वोक्तमेव सर्वज्ञत्वं सर्वदर्शित्वं च समर्थितमिति।

अथ भट्टचार्वाकमतानुसारी कश्चिदाह – नास्ति सर्वज्ञोऽनुपलब्धेः खरविषाणवत्। तत्र प्रत्युत्तरं दीयते – कुत्र सर्वज्ञो नास्त्यत्र देशे तथा चात्रकाले किं जगत्त्रये कालत्रये वा ? यद्यत्र देशे काले नास्तीति भण्यते, तदा सम्मतमेव। अथ जगत्त्रये कालत्रयेऽपि नास्ति तत्कथं ज्ञातं भवता ? जगत्त्रय

निश्चयनय से केवलज्ञान-दर्शन-सुख स्वभावमय है। ऐसा होने पर भी संसार अवस्था में कर्म से आवृत (घिरा) हुआ, क्रम-करण-व्यवधान से उत्पन्न क्षायोपशमिकज्ञान द्वारा कुछ-कुछ जानता है; उस प्रकार के दर्शन से कुछ-कुछ देखता है / सामान्य अवलोकन करता है तथा इन्द्रियजनित, बाधासहित, पराधीन, मूर्त सुख का अनुभव करता है। वही चेतयिता आत्मा निश्चयनय से स्वयं ही कालादि लब्धि के वश से सर्वज्ञ होता है, सर्वदर्शी होता है। ऐसा होता हुआ वह क्या करता है ? ***पावदि इंदियरहिदं अव्वाबाहं सगममुत्तं*** प्राप्त करता है। क्या प्राप्त करता है ? सुख प्राप्त करता है। यहाँ सुख शब्द अध्याहार है (पूर्व गाथा से लिया गया है)। वह सुख कैसा है ? इन्द्रियरहित है। वह और किस विशेषतावाला है ? स्वयं / आत्मा से उत्पन्न है। और किसरूप है ? मूर्त इन्द्रियों से निरपेक्ष होने के कारण अमूर्त है। यहाँ 'स्वयं से उत्पन्न है' – इस वचन द्वारा पूर्वोक्त निरुपाधित्व का ही समर्थन किया है। उसी प्रकार निश्चयनय से स्वयं ही सर्वज्ञ-सर्वदर्शी हुए – इससे भी पूर्वोक्त सर्वज्ञत्व और सर्वदर्शित्व का ही समर्थन किया गया है।

यहाँ कोई भट्ट-चार्वाकमतानुसारी कहता है - गधे के सींग के समान, उपलब्ध न होने के कारण सर्वज्ञ नहीं हैं ?

उसके प्रति उत्तर देते हैं – सर्वज्ञ कहाँ नहीं हैं ? इस देश और इस काल में नहीं हैं कि तीन लोक और तीन काल में नहीं हैं ? यदि इस देश-काल में नहीं हैं – ऐसा कहते हो तो हमें स्वीकृत ही है; और यदि तीन लोक, तीन काल में नहीं हैं – (ऐसा कहते हो तो) आपने वह कैसे जाना ? यदि आपने तीन लोक और तीन काल को सर्वज्ञरहित जान लिया तो आप ही सर्वज्ञ

कालत्रयं सर्वज्ञरहितं ज्ञातं चेद्भवता तर्हि भवानेव सर्वज्ञः। कुत इति चेत्? योऽसौ जगत्त्रयं कालत्रयं च जानाति स एव सर्वज्ञः यदि पुनः सर्वज्ञरहितं जगत्त्रयं कालत्रयं न ज्ञातं भवता तर्हि जगत्त्रये कालत्रयेऽपि सर्वज्ञो नास्तीति कथं निषेधः क्रियते त्वया? अथ मतं किमत्रोदाहरणं – यथा कश्चिद्देवदत्तो घटरहितभूतलं चक्षुषा दृष्ट्वा पश्चाद्ब्रूते अत्र भूतले घटो नास्तीति युक्तमेव, अन्यःकोऽप्यंधः किमेवं ब्रूते अत्र भूतले घटो नास्त्यपितु नैवं; तथा योऽसौ जगत्त्रयं कालत्रयं सर्वज्ञरहितं प्रत्यक्षेण जानाति, स एव सर्वज्ञनिषेधे समर्थो न चान्योऽन्ध इव यस्तु जगत्त्रयं कालत्रयं जानाति स सर्वज्ञनिषेधं कथमपि न करोति। कस्मात्? जगत्त्रयकालत्रयविषयपरिज्ञानसहितत्वेन स्वयमेव सर्वज्ञत्वादिति।

किंचानुपलब्धेरिति हेतुवचनं तदयुक्तम्। कथमिति चेत्? किं भवतां सर्वज्ञानुपलब्धिरुत जगत्त्रयकालत्रयवर्तिपुरुषाणां वा, यदि भवतामनुपलब्धिरेतावता सर्वज्ञाभावो न भवति। कथमिति चेत्? परमाण्वादिसूक्ष्मपदार्थाः परचितोवृत्तयश्च भवद्भिर्यदि न ज्ञायते तर्हि किं न सन्ति? अथ जगत्त्रय-

---

हैं। ऐसा जानने से हम सर्वज्ञ कैसे हो गए? यदि आपका ऐसा प्रश्न हो तो कहते हैं – जो तीन लोक, तीन काल को जानता है, वह ही सर्वज्ञ है; (अतः आप ही सर्वज्ञ हो गए) और यदि सर्वज्ञ से रहित तीन लोक, तीन काल आपके द्वारा ज्ञात नहीं हुआ है, तब फिर तीन लोक, तीन काल में भी सर्वज्ञ नहीं हैं – ऐसा निषेध आप कैसे करते हैं?

इसके लिए यहाँ उदाहरण क्या है? (कहते हैं) – जैसे कोई देवदत्त घटरहित भूतल / जमीन को आँखों से देखकर, बाद में कहता है कि भूतल पर घट नहीं है – ऐसा उचित ही है। कोई दूसरा अन्धा यदि इसी प्रकार कुछ बोले कि इस भूतल पर घट नहीं है, तो यह तो उचित नहीं है; उसी प्रकार जो तीन लोक, तीन काल को सर्वज्ञ से रहित प्रत्यक्ष जानता है, वह ही सर्वज्ञ का निषेध करने में समर्थ है; अन्धे के समान कोई दूसरा नहीं है। जो तीन लोक, तीन काल को जानता है, वह सर्वज्ञ का निषेध किसी भी रूप में नहीं करता। वह निषेध क्यों नहीं करता है? तीन लोक, तीन काल के परिज्ञान से सहित हो जाने के कारण स्वयं ही सर्वज्ञ हो जाने से, वह उसका निषेध नहीं करता है।

दूसरी बात यह है कि 'अनुपलब्ध होने से' यह (जो) हेतु का वचन है, वह भी अयुक्त / अनुचित है। वह अनुचित कैसे है? क्या आपको सर्वज्ञ की अनुपलब्धि है अथवा तीन लोक, तीन कालवर्ती पुरुषों को अनुपलब्धि है? यदि आपको अनुपलब्धि है, तो इतने मात्र से सर्वज्ञ का अभाव नहीं हो जाता। इतने मात्र से कैसे नहीं हो जाता? परमाणु आदि सूक्ष्म पदार्थ और दूसरे की मनोगत वृत्तियों को यदि आप नहीं जानते हैं, तो क्या वे नहीं हैं?

यदि तीन लोक, तीन कालवर्ती पुरुषों को सर्वज्ञ की अनुपलब्धि होने से वे नहीं हैं –

कालत्रयवर्तिपुरुषाणां सर्वज्ञानुपलब्धेस्तत्कथं ज्ञातं भवद्भिरिति पूर्वमेवं विचारितं तिष्ठति इति हेतुदूषणम्। यदप्युक्तं खरविषाणवदिति दृष्टांतवचनम्। तदप्ययुक्तम्। कथमिति चेत्? खरे विषाणं नास्ति, न सर्वत्र, गवादौ प्रत्यक्षेण दृश्यते; तथा सर्वज्ञेऽपि विवक्षितदेशकाले नास्ति न च सर्वत्र इति संक्षेपेण हेतुदूषणं दृष्टांतदूषणं च ज्ञातव्यम्।

अथ मतं सर्वज्ञाभावे दूषणं दत्तं भवद्भिस्तर्हि सर्वज्ञसद्भावे किं प्रमाणं? तत्र प्रमाणं कथ्यते- अस्ति सर्वज्ञः पूर्वोक्तप्रकारेण बाधकप्रमाणाभावात् स्वसंवेद्यसुखदुःखादिवदिति अथवा द्वितीयमनुमान-प्रमाणं कथ्यते। तद्यथा – सूक्ष्माव्यवहितदेशांतरितकालांतरितस्वभावांतरितार्था धर्मिणः कस्यापि पुरुष-विशेषस्य प्रत्यक्षा भवंतीति साध्यो धर्मः। कस्माद्धेतोः? अनुमानविषयत्वात्। यद्यदनुमानविषयं तत्तत्कस्यापि प्रत्यक्षं दृष्टं यथाग्न्यादि, अनुमानविषयाश्चैते तस्मात्कस्यापि प्रत्यक्षा भवंतीति संक्षेपेण सर्वज्ञसद्भावे प्रमाणं ज्ञातव्यम्। विस्तरेणासिद्धविरुद्धानैकान्तिकाकिंचित्करहेतुदूषणसमर्थनमन्यत्र सर्वज्ञसिद्धौ भणितमास्ते; अत्र पुनरध्यात्मग्रंथत्वान्नोच्यते।

ऐसा कहते हैं तो वह आपको कैसे ज्ञात हुआ? इस पर विचार पहले ही कर लिया गया है। - इस प्रकार अनुपलब्धिरूप हेतु दूषित है तथा जो आपने 'खरविषाण के समान' - ऐसा दृष्टान्त वचन कहा, वह भी उचित नहीं है। वह उचित कैसे नहीं है?

उत्तर - खर (गधा) के सिर पर विषाण (सींग) नहीं हैं; परन्तु सर्वत्र विषाण नहीं हैं - ऐसा तो नहीं है। गाय आदि के सिर पर प्रत्यक्ष दिखाई देते हैं; उसी प्रकार सर्वज्ञ भी विवक्षित देश -काल में नहीं हैं; परन्तु सर्वत्र नहीं हैं, ऐसा तो नहीं है - इस प्रकार संक्षेप से हेतुदूषण और दृष्टान्तदूषण जानना चाहिए।

अब, यदि आपका यह कहना हो कि सर्वज्ञ के अभाव में तो आपने दूषण दे दिए, तब फिर सर्वज्ञ के सद्भाव में प्रमाण क्या है? वहाँ प्रमाण कहते हैं - अपने अनुभवगम्य सुख-दुःखादि के समान पूर्वोक्त प्रकार से बाधक प्रमाण का अभाव होने के कारण सर्वज्ञ हैं अथवा दूसरा अनुमान प्रमाण कहते हैं; वह इस प्रकार - सूक्ष्म, अव्यवहित, देशान्तरित, कालान्तरित, स्वभावान्तरित पदार्थ किसी पुरुष विशेषरूप धर्मी के प्रत्यक्ष हैं। यहाँ 'प्रत्यक्ष हैं' - यह साध्य या धर्म है। ये किस कारण प्रत्यक्ष हैं? अनुमान के विषय होने से ये प्रत्यक्ष हैं। जो-जो अनुमान का विषय होता है, वह-वह किसी को प्रत्यक्ष भी दिखाई देता है। जैसे अग्नि आदि अनुमान के विषय हैं, इस कारण ये किसी के प्रत्यक्ष भी होते हैं। - इस प्रकार संक्षेप से सर्वज्ञ के सद्भाव में प्रमाण जानना चाहिए। विस्तार से असिद्ध, विरुद्ध, अनैकान्तिक, अकिञ्चित्कर हेत्वाभासों का निषेध और सही हेतु के समर्थन से अन्यत्र (प्रमेय-कमल-मार्तण्ड आदि ग्रन्थों में) सर्वज्ञ-सिद्धि के प्रकरण में कहा ही है; यहाँ यह अध्यात्म ग्रन्थ होने से उसे नहीं कहा है।

इदमेव वीतरागसर्वज्ञस्वरूपं समस्तरागादिविभावत्यागेन निरंतरमुपादेयत्वेन भावनीयमिति भावार्थः॥ २९॥

एवं प्रभुत्वव्याख्यानमुख्यत्वेन गाथाद्वयं गतम्।

अथ जीवत्वगुणव्याख्यानं क्रियते -

पाणेहिं चदुहिं जीवदि जीविस्सदि जो हु जीविदो पुव्वं।
सो जीवो पाणा पुण बलमिंदियमाउ उस्सासो॥ ३०॥

***पाणेहिं* इत्यादि पदखण्डनरूपेण व्याख्यानं क्रियते – *पाणेहिं चदुहिं जीवदि* यद्यपि शुद्धनिश्चयनयेन शुद्धचैतन्यादिप्राणैर्जीवति तथाप्यनुपचरितासद्भूतव्यवहारेण द्रव्यरूपैस्तथाशुद्ध-निश्चयनयेन भावरूपैश्चतुर्भिः प्राणैः संसारावस्थायां वर्तमानकाले जीवति *जीविस्सदि* भाविकाले जीविष्यति *जो हु* यो हि स्फुटं *जीविदो पुव्वं* जीवितः पूर्वकाले *सो जीवो* सः कालत्रयेऽपि प्राणचतुष्टय-सहितो जीवो भवति। *पाणा पुण बलमिंदियमाउउस्सासो* ते पूर्वोक्तद्रव्यभावप्राणाः पुनरभेदेन बलेन्द्रिया-युरुच्छ्वासलक्षणा इति।**

यह ही वीतराग-सर्वज्ञस्वरूप समस्त रागादि विभावों के त्यागपूर्वक निरन्तर उपादेयरूप से भावनीय है - ऐसा भावार्थ है॥ २९॥

इस प्रकार प्रभुत्व व्याख्यान की मुख्यता से दो गाथाएँ पूर्ण हुईं।

अब, जीवत्वगुण का व्याख्यान करते हैं -

जो चार प्राणों से जिया था, जी रहा है जिएगा।
वह जीव है, बल प्राण इन्द्रिय, आयु श्वास कहे तथा॥ ३०॥

गाथार्थ - जो चार प्राणों से जीता है, जिएगा और पहले जीता था, वह जीव है तथा प्राण बल, इन्द्रिय, आयु और श्वासोच्छ्वास हैं।

टीकार्थ - ***पाणेहिं*** इत्यादि पद-खण्डनारूप से व्याख्यान करते हैं – ***पाणेहिं चदुहिं जीवदि*** यद्यपि शुद्ध निश्चय से शुद्ध चैतन्य आदि प्राणों से जीता है; तथापि अनुपचरित असद्भूत व्यवहार से द्रव्यरूप तथा अशुद्ध निश्चयनय से भावरूप चार प्राणों द्वारा संसार अवस्था में वर्तमान काल में जीता है; ***जीविस्सदि*** भविष्यकाल में जिएगा। ***जो हु*** जो स्पष्टरूप से ***जीविदो पुव्वं*** पूर्वकाल में जीता था, ***सो जीवो*** वह तीनों काल में भी चार प्राण से सहित जीव है। ***पाणा पुण बलमिंदियमाउउस्सासो*** वे पूर्वोक्त द्रव्य-भावप्राण भी अभेद से बल, इन्द्रिय, आयु और उच्छ्वास लक्षणरूप हैं।

अत्र सूत्रे मनोवाक्कायनिरोधेन पञ्चेन्द्रियविषयव्यावर्तनबलेन च शुद्धचैतन्यादिशुद्धप्राणसहितः शुद्धजीवास्तिकाय एवोपादेयरूपेण ध्यातव्य इति भावार्थः॥ ३०॥

अथागुरुलघुत्वमसंख्यातप्रदेशत्वं व्यापकत्वाव्यापकत्वं मुक्तामुक्तत्वं च प्रतिपादयति —

अगुरुगलहुगाणंता तेहिं अणंतेहिं परिणदा सव्वे।
देसेहिं असंखादा सियलोगं सव्वमावण्णा॥ ३१॥

केचिच्च अणावण्णा मिच्छादंसणकसायजोगजुदा।
विजुदा य तेहिं बहुगा सिद्धा संसारिणो जीवा॥ ३२॥ जुम्मम्

***अगुरुगलहुगाणंता* प्रत्येक षट्स्थानपतितहानिवृद्धिभिरनंताविभागपरिच्छेदैः सहिता अगुरु-लघवो गुणा अनंता भवन्ति। *तेहिं अणंतेहिं परिणदा सव्वे* तैः पूर्वोक्तगुणैरनंतैः परिणताः सर्वे। सर्वे के ? जीवा इति सम्बन्धः। *देसेहिं असंखादा* लोकाकाशप्रमिताखण्डप्रदेशैः सहितत्वादसंख्येयप्रदेशाः**

इस सूत्र में मन, वचन, काय के निरोधपूर्वक पञ्चेन्द्रिय-विषयों से व्यावर्तन के बल द्वारा शुद्ध चैतन्यादि शुद्धप्राणसहित शुद्ध जीवास्तिकाय ही उपादेयरूप से ध्यान करने-योग्य है — यह भावार्थ है॥ ३०॥

अब, अगुरुलघुत्व, असंख्यात-प्रदेशत्व, व्यापकत्व, अव्यापकत्व, मुक्तत्व और अमुक्तत्व का प्रतिपादन करते हैं —

अनंत हैं अगुरुलघु, उनसे सभी हैं परिणमित।
असंख्य हैं प्रदेश से, कुछ लोक व्यापी कथंचित्॥ ३१॥

अव्यापि हैं कुछ, सहित मिथ्यादर्श योग कषाय से।
संसारि हैं वे, सिद्ध आतम रहित जो इन सभी से॥ ३२॥

गाथार्थ - अगुरुलघुक अनन्त हैं, उन अनन्तों द्वारा सभी परिणमित हैं, वे प्रदेशों की अपेक्षा असंख्यात हैं। उनमें से कुछ तो कथञ्चित् सम्पूर्ण लोक को प्राप्त हैं और कुछ अप्राप्त हैं। अनेक जीव मिथ्यादर्शन, कषाय से सहित संसारी हैं तथा अनेक उनसे रहित सिद्ध हैं।

टीकार्थ - ***अगुरुगलहुगाणंता*** प्रत्येक षट्स्थानपतित हानि-वृद्धिरूप अनन्त अविभाग प्रतिच्छेदों से सहित अगुरुलघु गुण अनन्त हैं। ***तेहिं अणंतेहिं परिणदा सव्वे*** उन पूर्वोक्त अनन्त गुणों द्वारा सभी परिणमित हैं। सभी कौन हैं ? सभी से — वे सभी जीव इस प्रकार सम्बन्ध है। ***देसेहिं असंखादा*** लोकाकाशप्रमाण अखण्ड प्रदेशों से सहित होने के कारण वे असंख्येय

सिय लोगं सव्वमावण्णा स्यात्कथंचिल्लोकपूरणावस्थाप्रकारेण लोकव्यापकाः अथवा सूक्ष्मैकेन्द्रिया-पेक्षया लोकव्यापकाः। तथाचोक्तं —

''आधारे थूलाओ सुहुमेहिं णिरंतरो लोगो।''

पुनरपि कथंभूतास्ते जीवाः ? *केचिच्च अणावण्णा* केचिच्च केचन पुनर्लोकपूरणावस्थारहिता अथवा बादरैकेन्द्रिया विकलेन्द्रियादयश्चाव्यापकाः। पुनरपि किंविशिष्टाः ? *मिच्छादंसणकसायजोग-जुदा* रागादिरहितपरमानंदैकस्वभावशुद्धजीवास्तिकायाद्विलक्षणैर्मिथ्यादर्शनकषाययोगैर्यथासंभवं युक्ताः। न केवलं युक्ताः *विजुदा य तेहिं* तैरेव मिथ्यादर्शनकषाययोगैर्वियुक्ता रहिताश्च। उभयेऽपि कति संख्योपेताः ? *बहुगा* बहवोऽनंता। पुनरपि कथंभूताः ? *सिद्धा संसारिणो* ये मिथ्यादर्शनकषाययोग-विमुक्ता रहितास्ते सिद्धा ये च युक्तास्ते संसारिण इति।

अत्र जीविताशारूपरागादिविकल्पत्यागेन सिद्धजीवसदृशः परमाह्लादरूपसुखरसास्वाद-परिणतनिजशुद्धजीवास्तिकाय एवोपादेयमिति भावार्थः॥ ३१-३२॥

एवं पूर्वोक्त *वच्छरक्ख* इत्यादि दृष्टांतनवकेन चार्वाकमतानुसारिशिष्यसंबोधनार्थं जीवसिद्धि-

---

प्रदेशयुक्त हैं। ***सियलोगं सव्वमावण्णा*** स्यात् / कथञ्चित् लोकपूरण अवस्था की अपेक्षा लोक -व्यापक हैं; अथवा सूक्ष्म एकेन्द्रिय जीवों की अपेक्षा लोक व्यापक हैं; वैसा ही कहा भी है —

'आधार में स्थूल और सूक्ष्म जीवों से लोक निरन्तर भरा है।'

वे जीव और कैसे हैं ? ***केचित्तु अणावण्णा*** कुछ तो लोकपूरण अवस्था से रहित अथवा बादर एकेन्द्रिय, विकलेन्द्रिय आदि अव्यापक हैं। वे जीव और किस विशेषतावाले हैं ? ***मिच्छादंसणकसायजोगजुदा*** रागादि रहित, परमानन्द एक स्वभावी, शुद्ध जीवास्तिकाय से विलक्षण मिथ्यादर्शन, कषाय, योग से यथासम्भव युक्त हैं। मात्र युक्त ही नहीं हैं; अपितु कुछ ***विजुदा य तेहिं*** उन्हीं मिथ्यादर्शन, कषाय, योग से रहित हैं। दोनों ही कितनी संख्यावाले हैं ? ***बहुगा*** बहुत, अनन्त संख्यावाले हैं। वे और कैसे हैं ? ***सिद्धा संसारिणो*** जो मिथ्यादर्शन, कषाय, योग से विमुक्त / रहित हैं, वे सिद्ध हैं और जो उनसे सहित हैं, वे संसारी हैं।

यहाँ जीवित (जीवन की) आशारूप रागादि विकल्पों के त्याग द्वारा सिद्ध जीवों के समान परम आह्लादरूप सुखरसास्वाद से परिणत / तन्मय निज शुद्ध जीवास्तिकाय ही उपादेय है — यह भावार्थ है॥ ३१-३२॥

इस प्रकार पूर्वोक्त ***वच्छरक्खं*** इत्यादि नौ दृष्टान्तों द्वारा चार्वाक मतानुसारी शिष्य के सम्बोधन-हेतु जीव-सिद्धि की मुख्यता से तीन गाथाएँ पूर्ण हुईं।

मुख्यत्वेन गाथात्रयं गतम्।

अत्र देहमात्रविषये दृष्टांतं कथयामीत्यभिप्रायं मनसि धृत्वा सूत्रमिदं प्रतिपादयति। एवमग्रेऽपि विवक्षितसूत्रार्थं मनसि संप्रधार्याथवा सूत्रस्याग्रे सूत्रमिदमुचितं भवत्येवं निश्चत्य सूत्रमिदं निरूपयतीति पातनिका लक्षणं यथासंभवं सर्वत्र ज्ञातव्यं —

जह पउमरायरयणं खित्तं खीरे पहासयदि खीरं।
तह देही देहत्थो सदेहमेत्तं पभासयदि॥ ३३॥

जह पउमरायरयणं यथा पद्मरागरत्नं कर्तृ। कथंभूतं? *खित्त* क्षिप्तम्। क्व? *खीरे* क्षीरे दुग्धे। क्षीरे किं करोति? *पहासयदि खीरं* प्रकाशयति तत्क्षीरं *तह देही देहत्थो* तथा देही संसारी देहस्थः सन् *सदेहमेत्तं पहासयदि* स्वदेहमात्रं प्रकाशयतीति।

तद्यथा — अत्र पद्मरागशब्देन पद्मरागरत्नप्रभा गृह्यते न च रत्नम्। यथा पद्मरागप्रभासमूहः क्षीरे क्षिप्तस्तत्क्षीरं व्याप्नोति तथा जीवोऽपि स्वदेहस्थो वर्तमानकाले तं देहं व्याप्नोति; अथवा यथा

अब, देहमात्र (परिमाणत्व) के विषय में दृष्टान्त कहता हूँ; इस अभिप्राय को मन में धारणकर यह गाथा प्रतिपादित करते हैं; इसी प्रकार आगे भी विवक्षित सूत्र के अर्थ / प्रयोजन को मन में धारणकर अथवा इस सूत्र के आगे यही सूत्र उचित है — ऐसा निश्चय कर यह गाथा निरूपित करते हैं; इस प्रकार पातनिका का लक्षण यथासम्भव सर्वत्र जानना चाहिए —

ज्यों दूध में स्थित पद्मराग, मणि प्रकाशे दूध को।
त्यों देह में स्थित देही, देह प्रमाणता को प्राप्त हो॥ ३३॥

गाथार्थ - जैसे दूध में पड़ा हुआ पद्मराग रत्न दूध को प्रकाशित करता है; उसी प्रकार देह में स्थित देही / संसारी जीव स्वदेहमात्र प्रकाशित होता है।

टीकार्थ - ***जहपउमरायरयणं*** जैसे कर्तारूप पद्मराग रत्न। वह कैसा है? ***खित्तं*** पड़ा है। कहाँ पड़ा है? ***खीरे*** क्षीर / दूध में पड़ा है। दूध में पड़ा हुआ वह क्या करता है? ***पभासयदि खीरं*** उस दूध को प्रकाशित करता है; ***तह देही देहत्थो*** उसी प्रकार देही संसारी जीव, देहस्थ होता हुआ ***सदेहमेत्तं पभासयदि*** अपने देहमात्र प्रकाशित होता है।

वह इस प्रकार — यहाँ 'पद्मराग' शब्द से पद्मराग रत्न की प्रभा ग्रहण करना; मात्र पद्मराग रत्न ग्रहण नहीं करना है। जैसे दूध में पड़ा हुआ पद्मराग-प्रभा का समूह, उस दूध को अपनी प्रभा से व्याप्त करता है; उसी प्रकार स्वदेह में स्थित जीव भी वर्तमान काल में उस देह

विशिष्टाग्निसंयोगवशात्क्षीरे वर्धमाने सति पद्मरागप्रभासमूहो वर्द्धते हीयमाने च हीयते इति तथा विशिष्टाहारवशाद्देहे वर्धमाने सति विस्तरन्ति जीवप्रदेशा हीयमाने च संकोचं गच्छन्ति; अथवा स एव प्रभासमूहोऽन्यत्र बहुक्षीरे निक्षिप्तो बहुक्षीरं व्याप्नोति स्तोके स्तोकं व्याप्नोति तथा जीवोऽपि जगत्त्रय-कालत्रयमध्यवर्तिसमस्तद्रव्यगुणपर्यायैकसमयप्रकाशेन समर्थविशुद्धज्ञानदर्शनस्वभावचैतन्यचमत्कार-मात्राच्छुद्धजीवास्तिकायाद्विलक्षणैर्मिथ्यात्वरागादिविकल्पैर्यदुपार्जितं शरीरनामकर्म तदुदयजनित-विस्तारोपसंहाराधीनत्वेन सर्वोत्कृष्टावगाहपरिणतः सन् सहस्रयोजनप्रमाणं महामत्स्यशरीरं व्याप्नोति जघन्यावगाहेन परिणतः पुनरुत्सेधघनांगुलासंख्येयभागप्रमितं लब्ध्यपूर्णसूक्ष्मनिगोतशरीरं व्याप्नोति, मध्यमावगाहेन मध्यमशरीराणि च व्याप्नोतीति भावार्थः॥ ३३॥

अत्र मिथ्यात्वशब्देन दर्शनमोहो रागादिशब्देन चारित्रमोह इति सर्वत्र ज्ञातव्यम्।

अथ वर्तमानशरीरवत् पूर्वापरशरीरसंतानेऽपि तस्यैव जीवस्यास्तित्वं देहात्पृथक्त्वं भवांतरगमन-कारणं च कथयति —

को व्याप्त करता है। अथवा जैसे विशिष्ट अग्नि के संयोगवश दूध बढ़ने पर (दूध में उफान आने पर) पद्मराग-प्रभा का समूह भी बढ़ जाता है तथा कम होने पर कम हो जाता है; उसी प्रकार विशिष्ट आहार के माध्यम से शरीर बढ़ने पर जीवप्रदेश भी विस्तृत हो जाते हैं तथा कम होने पर वे भी संकुचित हो जाते हैं; अथवा दूसरे अधिक दूध में पड़ा वही प्रभासमूह अधिक दूध को व्याप्त करता है, कम में पड़ा हुआ कम को व्याप्त करता है; उसी प्रकार जीव भी तीन लोक, तीन काल सम्बन्धी समस्त द्रव्य-गुण-पर्यायों को एक समय में प्रकाशित करने में समर्थ विशुद्ध ज्ञान-दर्शन स्वभावी चैतन्यचमत्कारमात्र शुद्ध जीवास्तिकाय से विलक्षण, मिथ्यात्व-रागादि विकल्पों से उपार्जित जो शरीर नामकर्म, उसके उदय से उत्पन्न विस्तार-उपसंहार / सङ्कोच के अधीन होने से सर्वोत्कृष्ट अवगाहरूप से परिणमित होता हुआ, हजार योजन प्रमाण महामत्स्य के शरीर को व्याप्त करता है; जघन्य अवगाहना से परिणमित होता हुआ उत्सेध घनाङ्गुल के असंख्येयभाग प्रमाण लब्ध्यपर्याप्तक सूक्ष्म निगोदशरीर को व्याप्त करता है तथा मध्यम अवगाहना से मध्यम शरीरों को व्याप्त करता है – यह भावार्थ है॥ ३३॥

यहाँ मिथ्यात्व शब्द से दर्शनमोह; रागादि शब्द से चारित्रमोह ग्रहण करना तथा सर्वत्र ऐसा ही जानना चाहिए।

अब, वर्तमान शरीर के समान पूर्वापर शरीर की परम्परा होने पर भी उसी जीव का अस्तित्व, देह से पृथक्त्व और भवान्तर (दूसरे भव में) गमन का कारण कहते हैं –

सव्वत्थ अत्थि जीवो ण य एक्को एक्कगो य एक्कट्ठो।
अज्झवसाणविसिट्ठो चिट्ठदि मलिणो रजमलेहिं॥ ३४॥

सव्वत्थ अत्थि जीवो सर्वत्र पूर्वापरभवशरीरसंताने य एव वर्तमानशरीरे जीवः स एवास्ति न चान्यो नवतर उत्पद्यते चार्वाकमतवत् ***ण य एक्को*** निश्चयनयेन देहेन सह न चैकस्तन्मयः ***एक्कगो य*** अनुपचरितासद्भूतव्यवहारनयेनैकोऽपि भवति। कस्मादिति चेत्? ***एक्कट्ठो*** क्षीरनीरवदेकार्थोऽभिन्नो यस्मात् अथवा सर्वत्र देहमध्ये जीवोऽस्ति न चैकदेशे अथवा सूक्ष्मैकेन्द्रियापेक्षया सर्वत्र लोकमध्ये जीवसमूहोऽस्ति। स च यद्यपि केवलज्ञानादिगुणसादृश्येनैकत्वं लभते तथापि नानावर्णवस्त्रवेष्टितषोडश-वर्णिकासुवर्णराशिवत्स्वकीयस्वकीयलोकमात्रासंख्येयप्रदेशैर्भिन्न इति। भवांतरगमनकारणं कथ्यते – ***अज्झवसाणविसिट्ठो चिट्ठदि मलिणो रजमलेहिं*** अध्यवसानविशिष्टः संश्चेष्टते मलिनो रजमलैः।

है सर्वदा ही जीव हो, एकत्र इक तन में रहे।
पर भिन्न अध्यवसान युत, रजमलमलिन भ्रमता रहे॥ ३४॥

गाथार्थ - जीव सर्वत्र (सभी क्रमवर्ती शरीरों में) है तथा एक शरीर में (क्षीर-नीरवत्) एकरूप में रहता है; तथापि उसके साथ एकमेक नहीं है। अध्यवसान विशिष्ट वर्तता हुआ, रजमल (कर्ममल) द्वारा मलिन होने से वह भ्रमण करता है।

टीकार्थ - ***सव्वत्थ अत्थि जीवो*** सर्वत्र पूर्वापर भवों की शरीर-सन्तति में तथा वर्तमान शरीर में जो जीव है, वह वही है; चार्वाकमत के समान दूसरा कोई नया उत्पन्न नहीं होता है। ***ण य एक्को*** निश्चयनय से शरीर के साथ एकमेक, तन्मय नहीं है; ***एक्कगो य*** तथापि अनुपचरित असद्भूत व्यवहारनय से एकमेक भी है। इस नय से वह एक कैसे है? ***एक्कट्ठो*** दूध-पानी के समान एक अभिन्न पदार्थरूप दिखाई देने से; अथवा देह में सर्वत्र जीव है, एकदेश में नहीं है; अथवा सूक्ष्म एकेन्द्रिय की अपेक्षा लोक में सर्वत्र जीवसमूह है; और वह यद्यपि केवल ज्ञानादि गुणों की समानता होने से एकत्व को प्राप्त है; तथापि विविध वर्णों के वस्त्रों से वेष्टित सोलह वर्णिका सुवर्ण-राशि के समान अपने-अपने लोकमात्र असंख्येय प्रदेशों से भिन्न है।

दूसरे भव में गमन का कारण कहते हैं – ***अज्झवसाणविसिट्ठो चिट्ठदि मलिणो रजमलेहिं*** अध्यवसान से विशिष्ट / युक्त होता हुआ, रजमल से मलिन होने के कारण चेष्टा करता है। वह इस प्रकार – यद्यपि जीव शुद्ध निश्चय से केवल ज्ञान-दर्शन स्वभावी है; तथापि अनादि कर्मबन्ध के वश मिथ्यात्व-रागादि अध्यवसानरूप भावकर्मों से और उन्हें उत्पन्न करनेवाले द्रव्यकर्म-मल से घिरा हुआ शरीर ग्रहण करने के लिए चेष्टा करता है।

तथाहि – यद्यपि शुद्धनिश्चयेन केवलज्ञानदर्शनस्वभावस्तथाप्यनादिकर्मबंधवशान्मिथ्यात्व-रागाद्यध्यवसानरूपभावकर्मभिस्तज्जनकद्रव्यकर्ममलैश्च वेष्टितः सन् भवांतरं प्रति शरीरग्रहणार्थं चेष्टते वर्तत इति। अत्र य एव देहाद्भिन्नोऽनंतज्ञानादिगुणः शुद्धात्मा भणितः स एव शुभाशुभसंकल्पविकल्प-परिहारकाले सर्वत्र प्रकारेणोपादेयो भवतीत्यभिप्रायः॥ ३४॥

एवं मीमांसकनैयायिकसांख्यमतानुसारिशिष्यसंशयविनाशार्थं –

वेयणकसायवेगुव्वियो य मारणंतियो समुग्घादो।
तेजो हारो छट्ठो सत्तमओ केवलीणं तु॥

इति गाथाकथितसप्तसमुद्घातान् विहाय स्वदेहप्रमाणात्मव्याख्यानमुख्यत्वेन गाथाद्वयं गतम्।

अथ सिद्धानां शुद्धजीवत्वं अतीतशरीरप्रमाणाकाशव्यापकत्वादिति व्यवहारेण भूतपूर्वकन्यायेन किंचिन्न्यूनचरमशरीरप्रमाणं च व्यवस्थापयति –

जेसिं जीवसहाओ णत्थि अभावो य सव्वहा तत्थ।
ते होंति भिण्णदेहा सिद्धा वचिगोयरमदीदा॥ ३५॥

यहाँ जो शरीर से भिन्न अनन्त ज्ञानादि गुणमय शुद्धात्मा कहा गया है, वह ही शुभाशुभ सङ्कल्प-विकल्प के परिहार काल में सर्व प्रकार से उपादेय है – यह अभिप्राय है॥ ३४॥

इस प्रकार मीमांसक, नैयायिक, सांख्यमतानुसारी शिष्य के संशय को नष्ट करने-हेतु –

'वेदना, कषाय, वैक्रियिक, मारणान्तिक, तैजस, छठवाँ आहारक और सातवाँ केवली समुद्घात है।' *॥ गोम्मटसार जीवकाण्ड, गाथा ६६७॥*

इस गाथा में कहे सात समुद्घातों को छोड़कर, अपने देहप्रमाण आत्मा के व्याख्यान की मुख्यता से दो गाथाएँ पूर्ण हुईं।

अब, सिद्धों को अतीत शरीरप्रमाण आकाश में व्यापक होने से शुद्ध जीवत्व तथा व्यवहार की अपेक्षा भूतपूर्व न्याय से (भूतपूर्व प्रज्ञापन नैगमनय से) कुछ कम अन्तिम शरीरप्रमाण स्थापित करते हैं –

है नहीं जीवस्वभाव जिनके, ना अभाव है सर्वथा।
वे देह बिन न वचनगोचर, सिद्ध रहते सर्वथा॥ ३५॥

गाथार्थ - जिनके विभाव प्राण-धारण करनेरूप जीवस्वभाव नहीं है और उसका सर्वथा अभाव भी नहीं है, वे शरीर से भिन्न, वचनगोचर-अतीत / वचनातीत सिद्ध हैं।

जेसिं जीवसहाओ णत्थि येषां कर्मजनितद्रव्यप्राणभावप्राणरूपो जीवस्वभावो नास्ति *ते होंति सिद्धा* ते भवन्ति सिद्धा इति सम्बन्धः। यदि तत्र द्रव्यभावप्राणा न संति तर्हि बौद्धमतवत्सर्वथा जीवाभावो भविष्यतीत्याशंक्योत्तरमाह *अभावो य सव्वहा तत्थ णत्थि* शुद्धसत्ताचैतन्यज्ञानादिरूपशुद्धभावप्राण-सहितत्वात्तत्र सिद्धावस्थायां सर्वथा जीवाभावोऽपि नास्ति च। सिद्धाः कथंभूता ? *भिण्णदेहा* अशरीरात् शुद्धात्मनो विपरीताः शरीरोत्पत्तिकारणभूताः मनोवचनकाययोगाः क्रोधादिकषायाश्च न संतीति भिन्नदेहा अशरीरा ज्ञातव्याः। पुनश्च कथंभूताः ? *वचिगोयरमदीदा* सांसारिकद्रव्यप्राणभावप्राणरहिता अपि विजयंते प्रतपंतीति हेतोर्वचनगोचरातीतास्तेषां महिमास्वभावः अथवा सम्यक्त्वाद्यष्टगुणैस्तदंतर्ग-तानंतगुणैर्वा सहितास्तेन कारणेन वचनगोचरातीता इति।

अथात्र यथा पर्यायरूपेण पदार्थानां क्षणिकत्वं दृष्ट्वातिव्याप्तिं कृतद्रव्यरूपेणापि क्षणिकत्वं मन्यते सौगतः तथेन्द्रियादिदर्शनप्राणसहितस्याशुद्धजीवस्याभावं दृष्ट्वा मोक्षावस्थायां केवलज्ञानाद्यनंत-गुणसहितस्य शुद्धजीवस्याप्यभावं मन्यत इति भावार्थः॥ ३५॥

अथ सिद्धस्य कर्मनोकर्मापेक्षया कार्यकारणाभावं साधयति -

टीकार्थ - ***जेसिं जीवसहाओ णत्थि*** जिनके कर्मजनित द्रव्यप्राण-भावप्राणरूप जीवस्वभाव नहीं है, ***ते होंति सिद्धा*** वे सिद्ध हैं – इस प्रकार सम्बन्ध है। यदि वहाँ द्रव्य-भावप्राण नहीं हैं तो बौद्धमत के समान जीव का सर्वथा अभाव होगा – ऐसी आशङ्का का उत्तर देते हैं – ***अभावो य सव्वहा तत्थ णत्थि*** शुद्ध सत्ता, चैतन्य, ज्ञानादिरूप शुद्ध भावप्राणसहित होने से उस सिद्ध अवस्था में जीव का सर्वथा अभाव भी नहीं है। वे सिद्ध कैसे हैं? ***भिन्नदेहा*** अशरीरी शुद्धात्मा से विपरीत, शरीर की उत्पत्ति के कारणभूत मन-वचन-काययोग और क्रोधादि कषाएँ नहीं हैं – इस प्रकार भिन्न देह / अशरीर जानना चाहिए। वे और कैसे हैं? ***वचिगोयरमदीदा*** सांसारिक द्रव्यप्राण-भावप्राण से रहित होने पर भी विजयवान हैं, प्रतापवान हैं – इस हेतु से उनकी महिमा स्वभाव वचनगोचरता से रहित / वचनातीत है; अथवा वे सम्यक्त्व आदि आठ गुणों से या उसके अन्तर्गत अनन्त गुणों से सहित हैं, उस कारण वचनगोचरातीत हैं।

अब, यहाँ जैसे सौगत / बौद्ध पर्यायरूप से पदार्थों की क्षणिकता देखकर अतिव्याप्तिकर (सर्वथा उसे ही मानकर) द्रव्यरूप से भी क्षणिकता मान लेते हैं; उसी प्रकार इन्द्रिय आदि दश प्राणसहित अशुद्ध जीव का अभाव देखकर मोक्ष अवस्था में केवलज्ञानादि अनन्तगुणसहित शुद्धजीव का भी अभाव मान लेते हैं – यह भावार्थ है॥ ३५॥

अब, सिद्ध के कर्म-नोकर्म की अपेक्षा कार्यकारणभाव साधते हैं –

ण कदाचिवि उप्पण्णो जम्हा कज्जं ण तेण सो सिद्धो।
उप्पादेदि ण किंचिवि कारणमिह तेण ण स होहि॥ ३६॥

ण कदाचिवि उप्पण्णो संसारिजीववन्नरनारकादिरूपेण क्वापि काले नोत्पन्नः *जम्हा* यस्मात्कारणात् *कज्जं ण तेण सो सिद्धो* तेन कारणेन कर्मनोकर्मापेक्षया स सिद्धः कार्यं न भवति *उप्पादेदि ण किंचिवि* स्वयं कर्मनोकर्मरूपं किमपि नोत्पादयति *कारणमिह तेण ण स होहि* तेन कारणेन स सिद्धः इह जगति कर्मनोकर्मापेक्षया कारणमपि न भवतीति।

अत्र गाथासूत्रे य एव शुद्धनिश्चयेन कर्मनोकर्मपेक्षया कार्यकारणं च न भवति स एवानंत-ज्ञानादिसहितः कर्मोदयजनितनवतरकर्मादानकारणभूतमनोवचनकायव्यापारनिवृत्तिकाले साक्षादुपादेयो भवतीति तात्पर्यम्॥ ३६॥

अथ जीवाभावो मुक्तिरिति सौगतमतं विशेषेण निराकरोति —

सस्सदमधमुच्छेदं भव्वमभव्वं च सुण्णमिदरं च।
विण्णाणमविण्णाणं ण वि जुज्जदि असदि सब्भावे॥ ३७॥

नहिं किसी से उत्पन्न भगवन, अतः कार्य नहीं कहे।
नहिं किसी को उत्पन्न करते, अतः कारण नहीं वे॥ ३६॥

गाथार्थ - वे सिद्ध किसी से भी उत्पन्न नहीं हुए हैं; अतः कार्य नहीं हैं तथा किसी को भी उत्पन्न नहीं करते; अतः वे कारण भी नहीं हैं।

टीकार्थ - ***ण कुदोचि वि उप्पण्णो*** संसारी जीव के समान नर-नारकादिरूप से किसी भी समय उत्पन्न नहीं होते हैं, ***जम्हा*** जिस कारण; ***कज्जं ण तेण सो सिद्धो*** उस कारण से कर्म-नोकर्म की अपेक्षा वे सिद्ध कार्य नहीं हैं। ***उप्पादेदि ण किंचिवि*** स्वयं कर्म-नोकर्मरूप कुछ भी उत्पन्न नहीं करते हैं; ***कारणमिह तेण ण स होहि*** उस कारण वे सिद्ध इस जगत् में कर्म-नोकर्म की अपेक्षा कारण भी नहीं हैं।

इस गाथा-सूत्र में जो शुद्ध निश्चय से कर्म-नोकर्म की अपेक्षा कार्य और कारण नहीं हैं, कर्मोदय से उत्पन्न नवीन कर्मों को ग्रहण करने में कारणभूत मन-वचन-काय व्यापार से निवृत्ति के समय, अनन्त ज्ञानादि सहित वे सिद्ध ही साक्षात् उपादेय हैं – ऐसा तात्पर्य है॥ ३६॥

अब, 'जीव का अभाव मुक्ति है' इस प्रकार के सौगतमत का विशेषरूप से निराकरण करते हैं –

सस्सदमधमुच्छेदं सिद्धावस्थायां तावट्टंकोत्कीर्णज्ञायकैकरूपेणाविनश्वरत्वाद्द्रव्यरूपेण शाश्वतस्वरूपमस्ति अथ अहो पर्यायरूपेणागुरुलघुकगुणषट्स्थानगतहानिवृद्ध्यपेक्षयोच्छेदोऽस्ति *भव्वमभव्वं च* निर्विकारचिदानंदैकस्वभावपरिणामेन भवनं परिणमनं भव्यत्वं, अतीतमिथ्यात्वरागादिविभावपरिणामेनाभवनमपरिणमनमभव्यत्वम्। *सुण्णमिदरं च* स्वशुद्धात्मद्रव्यविलक्षणेन परद्रव्यक्षेत्रकालभावचतुष्टयेन नास्तित्वं शून्यत्वं, निजपरमात्मानुगतस्वद्रव्यक्षेत्रकालभावरूपेणेतरश्चाशून्यत्वं *विण्णाणमविण्णाणं* समस्तद्रव्यगुणपर्यायैकसमयप्रकाशनसमर्थसकलविमलकेवलज्ञानगुणेन विज्ञानं, विनष्टमतिज्ञानादिछद्मस्थज्ञानेन परिज्ञानादविज्ञानमिति *णवि जुज्जदि असदि सब्भावे* इदं तु नित्यत्वादिस्वभावगुणाष्टकमविद्यमानजीवसद्भावे मोक्षे न युज्यते न घटते तदस्तित्वादेव ज्ञायते मुक्तो शुद्धजीवसद्भावोऽस्ति। अत्र स एवोपादेय इति भावार्थः॥ ३७॥

एवं भट्टचार्वाकमतानुसारिशिष्यसंदेहविनाशार्थं जीवस्यामूर्तत्वव्याख्यानरूपेण गाथात्रयं गतम्।

सद्भाव हो न मोक्ष में, तो घटे कैसे नित्यता ?
व नाश भव्य अभव्य, शून्याशून्य ज्ञानाज्ञान वा॥ ३७॥

गाथार्थ - (मोक्ष में जीव का) सद्भाव न होने पर शाश्वत, नाशवान, भव्य / होने-योग्य, अभव्य / न होनेयोग्य, शून्य, अशून्य, विज्ञान और अविज्ञान (जीव में) घटित नहीं होते हैं।

टीकार्थ - ***सस्सदमधमुच्छेदं*** सिद्ध अवस्था में टङ्कोत्कीर्ण ज्ञायक एकरूप द्रव्य की अपेक्षा अविनश्वर होने से शाश्वतस्वरूप है तथा ***अध*** अहो! पर्यायरूप से अगुरुलघुकगुण की षट्स्थानगत हानि-वृद्धि की अपेक्षा उच्छेद है। ***भव्वमभव्वं च*** निर्विकार चिदानन्द एक स्वभावमय परिणाम से होना, परिणमना, भव्यत्व है; अतीत / नष्ट हो गए मिथ्यात्व-रागादि विभावपरिणाम से नहीं होना, नहीं परिणमना, अभव्यत्व है। ***सुण्णमिदरं च*** स्वशुद्धात्मद्रव्य से विलक्षण परद्रव्य-क्षेत्र-काल-भाव चतुष्टय से नास्तित्व शून्यता है; निज परमात्मा सम्बन्धी स्व द्रव्य-क्षेत्र-काल-भावरूप से इतर अर्थात् अशून्यता है। ***विण्णाणमविण्णाणं*** समस्त द्रव्य-गुण-पर्यायों को एक समय में प्रकाशित करने में समर्थ सकल-विमल केवलज्ञानगुण से विज्ञान है, नष्ट हुए मतिज्ञानादि छद्मस्थ ज्ञान द्वारा परिज्ञान (रहित) हो जाने के कारण अविज्ञान हैं। ***णवि जुज्जदि असदि सब्भावे*** मोक्ष में जीव का सद्भाव विद्यमान न होने पर नित्यत्व आदि (ये) आठ गुणस्वभाव घटित नहीं हो सकते हैं; उनके अस्तित्व से ही मोक्ष में जीव का सद्भाव जाना जाता है। यहाँ वह ही उपादेय है – यह भावार्थ है॥ ३७॥

इस प्रकार भट्ट और चार्वाकमतानुसारी शिष्य के सन्देह का नाश करने के लिए जीव के अमूर्तत्व व्याख्यानरूप से तीन गाथाएँ पूर्ण हुईं।

अथ त्रिविधचेतनाव्याख्यानं प्रतिपादयति —

कम्माणं फलमेक्को एक्को कज्जं तु णाणमथमेक्को।
वेदयदि जीवरासी चेदगभावेण तिविहेण॥ ३८॥

कम्माणं फलमेक्को चेदगभावेण वेदयदि जीवरासी निर्मलशुद्धात्मानुभूत्यभावोपार्जित-प्रकृष्टतरमोहमलीमसेन चेतकभावेन प्रच्छादितसामर्थ्यः सन्नेको जीवराशिः कर्मफलं वेदयति *एक्को कज्जं तु* अथ पुनरेकस्तेनैव चेतकभावेनोपलब्धसामर्थ्येनेहापूर्वकेष्टानिष्टविकल्परूपं कर्म कार्यं तु वेदयत्यनुभवति *णाणमथमेक्को* अथ पुनरेको जीवराशिस्तेनैव चेतकभावेन विशुद्धशुद्धात्मानुभूति-भावनाविनाशितकर्ममलकलंकेन केवलज्ञानमनुभवति। कतिसंख्योपेतेन तेन पूर्वोक्तचेतकभावेन? *तिविहेण* कर्मफलकर्मकार्यज्ञानरूपेण त्रिविधेनेति॥ ३८॥

अथात्र कः किं चेतयतीति निरूपयति इति, निरूपयति इति कोऽर्थः? इति पृष्टे प्रत्युत्तरं ददाति; एवं प्रश्नोत्तररूपपातनिकाप्रस्तावे सर्वत्रेति शब्दस्यार्थो ज्ञातव्यः —

अब, तीन प्रकार की चेतना के व्याख्यान का प्रतिपादन करते हैं —

त्रिविध चेतक भाव से, कुछ जीवराशि चेतती।
है कर्मफल को कर्म को, कुछ ज्ञान को ही चेतती॥ ३८॥

गाथार्थ - तीन प्रकार के चेतकभाव द्वारा एक जीवराशि कर्मों के फल को, एक जीवराशि कार्य को और एक जीवराशि ज्ञान को चेतती है / वेदती है।

टीकार्थ - ***कम्माणं फलमेक्को चेदगभावेण वेदयदि जीवरासी*** निर्मल शुद्धात्मानुभूति के अभाव से उपार्जित प्रकृष्टतर मोह से मलीमस चेतकभाव द्वारा प्रच्छादित सामर्थ्यवाली होती हुई, स्व-सामर्थ्य को प्रगट नहीं करती हुई, एक जीवराशि कर्मफल का वेदन करती है; ***एक्को कज्जं तु*** एक उसी चेतकभाव से सामर्थ्य प्रगट हो जाने के कारण इच्छापूर्वक इष्ट-अनिष्ट विकल्परूप कर्म / कार्य का वेदन करती है / अनुभव करती है; ***णाणमथमेक्को*** तथा एक जीवराशि उसी चेतकभाव से विशुद्ध शुद्धात्मानुभूति की भावना (तद्रूप परिणमन) द्वारा कर्मकलङ्क को नष्ट कर देने के कारण केवलज्ञान का अनुभव करती है। कितनी संख्या से सहित उस पूर्वोक्त चेतकभाव द्वारा अनुभव करती है? ***तिविहेण*** कर्मफल, कर्म / कार्य और ज्ञानरूप से तीन प्रकार के चेतकभाव द्वारा अनुभव करती है॥ ३८॥

अब, यहाँ कौन क्या चेतता है? इसका निरूपण करते हैं —

प्रश्न - निरूपण करते हैं — इसका क्या अर्थ है?

सव्वे खलु कम्मफलं थावरकाया तसा हि कज्जजुदं।
पाणित्तमदिक्कंता णाणं विंदंति ते जीवा॥ ३९॥

सव्वे खलु कम्मफलं थावरकाया विंदन्ति **ते सर्वे जीवाः प्रसिद्धाः पञ्चप्रकाराः स्थावरकाया जीवा अव्यक्तसुखदुःखानुभवरूपं शुभाशुभकर्मफलं विंदंत्यनुभवन्ति *तसा हि कज्जजुदं* द्वीन्द्रियादयस्त्रसजीवाः पुनस्तदेव कर्मफलं निर्विकारपरमानंदैकस्वभावमात्मसुखमलभमानास्संतो विशेषरागद्वेषरूपा तु या कार्यचेतना तत्सहितमनुभवन्ति *पाणित्तमदिक्कंता णाणं विंदंति ते जीवा* ये तु विशिष्टशुद्धात्मानुभूतिभावनासमुत्पन्नपरमानंदैकसुखामृतसमरसीभावबलेन दशविधप्राणत्वमतिक्रांताः सिद्धजीवास्ते केवलज्ञानं विंदन्ति। इत्यत्र गाथाद्वये केवलज्ञानचेतना साक्षादुपादेया ज्ञातव्येति तात्पर्यम्॥ ३९॥**

उत्तर - तत्सम्बन्धी प्रश्न होने पर उसका उत्तर देते हैं – यह उसका अर्थ है। इस प्रकार प्रश्नोत्तररूप पातनिका के प्रस्ताव में सर्वत्र 'इति' शब्द का ऐसा ही अर्थ जानना चाहिए –

हैं सब स्थावर कर्मफल, त्रस कर्मयुत फल वेदते।
हैं जीव प्राणातीत जो, वे ज्ञान को ही वेदते॥ ३९॥

गाथार्थ - सभी स्थावर जीवसमूह कर्मफल का; त्रस कर्मसहित कर्मफल का वेदन करते हैं, तथा प्राणित्व का अतिक्रमण कर गए वे जीव (सर्वज्ञ भगवान), ज्ञान का वेदन करते हैं।

टीकार्थ - ***सव्वे खलु कम्मफलं थावरकाया विंदन्ति*** वे सभी प्रसिद्ध पाँच प्रकार के स्थावरकाय जीव, अव्यक्त सुख-दुःख अनुभवरूप शुभाशुभ कर्मफल का वेदन करते हैं, अनुभव करते हैं; ***तसा हि कज्जजुदं*** दो इन्द्रिय आदि त्रसजीव निर्विकार परमानन्दरूप एक स्वभावमय आत्मसुख को प्राप्त नहीं करते हुए विशेष राग-द्वेषरूप जो कार्य चेतना है, उससे सहित उसी कर्मफल का अनुभव करते हैं। ***पाणित्तमदिक्कंता णाणं विंदंति ते जीवा*** तथा जो विशिष्ट शुद्धात्मानुभूति भावना से समुत्पन्न परमानन्द एक सुखामृतरूप समरसीभाव के बल से दश प्रकार के प्राणों से रहित सिद्ध जीव हैं, वे केवल ज्ञान का अनुभव करते हैं।

इस प्रकार इन दोनों गाथाओं में केवल ज्ञानचेतना साक्षात् उपादेयभूत जानना चाहिए – ऐसा तात्पर्य है॥ ३९॥

[इस गाथा-टीका में आचार्य अमृतचन्द्र ने चेतना के एकार्थ / पर्यायवाची नाम स्पष्ट किए हैं। वे इस प्रकार – चेतना, अनुभूति, उपलब्धि, वेदना – ये एकार्थवाची होने से चेतते हैं, अनुभव करते हैं, उपलब्ध करते हैं, वेदते हैं – ये सभी एकार्थवाची शब्द हैं।]

एवं त्रिविध चेतनाव्याख्यानमुख्यत्वेन गाथाद्वयं गतम्।

इत उर्ध्वमेकोनविंशतिगाथापर्यन्तमुपयोगाधिकारः प्रारभ्यते। तद्यथा

अथात्मनो द्वेधोपयोगं दर्शयति —

उवओगो खलु दुविहो णाणेण य दंसणेण संजुत्तो।
जीवस्स सव्वकालं अणण्णभूदं वियाणीहि॥ ४०॥

उवओगो **आत्मनश्चैतन्यानुविधायिपरिणामः उपयोगः चैतन्यमनुविदधात्यन्वयरूपेण परिणमति अथवा पदार्थपरिच्छित्तिकाले घटोऽयं पटोऽयमित्याद्यर्थग्रहणरूपेण व्यापारयति चैतन्यानुविधायि *खलु* स्फुटं *दुविहो* द्विविधः। स च कथंभूतः? *णाणेण य दंसणेण संजुत्तो* सविकल्पं ज्ञानं निर्विकल्पं दर्शनं ताभ्यां संयुक्तः *जीवस्स सव्वकालं अणण्णभूदं वियाणीहि* तं चोपयोगं जीवस्य सम्बन्धित्वेन सर्वकालं संज्ञालक्षणप्रयोजनादिभेदेऽपि प्रदेशैरभिन्नं विजानीहीति॥ ४०॥**

इस प्रकार त्रिविध चेतना के व्याख्यान की मुख्यता से दो गाथाएँ पूर्ण हुईं।

(इस प्रकार पाँच अधिकारों के समूहरूप से तेरह गाथाएँ पूर्ण हुईं।)

इससे आगे उन्नीस गाथाओं पर्यन्त चलनेवाला उपयोग अधिकार प्रारम्भ होता है। वह इस प्रकार —

अब, आत्मा के दो प्रकार का उपयोग दिखाते हैं —

अनन्यभूत हैं जीव के, सब समय ही उपयोग जो।
वे ज्ञान दर्शन से सहित द्वि, विध उसे सब जान लो॥ ४०॥

गाथार्थ - वास्तव में जीव के सर्वकाल अनन्यरूप से रहनेवाला ज्ञान और दर्शन से संयुक्त दो प्रकार का उपयोग जानो।

टीकार्थ - ***उवओगो*** आत्मा का चैतन्यानुविधायी परिणाम उपयोग है। जो चैतन्य के साथ रहता है, अन्वयरूप से परिणमित होता है; अथवा पदार्थों की जानकारी के समय 'यह घट है, यह पट है' इत्यादि प्रकार से पदार्थों को जाननेरूप व्यापार करता है, वह चैतन्यानुविधायी है। ***खलु*** वास्तव में ***दुविहो*** वह दो प्रकार का है।

प्रश्न - वह दो प्रकार का कैसे है? ***णाणेण य दंसणेण संजुत्तो*** सविकल्परूप ज्ञान है, निर्विकल्परूप दर्शन है, उन दोनों से संयुक्त है। ***जीवस्स सव्वकालं अणण्णभूदं वियाणीहि*** संज्ञा, लक्षण, प्रयोजन आदि की अपेक्षा भेद होने पर भी वह उपयोग, जीव का सम्बन्धी होने से

एवं ज्ञानदर्शनोपयोगद्वयसूचनरूपेण गाथैका गता।

अथ ज्ञानोपयोगभेदानां संज्ञां प्रतिपादयति —

आभिणिसुदोधिमणकेवलाणि णाणाणि पंचभेयाणि।
कुमदिसुदविभंगाणि य तिण्णि वि णाणेहिं संजुत्ते॥ ४१॥

आभिनिबोधिकं मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्ययज्ञानं केवलज्ञानमिति ज्ञानानि पंचभेदानि भवन्ति कुमतिज्ञानं कुश्रुतज्ञानं विभंगज्ञानमिति च मिथ्याज्ञानत्रयं भवति।

अयमत्र भावार्थः — यथैकोऽप्यादित्यो मेघावरणवशेन बहुधा भिद्यते तथा निश्चयनयेनाखण्डैकप्रतिभासस्वरूपोऽप्यात्मा व्यवहारनयेन कर्मपटलवेष्टितः सन्मतिज्ञानादिभेदेन बहुधा भिद्यत इति॥ ४१॥

इत्यष्टविधज्ञानोपयोगसंज्ञाकथनरूपेण गाथा गता।

(जीव के साथ उसका नित्यतादात्म्यसम्बन्ध या गुण-गुणी सम्बन्ध होने से), सर्व काल उसे प्रदेशों की अपेक्षा अभिन्न जानो॥ ४०॥

इस प्रकार ज्ञान-दर्शन — दो उपयोग की सूचनारूप से एक गाथा पूर्ण हुई।

अब, ज्ञानोपयोग के भेदों के नाम प्रतिपादित करते हैं —

मति श्रुत अवधि अरु, मनः पर्यय ज्ञान केवलज्ञान ये।
हैं पाँच कुमति-श्रुत विभङ्ग, संयुक्त हैं ये ज्ञान से॥ ४१॥

गाथार्थ - आभिनिबोधिक (मतिज्ञान), श्रुतज्ञान, अवधिज्ञान, मनःपर्ययज्ञान और केवलज्ञान — ये ज्ञान के पाँच भेद हैं; तथा कुमति, कुश्रुत, विभङ्ग — ये तीन (अज्ञान) भी ज्ञान के साथ संयुक्त हैं।

टीकार्थ - आभिनिबोधिक (मतिज्ञान), श्रुतज्ञान, अवधिज्ञान, मनःपर्ययज्ञान और केवलज्ञान — ये ज्ञान के पाँच भेद हैं तथा कुमतिज्ञान, कुश्रुतज्ञान, विभङ्गज्ञान — ये तीन मिथ्याज्ञान हैं।

यहाँ यह भावार्थ है कि जैसे एक ही सूर्य मेघ के आवरणवश अपनी प्रभा की अपेक्षा अनेक प्रकार के भेदों को प्राप्त हो जाता है; उसी प्रकार निश्चयनय से अखण्ड एक प्रतिभासस्वरूपी आत्मा भी व्यवहारनय की अपेक्षा कर्मसमूह से वेष्टित होता हुआ, मतिज्ञान आदि भेदों द्वारा अनेक प्रकार के भेदों को प्राप्त हो जाता है॥ ४१॥

इस प्रकार ज्ञानोपयोग सम्बन्धी आठ भेदों के नाम-कथनरूप से गाथा समाप्त हुई।

अथ मत्यादिपञ्चज्ञानानां क्रमेण गाथा पञ्चकेन व्याख्यानं करोति। तथाहि —

मदिणाणं पुण तिविहं उबलद्धी भावणं च उवओगो।
तह एव चदुवियप्पं दंसणपुव्वं हवदि णाणं॥ ४२॥

मदिणाणं अयमात्मा निश्चयनयेन तावदखण्डैकविशुद्धज्ञानमयः व्यवहारनयेन संसारावस्थायां कर्मावृतः सन्मतिज्ञानावरणक्षयोपशमे सति पञ्चभिरिन्द्रियैर्मनसा च मूर्तामूर्तं वस्तु विकल्परूपेण यज्जानाति तन्मतिज्ञानम्। *पुण तिविहं* तच्च पुनस्त्रिविधं *उबलद्धी भावणं च उवओगो* उपलब्धिर्भावना तथोपयोगश्च, मतिज्ञानावरणीयक्षयोपशमजनितार्थग्रहणशक्तिरुपलब्धिर्ज्ञातेऽर्थे पुनश्चिन्तनं भावना नीलमिदं पीतमिदं इत्यादिरूपेणार्थग्रहणव्यापार उपयोगः *तह एव चदुवियप्पं* तथैवावग्रहेहावायधारणा-भेदेन चतुर्विधं वरकोष्ठबीजपदानुसारिसंभिन्नश्रोतृताबुद्धिभेदेन *वा दंसणपुव्वं हवदि णाणं* तच्च मतिज्ञानं सत्तावलोकदर्शनपूर्वकमिति।

[इस गाथा-टीका में आचार्य अमृतचन्द्र ने सभी ज्ञानों का स्वरूप भी स्पष्ट किया है, जो मूलतः पठनीय है।]

अब, मति आदि पाँच ज्ञानों का क्रम से पाँच गाथाओं द्वारा व्याख्यान करते हैं। वह इस प्रकार —

उपलब्धि है अरु भावना, उपयोग से है वह त्रिविध।
होता है दर्शनपूर्वक, मतिज्ञान वह ही चतुर्विध॥ ४२॥

गाथार्थ - उपलब्धि, भावना और उपयोग के भेद से मतिज्ञान तीन प्रकार का है; उसी प्रकार वह चार प्रकार का है; तथा वह ज्ञान दर्शनपूर्वक होता है।

टीकार्थ - ***मदिणाणं*** वास्तव में निश्चय से अखण्ड, एक, विशुद्ध ज्ञानमय यह आत्मा व्यवहारनय से संसार अवस्था में कर्मों से घिरा हुआ, मतिज्ञानावरण का क्षयोपशम होने पर पाँच इन्द्रिय और मन द्वारा मूर्त-अमूर्त वस्तु को विकल्परूप से जिसके द्वारा जानता है, वह मतिज्ञान है। ***पुण तिविहं*** और वह तीन प्रकार का है; ***उबलद्धी भावणं च उवओगो*** उपलब्धि, भावना और उसरूप उपयोग। मतिज्ञानावरणीय क्षयोपशम से उत्पन्न पदार्थों को जानने की शक्ति, उपलब्धि है; उससे जाने गए पदार्थ के सम्बन्ध में पुनः-पुनः चिन्तन, भावना है; यह नीला, यह पीला इत्यादि रूप से पदार्थ को जानने में व्यापार करना, उपयोग है। ***तह एव चदुवियप्पं*** उसी प्रकार अवग्रह, ईहा, अवाय और धारणा के भेद से चार प्रकार का अथवा वर / उत्कृष्ट कोष्ठबुद्धि, बीजबुद्धि, पदानुसारीबुद्धि, सम्भिन्नश्रोतृताबुद्धि के भेद से चार प्रकार का है। ***दंसणपुव्वं हवदि णाणं*** और वह मतिज्ञान सत्तावलोकनरूप दर्शनपूर्वक होता है।

अत्र निर्विकारशुद्धानुभूत्यभिमुखं यन्मतिज्ञानं तदेवोपादेयभूतानंतसुखसाधकत्वान्निश्चयेनोपादेयं तत्साधकं बहिरंगं पुनर्व्यवहारेणेति तात्पर्यम्॥ ४२॥

सुदणाणं पुण णाणी भणंति लद्धी य भावणा चेव।
उवओगणयवियप्पं णाणेण य वत्थु अत्थस्स॥ ४३॥

सुदणाणं पुण णाणी भणंति स एव पूर्वोक्तात्मा श्रुतज्ञानावरणीयक्षयोपशमे सति यन्मूर्तामूर्तं वस्तु परोक्षरूपेण जानाति तत्पुनः श्रुतज्ञानं ज्ञानिनो भणन्ति। तच्च कथंभूतं? *लद्धी य भावणा चेव लब्धिरूपं* च भावनारूपं चैव। पुनरपि किंविशिष्टं? *उवओगणयवियप्पं* उपयोगविकल्पं नयविकल्पं च; उपयोगशब्देनात्र वस्तुग्राहकं प्रमाणं भण्यते, नयशब्देन तु वस्त्वेकदेशग्राहको ज्ञातुरभिप्रायो विकल्पः। तथा चोक्तम् – *नयो ज्ञातुरभिप्रायः*। केन कृत्वा वस्तुग्राहकं प्रमाणं वस्त्वेकदेशग्राहको नय? इतिचेत्। *णाणेण य* ज्ञातृत्वेन परिच्छेदकत्वेन ग्राहकत्वेन *वत्थु अत्थस्स* सकलवस्तुग्राहकत्वेन प्रमाणं भण्यते,

यहाँ निर्विकार शुद्धानुभूति के अभिमुख जो मतिज्ञान है, वह ही उपादेयभूत अनन्त सुख का साधक होने के कारण निश्चय से उपादेय है, उसका साधक बहिरङ्ग तो व्यवहार से उपादेय है – ऐसा तात्पर्य है॥ ४२॥

जो लब्धि भावनारूप ज्ञाता की अपेक्षा वस्तु से।
व अंश से उपयोग नय मय श्रुतज्ञान कहें उसे॥ ४३॥

गाथार्थ – लब्धि और भावनारूप जानने की अपेक्षा सम्पूर्ण वस्तु को जाननेवाले उपयोग / प्रमाणरूप और वस्तु के एकदेश को जाननेवाले नयविकल्परूप ज्ञान को ज्ञानी श्रुतज्ञान कहते हैं।

टीका – ***सुदणाणं पुण णाणी भणंति*** वही पूर्वोक्त आत्मा श्रुतज्ञानावरणीय का क्षयोपशम होने पर जिस ज्ञान से मूर्त-अमूर्त वस्तु को परोक्षरूप में जानता है, ज्ञानी उसे श्रुतज्ञान कहते हैं। वह कैसा है? ***लद्धी या भावणा चेव*** वह लब्धिरूप और भावनारूप ही है। वह और किस विशेषतावाला है? ***उवओगणयवियप्पं*** वह उपयोग विकल्प और नय विकल्परूप है। यहाँ उपयोग शब्द से (सम्पूर्ण) वस्तु को जाननेवाला प्रमाण कहा गया है तथा नय शब्द से वस्तु के एकदेश को जाननेवाला ज्ञाता का अभिप्रायरूप विकल्प कहा गया है। वैसा ही कहा भी है – 'ज्ञाता का अभिप्राय नय है।'

किस अपेक्षा (सम्पूर्ण) वस्तु को जाननेवाला प्रमाण और वस्तु के एकदेश को जाननेवाला नय है? ***णाणेण य*** जाननेवाले की अपेक्षा, परिच्छेदक की अपेक्षा, ग्राहक की अपेक्षा वह प्रमाण-नय है। ***वत्थु अत्थस्स*** सम्पूर्ण वस्तु को जाननेवाला होने से प्रमाण कहलाता है और अर्थ

अर्थस्य वस्त्वेकदेशस्य। कथंभूतस्य ? गुणपर्यायरूपस्य ग्रहणेन पुनर्नय इति।

अत्र विशुद्धज्ञानदर्शनस्वभावशुद्धात्मतत्त्वस्य सम्यक्श्रद्धानज्ञानानुचरणाभेदरत्नत्रयात्मकं यद्भावश्रुतं तदेवोपादेयभूतपरमात्मतत्त्वसाधकत्वान्निश्चयेनोपादेयं, तत्साधकं बहिरंगं तु व्यवहारेणेति तात्पर्यम्॥ ४३॥

ओहिं तहेव घेप्पदु देसं परमं च ओहिसव्वं च। 卐
तिण्णिवि गुणेण णियमा भवेण देसं तहा णियदं॥ ४४॥

***ओहिं तहेव घेप्पदु* अयमात्मावधिज्ञानावरणक्षयोपशमे सति मूर्तं वस्तु यत्प्रत्यक्षेण जानाति तदवधिज्ञानं भवति तावत् यथापूर्वमुपलब्धिभावनोपयोगरूपेण त्रिधा श्रुतज्ञानं व्याख्यातं तथा साप्यवधिभावनां विहाय त्रिधा गृह्यतां ज्ञायतां भवद्भिः देसं परमं च ओहि सव्वं च अथवा देशावधिपरमावधिसर्वावधिभेदेन त्रिधावधिज्ञानं किंतु परमावधिसर्वावधिद्वयं चिदुच्छलननिर्भरानंदरूपपरमसुखामृतरसा-**

/ वस्तु के एकदेश को जाननेवाला होने से नय कहलाता है। कैसे अर्थ को जानने से नय है ? गुण-पर्यायरूप अर्थ को जानने से नय है।

यहाँ विशुद्ध ज्ञान-दर्शन स्वभावी शुद्धात्मतत्त्व का सम्यक् श्रद्धान, ज्ञान, अनुचरणरूप अभेद रत्नत्रयात्मक जो भावश्रुत है, वही उपादेयभूत परमात्मतत्त्व का साधक होने के कारण निश्चय से उपादेय है; उसके साधक बहिरङ्ग साधन व्यवहार से उपादेय हैं – यह तात्पर्य है॥ ४३॥

सीमा सहित प्रत्यक्ष जाने, अवधि देश परम सकल।
ये तीन गुणप्रत्यय नियम से, भवनियत स्व देशमय॥ ४४॥

गाथार्थ - अवधिज्ञान उसी प्रकार अर्थात् प्रत्यक्षरूप में मूर्त वस्तु को जानता है। देशावधि, परमावधि और सर्वावधि – ये तीनों नियम से गुणप्रत्यय होते हैं तथा भवप्रत्यय नियत देश (मुख्यतया देव-नरकगति) में होता है।

टीकार्थ - ***ओहिं तहेव घेप्पदु*** यह आत्मा अवधिज्ञानावरण का क्षयोपशम होने पर जिस प्रत्यक्ष ज्ञान से मूर्त वस्तु को जानता है, वह अवधिज्ञान है। जैसे पहले उपलब्धि, भावना और उपयोग से श्रुतज्ञान के तीन भेदों का व्याख्यान किया था; उसी प्रकार यह अवधिज्ञान भी भावना को छोड़कर शेष उपलब्धि और उपयोग दो भेदरूप तथा ज्ञेय की अपेक्षा तीन भेदरूप आपको जानना चाहिए। ***देसं परमं च ओहि सव्वं च*** अथवा देशावधि, परमावधि और सर्वावधि के भेद से अवधिज्ञान तीन प्रकार का है; परन्तु परमावधि और सर्वावधि – ये दो अवधिज्ञान चिदुच्छलन निर्भर (उछलते हुए नित्य उद्योतमय चैतन्य से परिपूर्ण) आनन्दरूप परम सुखामृतमय

स्वादसमरसीभावपरिणतानां चरमदेहतपोधनानां भवति। तथाचोक्तम् —

''परमोही सव्वोही चरमसरीरस्स विरदस्स॥''

तिण्णिवि गुणेण णियमा त्रयोऽप्यवधयो विशिष्टसम्यक्त्वादिगुणेन निश्चयेन भवन्ति *भवेण देसं तहा णियदं* भवप्रत्ययेन योऽवधिर्देवनारकाणां स देशावधिरेव नियमेनेत्यभिप्रायः॥ ४४॥

विउलमदी पुण णाणं अज्जवणाणं च दुविह मणणाणं। 卐
एदे संजमलद्धी उवओगे अप्पमत्तस्स॥ ४५॥

मणणाणं अयमात्मा पुनः मनःपर्ययज्ञानावरणीयक्षयोपशमे सति परकीयमनोगतं मूर्तं वस्तु यत्प्रत्यक्षेण जानाति तन्मनःपर्ययज्ञानम्। तच्च कतिविधं? *विउलमदी पुण णाणं अज्जवणाणं च दुविह* ऋजुमतिविपुलमतिभेदेन द्विविधं मनःपर्ययज्ञानं, तत्र विपुलमतिज्ञानं परकीयमनोवचनकायगतमर्थं वक्रावक्रं जानाति, ऋजुमतिश्च प्राञ्जलमेव निर्विकारात्मोपलब्धिभावनासहितानां चरमदेहमुनीनां

रसास्वाद से समरसी भावरूप परिणत चरमशरीरी तपोधनों के होते हैं।

वैसा ही कहा है – 'परमावधि, सर्वावधि चरमशरीरी विरत के होते हैं।'

तिण्णिवि गुणेण णियमा ये तीनों ही अवधिज्ञान निश्चय से विशिष्ट सम्यक्त्वादि गुण से होते हैं। ***भवेण देसं तहा णियदं*** देव और नारकियों का जो भवप्रत्ययरूप अवधिज्ञान है, वह नियम से देशावधि है – ऐसा अभिप्राय है॥ ४४॥

है मनःपर्यय द्विविध ऋजुमति, व विपुलमति ज्ञान से।
होता सदा उपयोग, संयमलब्धियुत अप्रमत्त के॥ ४५॥

गाथार्थ – मनःपर्ययज्ञान ऋजुमति और विपुलमति के भेद से दो प्रकार का है तथा संयमलब्धियुक्त अप्रमत्त जीव के विशुद्ध परिणाम में होता है।

टीकार्थ – ***मणणाणं*** यह आत्मा मनःपर्ययज्ञानावरण का क्षयोपशम होने पर परकीय मनोगत मूर्त वस्तु को जिस प्रत्यक्ष से जानता है, वह मनःपर्ययज्ञान है। वह कितने प्रकार का है? ***विउलमदी पुण णाणं अज्जवणाणं च दुविह मणणाणं*** ऋजुमति और विपुलमति के भेद से मनःपर्ययज्ञान दो प्रकार का है; वहाँ विपुलमतिज्ञान परकीय मन-वचन-काय सम्बन्धी वक्रावक्र (वक्र और सीधे) पदार्थ को जानता है और ऋजुमति प्राञ्जल (सीधे) को ही जानता है। विपुलमति निर्विकार आत्मोपलब्धि-भावना से सहित चरम शरीरी मुनियों के होता है। ***एदे संजमलद्धी*** दोनों मनःपर्ययज्ञान, संयमलब्धिरूप उपेक्षा संयम के होने पर होते हैं; वे दोनों

विपुलमतिर्भवति *एदे संजमलद्धी* एतौ मनःपर्ययौ संयमलब्धी उपेक्षासंयमे सति लब्धिर्ययोस्तौ संयमलब्धी मनःपर्ययौ भवतः। तौ च कस्मिन् काले समुत्पद्येते? *उवओगे* उपयोगे विशुद्धपरिणामे। कस्य? *अप्पमत्तस्स* वीतरागात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानभावनासहितस्य *'विकहा तहा कसाया'* इत्यादि गाथोक्तपञ्चदशप्रमादरहितस्याप्रमत्तमुनेरिति। अत्रोत्पत्तिकाल एवाप्रमत्तनियमः पश्चात्प्रमत्तस्यापि संभवतीति भावार्थः॥ ४५॥

णाणं णेयणिमित्तं केवलणाणं ण होदि सुदणाणं।
णेयं केवलणाणं णाणाणाणं च णत्थि केवलिणो॥ ४६॥

केवलणाणं णाणं णेयणिमित्तं ण होदि केवलज्ञानं यज्ज्ञानं तद्घटपटादिज्ञेयार्थमाश्रित्य नोत्पद्यते। तर्हि श्रुतज्ञानस्वरूपं भविष्यति? *ण होदि सुदणाणं* यथा केवलज्ञानं ज्ञेयनिमित्तं न भवति तथा श्रुतज्ञानस्वरूपमपि न भवति *णेयं केवलणाणं* एवं पूर्वोक्तप्रकारेण ज्ञेयं ज्ञातव्यं केवलज्ञानम्। अयमत्रार्थः – यद्यपि दिव्यध्वनिकाले तदाधारेण गणधरदेवादीनां श्रुतज्ञानं परिणमति तथापि तच्छ्रुतज्ञानं

संयमलब्धी हैं जिनके, वे संयमलब्धिवान हैं, उन्हें मनःपर्ययज्ञान होते हैं। वे दोनों किस समय उत्पन्न होते हैं? ***उवओगे*** उपयोग में, विशुद्धपरिणाम में उत्पन्न होते हैं। वे किसे होते हैं? ***अप्पमत्तस्स*** वीतरागी आत्मतत्त्व की सम्यक् श्रद्धान-ज्ञान-अनुष्ठानरूप भावना से सहित तथा **'विकथा, कषाय...'** इत्यादि गाथा में कहे गए पन्द्रह प्रमादों से रहित अप्रमत्त मुनि के होते हैं। यहाँ उत्पत्ति के समय ही अप्रमत्त का नियम है, बाद में प्रमत्त के भी रहता है – ऐसा भावार्थ है॥ ४५॥

है ज्ञेय से निरपेक्ष केवलज्ञान, श्रुतमय है नहीं।
वह जानता सकलार्थ, ज्ञानाज्ञान केवलि के नहीं॥ ४६॥

गाथार्थ - केवलज्ञान, ज्ञेयनिमित्तक ज्ञान नहीं है; तथापि वह श्रुतज्ञान भी नहीं है; सम्पूर्ण ज्ञेयों को जाननेवाला केवलज्ञान है। केवली के कथञ्चित् ज्ञानाज्ञान नहीं है (सर्वथा ज्ञान ही है)।

टीकार्थ - ***केवलणाणं णाणं णेयणिमित्तं ण होदि*** केवलज्ञानरूप जो ज्ञान है, वह घट-पट आदि ज्ञेयपदार्थ का आश्रय लेकर उत्पन्न नहीं होता है। तब फिर वह श्रुतज्ञानस्वरूप होगा? ***ण होदि सुदणाणं*** जैसे केवलज्ञान ज्ञेयनिमित्तक नहीं है; उसी प्रकार श्रुतज्ञानस्वरूप भी नहीं है। ***णेयं केवलणाणं*** इस प्रकार पूर्वोक्त प्रकार से केवलज्ञान जानना चाहिए।

यहाँ अर्थ यह है – यद्यपि दिव्यध्वनि के समय उसके आधार से गणधरदेवादि के श्रुतज्ञान परिणमित होता है; तथापि वह श्रुतज्ञान, गणधरदेव के ही है; केवली के तो केवलज्ञान ही है।

गणधरदेवादीनामेव न च केवलिनां केवलज्ञानमेव *णाणाणाणं च णत्थि केवलिणो* न केवलं श्रुतज्ञानं नास्ति, केवलिनां ज्ञानाज्ञानं च नास्ति, क्वापि विषये ज्ञानं क्वापि विषये पुनरज्ञानमेव न, किंतु सर्वत्र ज्ञानमेव, अथवा मतिज्ञानादिभेदेन नानाभेदं ज्ञानं नास्ति, किंतु केवलज्ञानमेकमेवेति।

अत्र मतिज्ञानादिभेदेन यानि पञ्चज्ञानानि व्याख्यातानि तानि व्यवहारेणेति, निश्चयेनाखण्डैक-ज्ञानप्रतिभास एवात्मा निर्मेघादित्यवदिति भावार्थः॥ ४६॥

एवं मत्यादिपञ्चज्ञानव्याख्यानरूपेण गाथापञ्चकं गतम्।

अथाज्ञानत्रयं कथयति —

मिच्छत्ता अण्णाणं अविरदिभावो य भावआवरणा। 卐
णेयं पडुच्च काले तह दुण्णय दुप्पमाणं च॥ ४७॥

मिच्छत्ता अण्णाणं द्रव्यमिथ्यात्वोदयात्सकाशाद्भवतीति क्रियाध्याहारः। किं भवति? *अण्णाणं अविरदिभावो य* ज्ञानमप्यज्ञानं भवति अत्राज्ञानशब्देन कुमत्यादित्रयं ग्राह्यम्। न केवलमज्ञानं भवति?

णाणाणाणं च णत्थि केवलिणो केवली के मात्र श्रुतज्ञान ही नहीं है; इतना ही नहीं; अपितु उनके ज्ञानाज्ञान भी नहीं है; किसी विषय सम्बन्धी ज्ञान और किसी विषय सम्बन्धी अज्ञान हो, ऐसा उनके नहीं है; अपितु सर्वत्र ज्ञान ही है / वे सकलज्ञ हैं; अथवा मतिज्ञानादि के भेद से अनेक भेदवाला ज्ञान उनके नहीं है; मात्र एक केवलज्ञान ही है।

यहाँ मतिज्ञानादि भेद से जो पाँच प्रकार के ज्ञानों का व्याख्यान किया, वे व्यवहार से हैं; निश्चय से मेघावरणरहित सूर्य के समान आत्मा अखण्ड एक ज्ञान प्रतिभासमय है – यह भावार्थ है॥ ४६॥

इस प्रकार मतिज्ञानादि पाँच ज्ञान के व्याख्यानरूप से पाँच गाथाएँ पूर्ण हुईं।

अब, तीन अज्ञानों को कहते हैं –

अज्ञान अविरति भाव भी मिथ्यात्व भावावरण से।
मिथ्या सभी सब ज्ञान दुर्नय दुष्प्रमाण कहे गए॥ ४७॥

गाथार्थ - मिथ्यात्व के कारण भाव आवरण से अज्ञान और अविरतिभाव, मिथ्यात्वरूप हो जाते हैं; ज्ञेयों को जानते समय (सभी नय) दुर्नय तथा (सभी प्रमाण) दुष्प्रमाण कहलाते हैं।

टीकार्थ - ***मिच्छत्ता अण्णाणं*** द्रव्य मिथ्यात्व के उदय से होता है – इस प्रकार यहाँ यह क्रिया अध्याहार है (ऊपर से लगा लेना); उससे क्या हो जाता है? ***अण्णाणं अविरदिभावो***

अविरतिभावश्च अव्रतपरिणामश्च। कथंभूतान्मिथ्यात्वोदयादज्ञानमविरतिभावश्च भवति? *भाव-आवरणा* भावस्तत्त्वार्थश्रद्धानलक्षणं भावसम्यक्त्वं तस्यावरणं झंपनं भावावरणं तस्माद्भावावरणा-द्भावमिथ्यात्वादित्यर्थः। पुनरपि किं भवति मिथ्यात्वात्? *तह दुण्णय दुप्पमाणं च* यथैवाज्ञानमविरति-भावश्च भवति तथा सुनयो दुर्नयो भवति प्रमाणं दुःप्रमाणं च भवति। कदा भवति? *काले* तत्त्वविचार-काले? किं कृत्वा? *पडुच्च* प्रतीत्याश्रित्य। किमाश्रित्य? *णेयं* ज्ञेयभूतं जीवादिवस्त्विति।

अत्र मिथ्यात्वाद्विपरीतं तत्त्वार्थश्रद्धानरूपं निश्चयसम्यक्त्वकारणभूतं व्यवहारसम्यक्त्वं तस्य फलभूतं निर्विकारशुद्धात्मानुभूतिलक्षणं निश्चयसम्यक्त्वं चोपादेयं भवतीति भावार्थः॥ ४७॥

अथ दर्शनोपयोगभेदानां संज्ञां स्वरूपं च प्रतिपादयति —

दंसणमवि चक्खुजुदं अचक्खुजुदमवि य ओहिणा सहियं।(४२)
अणिधणमणंतविसयं केवलियं चावि पण्णत्तं॥ ४८॥

य ज्ञान भी अज्ञान हो जाता है। यहाँ अज्ञान शब्द से कुमति आदि तीन ग्रहण करना चाहिए। मात्र अज्ञान ही नहीं होता है; अपितु अविरतिभाव अव्रतपरिणाम हो जाता है। कैसे मिथ्यात्व के उदय से अज्ञान और अविरतिभाव होते हैं? ***भावावरणा*** तत्त्वार्थ – श्रद्धान लक्षणरूप भाव अर्थात् भावसम्यक्त्व, उसका आवरण झम्पन भावावरण है; उस भावावरण से, भावमिथ्यात्व से सहित; मिथ्यात्व के उदय से अज्ञान और अविरतिभाव होते हैं – ऐसा अर्थ है। उस मिथ्यात्व से और क्या होता है? ***तह दुण्णय दुप्पमाणं च*** जिस प्रकार अज्ञान और अविरतिभाव होता है; उसी प्रकार सुनय, दुर्नय हो जाते हैं तथा प्रमाण, दुष्प्रमाण हो जाते हैं। ये ऐसे कब हो जाते हैं? ***काले*** तत्त्वविचार के समय हो जाते हैं। क्या कर हो जाते हैं? ***पडुच्च*** आश्रय लेकर हो जाते हैं। किसका आश्रय लेकर हो जाते हैं? ***णेयं*** ज्ञेयभूत जीवादि वस्तुओं का आश्रय लेकर हो जाते हैं।

यहाँ मिथ्यात्व से विपरीत तत्त्वार्थ - श्रद्धानरूप निश्चय-सम्यक्त्व का कारणभूत व्यवहार-सम्यक्त्व और उसका फलभूत निर्विकार शुद्धात्मानुभूति लक्षण निश्चय-सम्यक्त्व ही उपादेय है – यह भावार्थ है॥ ४७॥

अब, दर्शनोपयोग के भेदों का नाम और स्वरूप प्रतिपादित करते हैं –

दर्शन कहा चक्षु अचक्षु, अवधिदर्शन भी कहा।
अनिधन अनंत विषयमयी, कैवल्यदर्शन है कहा॥ ४८॥

गाथार्थ - दर्शन भी चक्षुदर्शन, अचक्षुदर्शन, अवधिदर्शन और अनिधन / अविनाशी अनन्त विषयवाले केवलदर्शन के भेद से चार प्रकार का कहा गया है।

चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं केवलदर्शनमिति दर्शनोपयोगभेदानां नामानि। अयमात्मा निश्चयनयेनानंताखण्डैकदर्शनस्वभावोऽपि व्यवहारनयेन संसारावस्थायां निर्मलशुद्धात्मानुभूत्यभावोपार्जितेन कर्मणा झंपितः सन् चक्षुर्दर्शनावरणक्षयोपशमे सति बहिरंगचक्षुर्द्रव्येन्द्रियावलंबनेन यन्मूर्तं वस्तु निर्विकल्पसत्तावलोकेन पश्यति तच्चक्षुर्दर्शनं, शेषेन्द्रियनोइन्द्रियावरणक्षयोपशमे सति बहिरंगद्रव्येन्द्रियद्रव्यमनोऽवलम्बनेन यन्मूर्तामूर्तं च वस्तु निर्विकल्पसत्तावलोकेन यथासंभवं पश्यति तदचक्षुर्दर्शनं, स एवात्मावधिदर्शनावरणक्षयोपशमे सति यन्मूर्तं वस्तु निर्विकल्पसत्तावलोकेन प्रत्यक्षं पश्यति तदवधिदर्शनं, रागादिदोषरहितचिदानन्दैकस्वभावनिजशुद्धात्मानुभूतिलक्षणनिर्विकल्पध्यानेन निरवशेष-केवलदर्शनावरणक्षये सति जगत्त्रयकालत्रयवर्तिवस्तुगतसत्तासामान्यमेकसमयेन पश्यति तदनिधनमनंतविषयं स्वाभाविकं केवलदर्शनं भवतीति।

अत्र केवलदर्शनाबिनाभूतानंतगुणाधारः शुद्धजीवास्तिकाय एवोपादेय इत्यभिप्रायः॥ ४८॥

एवं दर्शनोपयोगव्याख्यानमुख्यत्वेन गाथा गता।

अथात्मनो ज्ञानादिगुणैः सह संज्ञालक्षणप्रयोजनादिभेदेऽपि निश्चयेन प्रदेशाभिन्नत्वं मत्याद्यनेक-

टीकार्थ - चक्षुदर्शन, अचक्षुदर्शन, अवधिदर्शन, केवलदर्शन – ये दर्शनोपयोग के भेदों के नाम हैं। यह आत्मा निश्चयनय से अनन्त अखण्ड एक दर्शनस्वभावी होने पर भी व्यवहारनय से संसार अवस्था में निर्मल शुद्धात्मानुभूति के अभाव में उपार्जित कर्म द्वारा झम्पित होता हुआ चक्षुदर्शनावरण का क्षयोपशम होने पर और बहिरङ्ग चक्षुरूप द्रव्यइन्द्रिय का अवलम्बन होने पर जो मूर्त वस्तु को निर्विकल्प सत्तावलोकनरूप से देखता है, वह चक्षुदर्शन है। शेष इन्द्रियों और नोइन्द्रिय आवरण का क्षयोपशम होने पर तथा बहिरङ्ग द्रव्यइन्द्रिय और द्रव्यमन का अवलम्बन होने पर जो मूर्त और अमूर्त वस्तु को निर्विकल्प सत्तावलोकनरूप से यथासम्भव देखता है, वह अचक्षुदर्शन है। वही आत्मा अवधिदर्शनावरण का क्षयोपशम होने पर जो मूर्त वस्तु को निर्विकल्प सत्तावलोकनरूप से प्रत्यक्ष देखता है, वह अवधिदर्शन है। रागादि दोषरहित चिदानन्द एक स्वभावी निज शुद्धात्मानुभूति लक्षण निर्विकल्प ध्यान द्वारा निरवशेष सम्पूर्ण केवलदर्शनावरण का क्षय होने पर, तीन लोक, तीन कालवर्ती वस्तुओं सम्बन्धी सामान्यसत्ता को एक समय में देखता है, वह अनिधन / अविनाशी, अनन्त विषयवान स्वाभाविक केवलदर्शन है।

यहाँ केवलदर्शन के अबिनाभावी अनन्त गुणों का आधारभूत शुद्ध जीवास्तिकाय ही उपादेय है – ऐसा अभिप्राय है॥ ४८॥

इस प्रकार दर्शनोपयोग के व्याख्यान की मुख्यता से गाथा पूर्ण हुई।

अब, आत्मा का ज्ञानादि गुणों के साथ संज्ञा, लक्षण, प्रयोजन आदि की अपेक्षा भेद होने

ज्ञानत्वं च व्यवस्थापयति सूत्रत्रयेण —

ण वियप्पदि णाणादो णाणी णाणाणि होंति णेगाणि।(४३)
तम्हा दु विस्सरूपं भणियं दवियत्ति णाणीहिं॥ ४९॥

ण वियप्पदि न विकल्पते न भेदेन पृथक् क्रियते। *कोऽसौ ? णाणी* ज्ञानी। *कस्मात्सकाशात् ? णाणादो* ज्ञानगुणात्। *तर्हि ज्ञानमप्येकं भविष्यति ? नैवं। णाणाणि होंति णेगाणि* मत्यादिज्ञानानि भवन्त्यनेकानि यस्मादनेकानि ज्ञानानि भवन्ति *तम्हा दु विस्सरूपं भणियं* तस्मात्कारणादनेकज्ञान-गुणापेक्षया विश्वरूपं भणितम्। *किं ? दवियत्ति* जीवद्रव्यमिति। *कैर्भणितं ? णाणीहिं* हेयोपादेयतत्त्व-विचारज्ञानिभिरिति।

तथाहि – एकास्तित्वनिर्वृत्तत्वेनैकद्रव्यत्वात्, एकप्रदेशनिर्वृत्तत्वेनैकक्षेत्रत्वात्, एकसमयनिर्वृत्त-त्वेनैकत्वात्, मूर्तैकजड़स्वरूपत्वेनैकस्वभावत्वाच्च परमाणोर्वर्णादिगुणैः सह यथा भेदो नास्ति;

पर भी, निश्चय से प्रदेशों की अभिन्नता और मति आदि अनेक ज्ञानता को तीन गाथाओं द्वारा व्यवस्थापित करते हैं –

है ज्ञान से न भिन्न ज्ञानी, ज्ञान सभी अनेक हैं।
इसलिए ज्ञानी द्रव्य को, कहते अनेकों रूप हैं॥ ४९॥

गाथार्थ - ज्ञानी को ज्ञान से पृथक् नहीं किया जा सकता है। ज्ञान, अनेक हैं; इसलिए ज्ञानियों ने द्रव्य को विश्वरूप / अनेकरूप कहा है।

टीकार्थ - ***ण वियप्पदि*** विकल्पित नहीं होता, भेद से पृथक् नहीं किया जा सकता। वह कौन पृथक् नहीं किया जा सकता? ***णाणी*** ज्ञानी पृथक् नहीं किया जा सकता। किससे पृथक् नहीं किया जा सकता? ***णाणादो*** ज्ञानगुण से पृथक् नहीं किया जा सकता।

प्रश्न - तब तो फिर ज्ञान भी एक होगा?

उत्तर - ऐसा नहीं है। ***णाणाणि होंति णेगाणि*** मति आदि ज्ञान अनेक हैं, जिस कारण ज्ञान अनेक होते हैं; ***तम्हा दु विस्सरूपं भणियं*** उस कारण अनेक ज्ञानगुण की अपेक्षा विश्वरूप, अनेकरूप कहा गया है। कौन कहा गया है? ***दवियत्ति*** जीवद्रव्य कहा गया है। किनके द्वारा कहा गया है? ***णाणीहिं*** हेयोपादेय-विचारक ज्ञानियों द्वारा कहा गया है।

वह इस प्रकार - एक अस्तित्व से रचित होने के कारण एक द्रव्यत्व होने से, एक प्रदेश से रचित होने के कारण एक क्षेत्रत्व होने से, एक समय से रचित होने के कारण एक कालत्व होने से, मूर्त एक जड़स्वरूप होने के कारण एक स्वभावत्व होने से, जैसे परमाणु का वर्णादि गुणों

तथैवैकास्तित्वनिर्वृत्तत्वेनैकद्रव्यत्वात्, लोकाकाशप्रमितासंख्येयाखण्डैकप्रदेशत्वेनैकक्षेत्रत्वात्, एक-समयनिर्वृत्तत्वेनैककालत्वात्, एकचैतन्यनिर्वृत्तत्वेनैकस्वभावत्वाच्च ज्ञानादिगुणैः सह जीवद्रव्यस्यापि भेदो नास्ति; अथवा शुद्धजीवापेक्षया शुद्धैकास्तित्वनिर्वृत्तत्वेनैकद्रव्यत्वात्, लोकाकाशप्रमितासंख्येया-खण्डैकप्रदेशत्वेनैकक्षेत्रत्वात्, निर्विकारचिच्चमत्कारमात्रपरिणतिरूपवर्तमानैकसमयनिर्वृत्तत्वेनैक-कालत्वात्, निर्मलैकचिज्ज्योतिः स्वरूपेणैकस्वभावत्वात् च सकलविमलकेवलज्ञानाद्यनंतगुणैः सह शुद्धजीवस्यापि भेदो नास्तीति भावार्थः ॥ ४९ ॥

अथ द्रव्यस्य गुणेभ्य एकांतेन प्रदेशास्तित्वभेदे सति गुणानां च द्रव्याद्भेदे सति दोषं दर्शयति —

जदि हवदि दव्वमण्णं गुणदो हि गुणा य दव्वदो अण्णे। (४४)
दव्वाणंतियमहवा दव्वाभावं पकुव्वंति॥ ५०॥

जदि हवदि दव्वमण्णं यदि चेत् द्रव्यमन्यद्भवति। केभ्यः? *गुणदो हि* गुणेभ्यः *गुणा य*

के साथ भेद नहीं है; उसी प्रकार एक अस्तित्व से रचित होने के कारण एक द्रव्यत्व होने से, लोकाकाश प्रमाण असंख्येय अखण्ड एक प्रदेश होने के कारण एक क्षेत्रत्व होने से, एक समय से रचित होने के कारण एक कालत्व होने से, एक चैतन्य से रचित होने के कारण एक स्वभावत्व होने से, जीवद्रव्य का भी ज्ञानादि गुणों के साथ भेद नहीं है।

अथवा शुद्धजीव की अपेक्षा शुद्ध एक अस्तित्व से रचित होने के कारण एक द्रव्यत्व होने से, लोकाकाशप्रमाण असंख्येय अखण्ड एक शुद्ध प्रदेशत्व होने के कारण एक क्षेत्रत्व होने से, निर्विकार चित् चमत्कारमात्र परिणतिरूप वर्तमान एक समय से रचित होने के कारण एक कालत्व होने से और निर्मल एक चित् ज्योतिस्वरूप होने के कारण एक स्वभावत्व होने से सकल-विमल केवलज्ञानादि अनन्त गुणों के साथ शुद्ध जीव का भी भेद नहीं है – ऐसा भावार्थ है॥ ४९ ॥

अब, द्रव्य का गुणों से सर्वथा प्रदेशास्तित्वरूप भेद होने पर तथा गुणों का द्रव्य से भेद होने पर दोष दिखाते हैं –

हो द्रव्य गुण से अन्य या, फिर द्रव्य से गुण अन्य हों।
तो द्रव्य की हो अनंतता या, द्रव्य का ही नाश हो॥ ५०॥

गाथार्थ - यदि द्रव्य, गुण से (सर्वथा) अन्य हो तथा गुण, द्रव्य से अन्य हों तो (या तो) द्रव्य की अनन्तता होगी या द्रव्य का अभाव हो जाएगा।

टीकार्थ - ***जदि हवदि दव्वमण्णं*** यदि द्रव्य अन्य है। किससे अन्य है? ***गुणदो हि*** गुणों से अन्य है। ***गुणा य दव्वदो अण्णे*** और यदि गुण, द्रव्य से अन्य, भिन्न हैं, तब क्या दोष

दव्वदो *अण्णे* गुणाश्च द्रव्यतो यद्यन्ये भिन्ना भवन्ति। तदा किं दूषणं ? *दव्वाणंतियं* गुणेभ्यो द्रव्यस्य भेदे सत्येकद्रव्यस्यापि आनंत्यं प्राप्नोति *अहवा दव्वाभावं पकुव्वंति* अथवा द्रव्यात्सकाशाद्यद्यन्ये भिन्ना गुणा भवन्ति तदा द्रव्यस्याभावं प्रकुर्वंतीति।

तद्यथा – गुणाः साश्रया वा निराश्रया वा ? साश्रयपक्षे दूषणं दीयते। अनंतज्ञानादयो गुणास्तावत् क्वचिच्छुद्धात्मद्रव्ये समाश्रिताः यत्रात्मद्रव्ये समाश्रिताः तदन्यदगुणेभ्यश्चेत् पुनरपि क्वचिज्जीवद्रव्यांतरे समाश्रितास्तदप्यन्यद्गुणेभ्यश्चेत् पुनरपि क्वचिदात्मद्रव्यांतरे समाश्रिता। एवं शुद्धात्मद्रव्यादनंतज्ञानादि-गुणानां भेदे सति भवति शुद्धात्मद्रव्यानंत्यम्। अथोपादेयभूतपरमात्मद्रव्ये गुणगुणिभेदे सति द्रव्यानंत्यं व्याख्यातं तथा हेयभूताशुद्धजीवद्रव्येऽपि पुद्गलादिष्वपि योजनीयम् अथवा गुणगुणिभेदैकांते सति विवक्षिताविवक्षितैकैकगुणस्य विवक्षिताविवक्षितैकैकद्रव्याधारे सति भवति द्रव्यानंत्यम्। द्रव्यात्सका-शान्निराश्रयभिन्नगुणानां भेदे द्रव्याभावः कथ्यते गुणानां समुदायो द्रव्यं भण्यते गुणसमुदायरूपद्रव्या-द्गुणानां भेदैकांते सति गुणसमुदायरूपं द्रव्यं क्वास्ति ? न क्वापीति भावार्थः ॥ ५० ॥

होगा ? ***दव्वाणंतियं*** गुणों से द्रव्य का भेद होने पर एक द्रव्य के ही अनन्तता प्राप्त होती है; ***अहवा दव्वाभावं पकुव्वंति*** अथवा यदि द्रव्य से गुण भिन्न होते हैं तो द्रव्य का अभाव हो जाता है।

वह इस प्रकार – गुण आश्रयसहित हैं या आश्रयरहित हैं। आश्रयसहित के पक्ष में दोष देते हैं - अनन्त ज्ञानादि गुण किसी शुद्धात्मद्रव्य में समाश्रित हैं। जिस आत्मद्रव्य में वे समाश्रित हैं, वह यदि गुणों से भिन्न हो गया तो वे और किसी दूसरे जीवद्रव्य में समाश्रित होंगे; वह भी यदि गुणों से भिन्न हो गया तो पुनरपि वे किसी अन्य आत्मद्रव्य में समाश्रित होंगे – इस प्रकार शुद्धात्मद्रव्य में अनन्त ज्ञानादि गुणों का भेद होने पर (एक ही) शुद्धात्मद्रव्य के अनन्तता आ जाएगी।

जिस प्रकार उपादेयभूत परमात्मद्रव्य में गुण-गुणी का भेद होने पर द्रव्य की अनन्तता का व्याख्यान किया; उसी प्रकार हेयभूत अशुद्ध जीवद्रव्य में भी तथा पुद्गलादि में भी लगा लेना चाहिए।

अथवा गुण-गुणी भेद का एकान्त होने पर, विवक्षित-अविवक्षित एक-एक गुण का विवक्षित-अविवक्षित एक-एक द्रव्य आधार होने पर द्रव्य के अनन्तता होती है।

अब, द्रव्य के आश्रय से रहित भिन्न गुणों के भेद में द्रव्य का अभाव कहते हैं – गुणों का समुदाय, द्रव्य कहलाता है। गुण समुदायरूप द्रव्य से गुणों का एकान्त (सर्वथा) भेद होने पर, गुण समुदायरूप द्रव्य कहाँ रहा ? कहीं भी नहीं यह भावार्थ है॥ ५० ॥

द्रव्यगुणानां यथोचितमभिन्नप्रदेशमनन्यत्वं प्रदर्शयति —

अविभत्तमणण्णत्तं दव्वगुणाणं विभत्तमण्णत्तं। (४५)
णेच्छंति णिच्चयण्हू तव्विवरीदं हि वा तेसिं॥ ५१॥

अविभत्तमणण्णत्तं अविभक्तमनन्यत्वं मन्यत इति क्रियाध्याहारः। केषां ? *दव्वगुणाणं* द्रव्य-गुणानामिति। तथाहि — यथा परमाणोर्वर्णादिगुणैः सहानन्यत्वमभिन्नत्वम्। कथंभूतं तत् ? अविभक्त-मभिन्नप्रदेशत्वं तथा शुद्धजीवद्रव्ये केवलज्ञानादिव्यक्तिरूपः स्वभावगुणानां तथैवाशुद्धजीवे मतिज्ञानादि-व्यक्तिरूपविभावगुणानां शेषद्रव्याणां गुणानां च यथासंभवमभिन्नप्रदेशलक्षणमनन्यत्वं ज्ञातव्यं *विभत्तमण्णत्तं णेच्छंति* विभक्तमन्यत्वं नेच्छन्ति। तद्यथा — अन्यत्वं भिन्नत्वं न मन्यंते। कथंभूतं तत् ? विभक्तं भिन्नप्रदेशं सह्यविंध्ययोरिव। के नेच्छन्ति ? *णिच्चयण्हू* निश्चयज्ञा जैनाः न केवलं भिन्नप्रदेश-मन्यत्वं नेच्छन्ति *तव्विवरीदं हि वा* तद्विपरीतं वा *तेसिं* तेषां द्रव्यगुणानां तस्मादन्यत्वाद्विपरीतं

अब, द्रव्य-गुणों के यथोचित (कथञ्चित्) अभिन्न प्रदेशरूप अनन्यता प्रदर्शित करते हैं —

वस्तुज्ञ को गुण द्रव्य की, अविभक्तरूप अनन्यता।
है मान्य पर न मान्य है, सविभक्त अन्यानन्यता॥ ५१॥

गाथार्थ - द्रव्य और गुणों के अविभक्तरूप अनन्यता है। निश्चय के ज्ञाता उनके (द्रव्य -गुणों के) विभक्तरूप अन्यता या उससे विपरीत विभक्तरूप अनन्यता स्वीकार नहीं करते हैं।

टीकार्थ - ***अविभत्तमणण्णत्तं*** अविभक्तरूप अनन्यता मानते हैं — इस प्रकार क्रिया अध्याहार है (ऊपर से ले लेना)। किनकी मानते हैं ? ***दव्वगुणाणं*** द्रव्य-गुणों की मानते हैं। वह इस प्रकार — जैसे परमाणु का वर्णादि गुणों के साथ अनन्यत्व, अभिन्नत्व है। वह अभिन्नत्व कैसा है ? वह अविभक्तरूप अभिन्न प्रदेशत्व है; उसी प्रकार शुद्ध जीवद्रव्य में केवलज्ञानादि की व्यक्ति / प्रगटतारूप स्वभावगुणों का, अशुद्ध जीव में मतिज्ञानादि की व्यक्तिरूप विभावगुणों का और शेष द्रव्यों-गुणों का यभासम्भव अभिन्न प्रदेश लक्षण अनन्यत्व जानना चाहिए।

विभत्तमण्णत्तं णेच्छन्ति विभक्तरूप अन्यत्व नहीं मानते हैं। वह इस प्रकार-अन्यत्व, भिन्नत्व नहीं मानते हैं। वह कैसा नहीं मानते हैं ? सह्य और विन्ध्य के समान विभक्तरूप भिन्न प्रदेश नहीं मानते हैं। कौन नहीं मानते हैं ? ***णिच्चयण्हू*** निश्चय को जाननेवाले जैन नहीं मानते हैं। वे मात्र भिन्न प्रदेशरूप अन्यत्व नहीं मानते; इतना ही नहीं; अपितु ***तव्विवरीदं हि वा*** उससे विपरीत भी ***तेसिं*** उन द्रव्य-गुणों का नहीं मानते हैं; उससे अन्य होने के कारण विपरीत, तद्विपरीत; इसका अनन्यत्व ऐसा अर्थ है। वह किस विशेषतावाला होने पर भी नहीं मानते हैं ?

तद्विपरीतमनन्यत्वमित्यर्थः। तदपि किं विशिष्टं नेच्छन्ति? एकक्षेत्रावगाहेऽपि भिन्नतोयपयसोरिव। कस्मान्नैच्छंतीति चेत्सह्यविंध्ययोरिव तोयपयसोरिव तेषां द्रव्यगुणानां भिन्नप्रदेशाभावादिति।

अथवा अनन्यत्वमभिन्नत्वं नेच्छन्ति द्रव्यगुणानाम्। कथंभूतं तत्? अविभक्तं एकान्तेन यथा प्रदेशरूपेणाभिन्नं तथा संज्ञादिरूपेणाप्यभिन्नं नेच्छन्ति। न केवलमित्थंभूतं अनन्यत्वं नेच्छन्ति। अन्यत्वं भिन्नत्वमपि नेच्छंति। कथंभूतं? विभक्तं एकांतेन यथा संज्ञादिरूपेण भिन्नं तथा प्रदेशरूपेणापि भिन्नम्। न केवलमेकांतेनानन्यत्वमन्यत्वं च नेच्छंति *तव्विवरीदे हि वा तेसिं* इति पाठांतरं तद्विपरीताभ्यां वा ताभ्यां द्रव्यगुणानामनन्यत्वान्यत्वे नेच्छन्ति किंतु परस्परसापेक्षत्वेनेच्छंतीत्यर्थः।

अत्र गाथासूत्रे विशुद्धज्ञानदर्शनस्वभावात्मतत्त्वादन्यत्वरूपा ये विषयकषायास्तै रहितानां तस्मादेव परमचैतन्यरूपात् परमात्मतत्त्वात् यदनन्यत्वस्वरूपं निर्विकल्पपरमाह्लादैकरूपसुखामृतरसा-

भिन्न (स्वभावी) दूध-पानी के समान, एक क्षेत्रावगाह होने पर भी भिन्न प्रदेश नहीं मानते हैं। वे ऐसा क्यों नहीं मानते हैं? यदि ऐसा प्रश्न हो तो कहते हैं – सह्य-विन्ध्य के समान, दूध-पानी के समान, उन द्रव्य-गुणों के भिन्न प्रदेशों का अभाव होने से, वे ऐसा नहीं मानते हैं।

अथवा द्रव्य-गुणों का सर्वथा अनन्यत्व, अभिन्नत्व नहीं मानते हैं। किसरूप में नहीं मानते हैं? जैसे वे प्रदेशों की अपेक्षा अभिन्न हैं; उसी प्रकार संज्ञा आदि की अपेक्षा भी अभिन्न हैं – ऐसा एकान्त / सर्वथा अविभक्त नहीं मानते हैं। मात्र इस प्रकार का अनन्यत्व नहीं मानते, इतना ही नहीं; अपितु अन्यत्व, भिन्नत्व भी नहीं मानते हैं। वह किसरूप में नहीं मानते हैं? जैसे संज्ञादि की अपेक्षा भिन्न हैं; उसी प्रकार प्रदेशों की अपेक्षा भी भिन्न हैं – इस प्रकार एकान्त / सर्वथा विभक्त नहीं मानते हैं। मात्र सर्वथा अनन्यत्व-अन्यत्व नहीं मानते हैं, इतना ही नहीं; अपितु ***तव्विवरीदे हि वा तेसिं*** इस प्रकार पाठान्तर होने से, उन दोनों से विपरीत अथवा परस्पर सापेक्ष अनन्यत्व-अन्यत्व से विपरीत, निरपेक्ष नहीं मानते हैं; उन दोनों से विपरीत तद्विपरीत (तृतीया तत्पुरुष) अथवा उन दोनों विपरीतों से – ऐसा विश्लेषण कर, उन द्रव्य-गुणों का सर्वथा अनन्यत्व-अन्यत्व नहीं मानते हैं; किन्तु परस्पर सापेक्षरूप से स्वीकार करते हैं – ऐसा अर्थ है।

यहाँ इस गाथा-सूत्र में विशुद्ध ज्ञान-दर्शन स्वभावी आत्मतत्त्व से अन्यत्वरूप जो विषय-कषाय हैं, उनसे रहित तथा उसी परम चैतन्यरूप परमात्मतत्त्व से जो अनन्यत्वस्वरूप निर्विकल्प, परमाह्लाद, एकरूप सुखामृतरसमय आस्वाद अनुभवन, उससे सहित पुरुषों को जो लोकाकाशप्रमाण असंख्येय शुद्ध प्रदेशों के साथ केवलज्ञानादि गुणों का अनन्यत्व है, वह ही उपादेय है – ऐसा भावार्थ है॥ ५१॥

स्वादानुभवनं तत्सहितानां च पुरुषाणां यदेव लोकाकाशप्रमितासंख्येयशुद्धप्रदेशैः सह केवलज्ञानादि-गुणानामनन्यत्वं तदेवोपादेयमिति भावार्थः ॥ ५१ ॥

इति गुणगुणिनोः संक्षेपेण भेदाभेदव्याख्यानमुख्यत्वेन गाथात्रयं गतम्।

अथ व्यपदेशादयो द्रव्यगुणानामेकांतेन भिन्नत्वं न साधयंतीति समर्थयति —

ववदेसा संठाणा संखा विसया य होंति ते बहुगा। (४६)
ते तेसिमणण्णत्ते अण्णत्ते चावि विज्जंते॥ ५२॥

ववदेसा संठाणा संखा विसया य व्यपदेशाः संस्थानानि संख्या विषयाश्च *होंति* भवन्ति *ते* ते पूर्वोक्तव्यपदेशादयः। कतिसंख्योपेताः ? *बहुगा* प्रत्येकं बहवः *ते तेसिमणण्णत्ते विज्जंते* ते व्यपदेशा-दयस्तेषां द्रव्यगुणानां कथंचिदनन्यत्वे विद्यंते। न केवलमनन्यत्वे विद्यंते। *अण्णत्ते चावि* कथंचिदन्यत्वे चापि। नैयायिकाः किल वदन्ति द्रव्यगुणानां यद्येकांतेन भेदो नास्ति तर्हि व्यपदेशादयो न घटंते ? तत्रोत्तरमाहुः — द्रव्यगुणानां कथंचिद्भेदे तथैवाभदेऽपि व्यपदेशादयः संतीति।

इस प्रकार संक्षेप में गुण-गुणी के भेदाभेद व्याख्यान की मुख्यता से तीन गाथाएँ पूर्ण हुईं।

अब, द्रव्य-गुणों के व्यपदेश (नाम) आदि भी (उनमें) एकान्त (सर्वथा) भिन्नत्व सिद्ध नहीं करते हैं; इसका समर्थन करते हैं —

व्यपदेश व संस्थान संख्या, विषय बहुधा हैं कहे।
विद्यमान हैं तो भी अनन्यता, अन्यता उन सभी के॥ ५२॥

गाथार्थ - वे व्यपदेश, संस्थान, संख्या और विषय अनेक हैं; तथापि वे उनके (द्रव्य-गुणों के) अनन्यत्व-अन्यत्व में भी विद्यमान रहते हैं।

टीकार्थ - ***ववदेसा संठाणा संखा विसया य*** व्यपदेश (नाम), संस्थान (आकार), संख्या और विषयवाले ***होंति*** हैं, ***ते*** वे पूर्वोक्त व्यपदेश आदि। वे कितनी संख्यासहित हैं ? ***बहुगा*** प्रत्येक अनेक संख्यासहित हैं। ***ते तेसिमणण्णत्ते विज्जन्ते*** उन द्रव्य-गुणों के वे व्यपदेश आदि कथञ्चित् अनन्यत्व हैं, मात्र अनन्यत्व ही नहीं हैं; अपितु ***अण्णत्ते चावि*** कथञ्चित् अन्यत्व भी हैं।

नैयायिक कहते हैं कि यदि द्रव्य-गुणों के एकान्त / सर्वथा भेद नहीं है तो व्यपदेशादि घटित नहीं होते हैं ? उनके प्रति उत्तर देते हैं — द्रव्य-गुणों के कथञ्चित् भेद और उसी प्रकार कथञ्चित् अभेद में भी व्यपदेशादि घटित हो जाते हैं। वह इस प्रकार —

षट्कारक के भेद से **संज्ञा** (नाम) दो प्रकार की है। देवदत्त की गाय — इस प्रकार

तद्यथा – षट्कारकभेदेन संज्ञा द्विविधा भवति देवदत्तस्य गौरित्यन्यत्वे व्यपदेशः, तथैव वृक्षस्य शाखा जीवस्यानंतज्ञानादिगुणा इत्यनन्यत्वेऽपि व्यपदेशः। कारकसंज्ञा कथ्यते - देवदत्तः कर्ता फलं कर्मतापन्नमंकुशेन करणभूतेन धनदत्ताय निमित्तं वृक्षात्सकाशाद्वाटिकायामधिकरणभूतायाम-वच्छिनोतीत्यन्यत्वे कारकसंज्ञा तथैवात्मा कर्तात्मानं कर्मतापन्नमात्मना करणभूतेनात्मने निमित्तमात्मनः सकाशादात्मन्यधिकरणभूते ध्यायतीत्यनन्यत्वेऽपि कारकसंज्ञा। दीर्घस्य देवदत्तस्य दीर्घो गौरित्यन्यत्वे संस्थानं, दीर्घस्य वृक्षस्य दीर्घशाखाभारः मूर्तद्रव्यस्य मूर्ता गुणा इत्यभेदे च संस्थानम्। संख्या कथ्यते – देवदत्तस्य दशगाव इत्यन्यत्वे संख्या, तथैव वृक्षस्य दशशाखा, द्रव्यस्यानंतगुणा इत्यभेदेऽपि। विषयः कथ्यते – गोष्ठे गावः इति भेदे विषयः तथैव द्रव्ये गुणा इत्यभेदेऽपि। एवं व्यपदेशादयो भेदाभेदाभ्यां घटंते तेन कारणेन द्रव्यगुणानामेकांतेन भेदं न साधयंतीति।

अत्र गाथायां नामकर्मोदयजनितनरनारकादिरूपव्यपदेशाभावोऽपि शुद्धजीवास्तिकायशब्देन

अन्यत्व में भी व्यपदेश (नाम) होता है; और उसी प्रकार वृक्ष की शाखा, जीव के अनन्त ज्ञानादि गुण – इस प्रकार अनन्यत्व में भी व्यपदेश होता है। यहाँ (भिन्न) कारक **संज्ञा** कहते हैं – कर्तारूप देवदत्त, कर्मता को प्राप्त फल को, करणभूत अंकुश द्वारा, (सम्प्रदान) निमित्तरूप धनदत्त के लिए, अपादानरूप वृक्ष से, अधिकरणभूत वाटिका में से तोड़ता है – इस प्रकार भिन्नता में कारक संज्ञा है; उसी प्रकार कर्तारूप आत्मा, कर्मता को प्राप्त आत्मा को, करणभूत आत्मा द्वारा, (सम्प्रदान) निमित्तरूप आत्मा के लिए, अपादानरूप आत्मा से, अधिकरणभूत आत्मा में ध्याता है – इस प्रकार अनन्यत्व में भी कारक **संज्ञा** है।

संस्थान - दीर्घ (बड़े आकारवाले) देवदत्त की दीर्घ गाय है – यह अन्यत्व में संस्थान है। दीर्घ वृक्ष का दीर्घ शाखाभार, मूर्तद्रव्य के मूर्तगुण – यह अभेद में संस्थान है।

संख्या - देवदत्त की दश गायें हैं – इस प्रकार अन्यत्व में संख्या है; उसी प्रकार वृक्ष की दश शाखा हैं, द्रव्य के अनन्त गुण हैं – इस प्रकार अभेद में भी संख्या है।

विषय - गोष्ठ (गोशाला) में गायें हैं – इस प्रकार भेद में विषय है; उसी प्रकार द्रव्य में गुण हैं – इस प्रकार अभेद में भी विषय है।

इस प्रकार व्यपदेश आदि भेदाभेद दोनों में घटित होते हैं; उस कारण वे द्रव्य-गुणों के (मध्य) एकान्त / सर्वथा भेद सिद्ध नहीं करते हैं।

यहाँ गाथा में नामकर्मोदयजनित मनुष्य-नारक आदिरूप व्यपदेश का अभाव होने पर भी, शुद्ध जीवास्तिकाय शब्द से व्यपदेश / वाच्य / कहने-योग्य; निश्चयनय से समचतुरस्र आदि

व्यपदेश्यं वाच्यं, निश्चयनयेन समचतुरस्त्रादिषट्संस्थानरहितमपि व्यवहारेण भूतपूर्वकन्यायेन किंचिदून-चरमशरीराकारेण संस्थानं, केवलज्ञानाद्यनंतगुणरूपेणानंतसंख्यानमपि लोकाकाशप्रमितासंख्येयशुद्ध-प्रदेशरूपेणासंख्यातसंख्यानं, पञ्चेन्द्रियविषयसुखरसास्वादरतानामविषयमपि पञ्चेन्द्रियविषयातीत-शुद्धात्मभावनोत्पन्नवीतरागसदानन्दैकसुखरूपसर्वात्मप्रदेशपरमसमरसीभावपरिणतध्यानविषयं च यच्छुद्धजीवास्तिकायस्वरूपं तदेवोपादेयमिति तात्पर्यम्॥ ५२॥

अथ निश्चयेन भेदाभेदोदाहरणं कथ्यते -

णाणं धणं च कुव्वदि धणिणं जह णाणिणं च दुविधेहिं।(४७)
भण्णंति तह पुधत्तं एयत्तं चावि तच्चण्हू॥ ५३॥

णाणं धणं च कुव्वदि ज्ञानं कर्तृ धनं च कर्तृ करोति। किं करोति? *धणिणं णाणिणं च* धनिनं ज्ञानिनं च करोति *दुविहेहिं* द्वाभ्यां नयाभ्यां व्यवहारनिश्चयाभ्यां *जह* यथा *भण्णंति* भणन्ति *तह* तथा। किं भणन्ति? *पुधत्तं एयत्तं चावि* पृथक्त्वमेकत्वं चापि। के भणन्ति? *तच्चण्हू* इति।

छह संस्थानों से रहित होने पर भी, भूतपूर्व प्रज्ञापन न्यायरूप व्यवहार से कुछ कम अन्तिम शरीराकार से संस्थानवाला; केवल ज्ञानादि अनन्त-गुणरूप से अनन्त संख्यावाला होने पर भी, लोकाकाश-प्रमाण शुद्ध / मात्र असंख्येय प्रदेशरूप से असंख्यात संख्यावाला; पञ्चेन्द्रिय विषयसुखरूप रसास्वाद में लीन जीवों का अविषय होने पर भी पञ्चेन्द्रिय विषयातीत शुद्धात्मभावना से उत्पन्न वीतराग सदानन्द एक सुखरूप सर्वात्मप्रदेश परम समरसीभावमय परिणत ध्यान का विषयभूत जो शुद्ध जीवास्तिकाय का स्वरूप है, वह ही उपादेय है – ऐसा तात्पर्य है॥ ५२॥

अब, निश्चय से भेदाभेद का उदाहरण कहा जाता है –

है ज्ञान से ज्ञानी तथा, धन से धनी द्विविध बनें।
पृथक्त्व व एकत्व यों ही, तत्त्वज्ञानी यों कहें॥ ५३॥

गाथार्थ - जिस प्रकार ज्ञान और धन (जीव को) ज्ञानी और धनी – दो प्रकार से करते हैं; उसी प्रकार तत्त्वज्ञ पृथक्त्व और एकत्व कहते हैं।

टीकार्थ - ***णाणं धणं च कुव्वदि*** ज्ञान और धनरूप कर्ता करते हैं। क्या करते हैं? ***धणिणं णाणिणं च*** धनी और ज्ञानी ***दुविधेहिं*** व्यवहार और निश्चय दो नयों से करते हैं, ***जह*** जैसे। ***भणन्ति*** कहते हैं ***तह*** उसी प्रकार; क्या कहते हैं? ***पुधत्तं एयत्तं चावि*** पृथक्त्व और एकत्व को भी कहते हैं। कौन कहते हैं? ***तच्चण्हू*** तत्त्वज्ञ कहते हैं।

तद्यथा – भिन्नास्तित्वनिर्वृत्तं भिन्नास्तित्वनिर्वृत्तस्य पुरुषस्य भिन्नव्यपदेशं भिन्नव्यपदेशस्य भिन्नसंस्थानं भिन्नसंस्थानस्य भिन्नसंख्यं भिन्नसंख्यस्य भिन्नविषयलब्धवृत्तिकं भिन्नविषयलब्धवृत्तिकस्य धनं कर्तृ पृथक्त्वप्रकारेण धनीति व्यपदेशं करोति यथा तथैव चाभिन्नास्तित्वनिर्वृत्तं ज्ञानमभिन्नास्तित्व-निर्वृत्तस्य पुरुषस्य अभिन्नव्यपदेशमभिन्नव्यपदेशस्य अभिन्नसंस्थानमभिन्नसंस्थानस्य अभिन्नसंख्यमभिन्न-संख्यस्य अभिन्नविषयलब्धवृत्तिकमभिन्नविषयलब्धवृत्तिकस्य ज्ञानं कर्तृ पुरुषस्यापृथक्त्वप्रकारेण ज्ञानीति व्यपदेशं करोति। दृष्टांतव्याख्यानं गतम्। तथान्यत्र दार्ष्टांतपक्षेऽपि अत्र विवक्षितद्रव्यस्य भेदेन व्यपदेशादयो भवन्ति तत्र निश्चयेन भेदो ज्ञातव्यः पूर्वगाथाकथितक्रमेण देवदत्तस्य गौरित्यादि। यत्र पुनरपि व्यपदेशादयो भवन्ति तत्र निश्चयेनाभेदो ज्ञातव्यः वृक्षस्य शाखा जीवस्य वानंतज्ञानादयो गुणा इत्यादिवदिति।

अत्र सूत्रे यदेव जीवेन सहाभिन्नव्यपदेशं अभिन्नसंस्थानं अभिन्नसंख्यं अभिन्नविषयलब्धवृत्तिकं च तज्जीवं ज्ञानिनं करोति यस्यैवालाभादनादिकालं नरनारकादिगतिषु भ्रमितोऽयं जीवो यदेव मोक्षवृक्षस्य बीजभूतं यस्यैव भावनाबलादक्रमसमाक्रांतः समस्तद्रव्यक्षेत्रकालभावजातं तस्यैव फलभूतं सकल-

वह इस प्रकार – जैसे भिन्न अस्तित्व से रचित पुरुष को, भिन्न अस्तित्व से रचित; भिन्न व्यपदेशवाले को, भिन्न व्यपदेशवाला; भिन्न संस्थानवाले को, भिन्न संस्थानवाला; भिन्न संख्यावाले को, भिन्न संख्यावाला; भिन्न विषयलब्धवृत्तिक को, भिन्न विषयलब्धवृत्तिक कर्तारूप धन पृथक्त्व प्रकार से 'धनी' – ऐसा नाम करता है; उसी प्रकार अभिन्न अस्तित्व से रचित ज्ञान, अभिन्न अस्तित्व से रचित पुरुष को; अभिन्न नामवाला, अभिन्न नामवाले को; अभिन्न आकारवाला, अभिन्न आकारवाले को; अभिन्न संख्यावाला, अभिन्न संख्यावाले को; अभिन्न विषयलब्धवृत्तिक पुरुष को, अभिन्न विषयलब्धवृत्तिक कर्तारूप ज्ञान, अपृथक्त्व प्रकार से 'ज्ञानी' ऐसा नाम करता है। दृष्टान्त व्याख्यान पूर्ण हुआ।

उसी प्रकार अन्यत्र दार्ष्टान्त पक्ष में भी जहाँ विवक्षित द्रव्य के भेद से व्यपदेश आदि होते हैं, वहाँ देवदत्त की गाय इत्यादि पूर्व गाथा में कहे गए क्रम से निश्चय से (वास्तव में) भेद जानना चाहिए और जहाँ अभेद से व्यपदेश आदि होते हैं, वहाँ वृक्ष की शाखा या जीव के अनन्त ज्ञानादि गुण इत्यादि के समान, निश्चय से अभेद जानना चाहिए।

इस गाथा में जो जीव के साथ अभिन्न व्यपदेश, अभिन्न संस्थान, अभिन्न संख्या और अभिन्न विषयलब्धवृत्तिकवाला ज्ञान है, वही जीव को ज्ञानी करता है। जिसकी प्राप्ति न होने से यह जीव अनादि काल से नर-नारकादि गति में भ्रमण कर रहा है, जो मोक्षरूपी वृक्ष का बीजभूत है, जिसकी ही भावना के बल से उसका ही फलभूत समस्त द्रव्य, क्षेत्र, काल, भाव के समूह को

विमलकेवलज्ञानं जायते तदेव निर्विकारस्वसंवेदनज्ञानं भावनीयं ज्ञानिभिरित्यभिप्रायः ॥ ५३ ॥

अथ ज्ञानज्ञानिनोरत्यंतभेदे दोषं दर्शयति —

णाणी णाणं च तहा अत्थंतरिदो दु अण्णमण्णस्स। (४८)
दोण्हं अचेदणत्तं पसजदि सम्मं जिणावमदं॥ ५४॥

णाणी ज्ञानी जीवः *णाणं च तहा* ज्ञानगुणोऽपि तथैव *अत्थंतरिदो दु* अर्थांतरितो भिन्नस्तु यदि भवति। कथं ? *अण्णमण्णस्स* अन्योन्यसम्बन्धित्वेन। तदा किं दूषणं ? *दोण्हं अचेदणत्तं* द्वयोर्ज्ञानज्ञानिनोरचेतनत्वं जडत्वं *पसजदि* प्रसजति प्राप्नोति। तच्च जड़त्वं कथंभूतं ? *सम्मं जिणावमदं* सम्यक्प्रकारेण जिनानामवमतमसम्मतमिति।

तथाहि – यथाग्नेर्गुणिनः सकाशादत्यंतभिन्नः सन्नुष्णत्वलक्षणो गुणो दहनक्रियां प्रत्यसमर्थः सन्निश्चयेन शीतलो भवति तथा ज्ञानगुणादत्यंतभिन्नः सन् जीवो गुणी पदार्थविच्छित्तिं प्रत्यसमर्थः सन्निश्चयेन जड़ो भवति। अथ मतं यथा भिन्नदात्रोपकरणेन देवदत्तो लावको भवति तथा भिन्नज्ञानेन

युगपत् जाननेवाला सकल विमल केवलज्ञान उत्पन्न होता है; वही निर्विकार स्वसम्वेदनज्ञान, ज्ञानियों द्वारा भावना करने-योग्य है – ऐसा अभिप्राय है॥ ५३ ॥

अब, ज्ञान और ज्ञानी के अत्यन्त भेद में दोष दिखाते हैं –

यदि ज्ञान ज्ञानी के सदा हो, परस्पर में भिन्नता।
तो जिनों को जो मान्य ना हो प्राप्त ऐसी अचितता॥ ५४॥

गाथार्थ - यदि ज्ञानी और ज्ञान सदा परस्पर अर्थान्तरभूत / पूर्ण भिन्न हों तो दोनों को अचेतनता का प्रसङ्ग आएगा; जो सम्यक् प्रकार से जिनों को सम्मत नहीं है।

टीकार्थ - ***णाणी*** ज्ञानी जीव, ***णाणं च तहा*** उसी प्रकार ज्ञानगुण भी ***अत्थंतरिदो दु*** यदि अर्थांतरित, भिन्न हैं। वे कैसे भिन्न हैं ? ***अण्णमण्णस्स*** परस्पर सम्बन्ध से पूर्णतया भिन्न हैं। तब क्या दोष है ? ***दोण्हं अचेदणत्तं*** तो ज्ञान और ज्ञानी दोनों के अचेतनता / जड़ता का प्रसङ्ग प्राप्त होता है। और वह जड़त्व कैसा है ? ***सम्मं जिणावमदं*** सम्यक् प्रकार से जिनों को सम्मत नहीं है।

वह इस प्रकार – जैसे अग्निरूप गुणी से अत्यन्त भिन्न होता हुआ उष्णता लक्षणरूप गुण दहनक्रिया के प्रति (जलाने में) असमर्थ होता हुआ, निश्चय से शीतल होता है; उसी प्रकार ज्ञानगुण से अत्यन्त भिन्न होता हुआ जीव रूपी गुणी पदार्थों को जानने के प्रति असमर्थ होता हुआ जड़ होता है।

ज्ञानी भवतीति। नैवं वक्तव्यम्। छेदनक्रियां प्रति दात्रं बाह्योपकरणं वीर्यांतरायक्षयोपशमजनितः पुरुषस्य शक्तिविशेषस्तत्राभ्यंतरोपकरणं शक्त्यभावे दात्रोपकरणे हस्तव्यापारे च सति छेदनक्रिया नास्ति, तथा प्रकाशोपाध्यायादिबहिरंगसहकारीसद्भावे सत्यभ्यंतरज्ञानोपकरणाभावे पुरुषस्य पदार्थपरिच्छित्तिक्रिया न भवतीति।

अत्र यस्य ज्ञानस्याभावाज्जीवो जड़ः सन् वीतरागसहजसुंदरानंदस्यन्दिपारमार्थिकसुखमुपादेयमजानन् संसारे परिभ्रमति तदेव रागादिविकल्परहितं निजशुद्धात्मानुभूतिज्ञानमुपादेयमिति भावार्थः॥ ५४॥

एवं व्यपदेशादिव्याख्यानमुख्यत्वेन गाथात्रयं गतम्।

अथ ज्ञानज्ञानिनोरत्यंतभेदे सति समवायसम्बन्धेनाप्येकत्वं कर्तुं नायातीति प्रतिपादयति —

यहाँ कोई कहता है कि जैसे भिन्न दात्र (हसिया) रूप उपकरण से देवदत्त लावक (काटनेवाला) हो जाता है; उसी प्रकार भिन्न ज्ञान से जीव ज्ञानी हो जाता है? (आचार्य कहते हैं कि) ऐसा नहीं कहना चाहिए। छेदनक्रिया के प्रति दात्र बाह्य उपकरण है, वहाँ वीर्यान्तरायकर्म के क्षयोपशम से उत्पन्न पुरुष की शक्ति विशेष अभ्यन्तर उपकरण है, उस शक्ति के अभाव में दात्र-उपकरण और हस्त-व्यापार होने पर भी छेदन क्रिया नहीं होती है; उसी प्रकार प्रकाश, उपाध्याय आदि बहिरङ्ग सहकारी कारणों का सद्भाव होने पर भी, अभ्यन्तर ज्ञानरूप उपकरण के अभाव में पुरुष के पदार्थों की जानकारीरूप क्रिया नहीं होती है।

यहाँ जिस ज्ञान का अभाव होने से जीव, जड़ होता हुआ, वीतराग सहज सुन्दर आनन्द के प्रवाहमय पारमार्थिक सुख को उपादेय नहीं जानता हुआ, संसार में परिभ्रमण करता है; वही रागादि विकल्परहित निज शुद्धात्मानुभूति-सम्पन्न ज्ञान उपादेय है — ऐसा भावार्थ है॥ ५४॥

[इस गाथा - टीका में आचार्य अमृतचन्द्र ने युतसिद्धसम्बन्ध का भी निषेध किया है। वह इस प्रकार — 'निर्विशेष (गुणरहित) द्रव्य के और निराश्रित गुणों के शून्यता (अभाव) होने के कारण युतसिद्ध (पृथक् होने पर भी बाद में मिलकर सिद्ध होनेरूप) संयोग से भी चेतना नहीं आ सकती है।']

इस प्रकार व्यपदेशादि व्याख्यान की मुख्यता से तीन गाथाएँ पूर्ण हुईं।

अब, ज्ञान और ज्ञानी के अत्यन्त भेद होने पर समवाय सम्बन्ध से भी एकत्व करना शक्य नहीं है, ऐसा प्रतिपादन करते हैं —

यदि ज्ञान से हो भिन्न तो, समवाय से होता नहीं।
ज्ञानी 'अज्ञानी' यह वचन, एकत्व का साधक यही॥ ५५॥

ण हि सो समवायादो अत्थंतरिदो दु णाणदो णाणी। (४९)
अण्णाणीत्ति य वयणं एगत्तपसाधगं होदि॥ ५५॥

सो **स जीवः कर्ता** ***ण हि णाणी*** **ज्ञानी न भवति** ***हि*** **स्फुटम्। कस्मात्सकाशात्?** ***समवायादो*** **समवायसम्बन्धात्। कथंभूतः सन्?** ***अत्थंतरिदो दु*** **अर्थांतरितस्त्वेकांतेन भिन्नः। कस्मात्सकाशात्?** ***णाणादो*** **ज्ञानात्** ***अण्णाणीत्ति य वयणं एयत्तपसाहगं होदि*** **अज्ञानी चेति वचनं गुणगुणिनोरेकत्व-प्रसाधकं भवतीति।**

तद्यथा – ज्ञानसमवायात्पूर्वं जीवो ज्ञानी किंवाऽज्ञानीति विकल्पद्वयमवतरति। तत्र यदि ज्ञानी तदा ज्ञानसमवायो व्यर्थो ज्ञानित्वं पूर्वमेव तिष्ठति अथवाऽज्ञानी तत्रापि विकल्पद्वयं किमज्ञानगुण-समवायादज्ञानी किं स्वभावेन वा? न तावदज्ञानगुणसमवायादज्ञानिनो जीवस्याज्ञानगुणसमवायो वृथा येन कारणेनाज्ञानित्वं पूर्वमेव तिष्ठति अथवा स्वभावेनाज्ञानित्वं तथैव ज्ञानित्वमपि स्वभावेनैव गुणत्वादिति।

अत्र यथा मेघपटलावृते दिनकरे पूर्वमेव प्रकाशस्तिष्ठति पश्चात्पटलविघटनानुसारेण प्रकटो

गाथार्थ - ज्ञान से अर्थान्तरभूत वह समवाय से भी ज्ञानी नहीं हो सकता। 'अज्ञानी' ऐसा वचन ही उनके एकत्व को सिद्ध करता है।

टीकार्थ - ***सो*** जीवरूप कर्ता, ***णहि णाणी*** वास्तव में ज्ञानी नहीं होता है। वह किससे ज्ञानी नहीं होता है? ***समवायादो*** समवाय सम्बन्ध से ज्ञानी नहीं होता है। कैसा होता हुआ, उससे ज्ञानी नहीं होता है? ***अत्थंतरिदो दु*** अर्थान्तरित, एकान्त से / सर्वथा भिन्न होता हुआ ज्ञानी नहीं होता है। किससे भिन्न होता हुआ ज्ञानी नहीं होता है? ***णाणादो*** ज्ञान से भिन्न होता हुआ ज्ञानी नहीं होता है। ***अण्णाणित्ति य वयणं एयत्तपसाधगं होदि*** और 'अज्ञानी' ऐसा वचन गुण-गुणी के एकत्व का प्रसाधक होता है।

वह इस प्रकार – ज्ञान के समवाय से पूर्व जीव, ज्ञानी है कि अज्ञानी? इस प्रकार दो विकल्प अवतरित होते हैं। वहाँ यदि ज्ञानी है तो ज्ञान का समवाय व्यर्थ है; क्योंकि उस समवाय से पूर्व ही ज्ञानीत्व है; अथवा यदि अज्ञानी है तो वहाँ भी दो विकल्प हैं – अज्ञानगुण के समवाय से अज्ञानी है कि स्वभाव से अज्ञानी है। अज्ञानगुण के समवाय से तो अज्ञानी हो नहीं सकता; क्योंकि अज्ञानी जीव के पहले से ही अज्ञानीत्व विद्यमान होने से अज्ञानगुण का समवाय व्यर्थ है और यदि स्वभाव से अज्ञानीत्व है तो गुण होने के कारण, उसी प्रकार स्वभाव से ही ज्ञानीत्व भी है।

यहाँ जैसे मेघपटल से आच्छादित सूर्य में प्रकाश पहले से ही विद्यमान है, बाद में पटल

भवति तथा जीवे निश्चयनयेन क्रमकरणव्यवधानरहितं त्रैलोक्योदरविवरवर्तिसमस्तवस्तुगतानंतधर्म-प्रकाशकमखंडप्रतिभासमयं केवलज्ञानं पूर्वमेव तिष्ठति किंतु व्यवहारनयेनानादिकर्मावृतः सन्न ज्ञायते पश्चात्कर्मपटलविघटनानुसारेण प्रकटं भवति, न च जीवाद्बहिर्भूतं ज्ञानं किमपीति पश्चात्समवाय-सम्बन्धबलेन जीवे संबद्धं न भवतीति भावार्थः॥ ५५॥

अथ गुणगुणिनोः कथंचिदेकत्वं विहायान्यः कोऽपि समवायो नास्तीति समर्थयति —

समवत्ती समवाओ अपुधब्भूदो य अजुदसिद्धो य। (५०)
तम्हा दव्वगुणाणं अजुदा सिद्धित्ति णिद्दिट्ठा॥ ५६॥

***समवत्ती* समवृत्तिः सहवृत्तिर्गुणगुणिनोः कथंचिदेकत्वेनानादितादात्म्यसम्बन्ध इत्यर्थः *समवाओ* स एव जैनमते समवायो नान्यः कोऽपि परिकल्पितः *अपुधब्भूदो य* तदेव गुणगुणिनोः संज्ञालक्षण-प्रयोजनादिभेदेऽपि प्रदेशभेदाभावादपृथग्भूतत्वं भण्यते *अजुदसिद्धा* य तदेव दंडदंडिवद्भिन्न-**

-विघटन के अनुसार प्रगट होता है; उसी प्रकार जीव में निश्चयनय से क्रम-करण व्यवधान से रहित, तीन लोकरूपी उदरविवर (पेट) में स्थित समस्त वस्तुगत अनन्त धर्मों का प्रकाशक अखण्ड प्रतिभासमय केवल ज्ञान पहले से ही स्थित है; परन्तु व्यवहारनय से अनादि कर्मों से आवृत होता हुआ ज्ञात नहीं होता है; बाद में कर्मपटल के विघटनानुसार प्रगट होता है। जीव से बहिर्भूत दूसरा ज्ञान कुछ भी है ही नहीं; अतः बाद में समवाय सम्बन्ध के बल से जीव में सम्बद्ध भी नहीं होता — ऐसा भावार्थ है॥ ५५॥

अब, गुण-गुणी के कथञ्चित् एकत्व को छोड़कर अन्य कोई भी समवाय नहीं है, ऐसा समर्थन करते हैं —

समवर्तिता समवाय अपृथग्भूतताऽयुतसिद्धता।
ये एक इससे अयुतसिद्धि, द्रव्य गुण की है कहा॥ ५६॥

गाथार्थ - समवर्तित्व, समवाय, अपृथग्भूतत्व और अयुतसिद्धत्व — ये एकार्थवाची हैं; इसलिए द्रव्य-गुणों के अयुतसिद्धि है — ऐसा कहा है।

टीकार्थ - ***समवत्ती*** समवृत्ति, सहवृत्ति, गुण-गुणी के कथञ्चित् एकत्व होने से अनादि तादात्म्यसम्बन्ध है — ऐसा अर्थ है। ***समवाओ*** जैनमत में वह ही समवाय है; दूसरा कोई भी परिकल्पित समवाय नहीं है। ***अपुधब्भूदो य*** गुण-गुणी के संज्ञा, लक्षण, प्रयोजन आदि का भेद होने पर भी प्रदेशभेद का अभाव होने से, वह ही अपृथग्भूतत्व कहलाता है। ***अजुदसिद्धा य*** दण्ड-दण्डी के समान भिन्न प्रदेश लक्षण युतसिद्धत्व का अभाव होने से, वह ही अयुतसिद्धत्व

प्रदेशलक्षणयुतसिद्धत्वाभावादयुतसिद्धत्वं भण्यते *तम्हा* तस्मात्कारणात् *दव्वगुणाणं* द्रव्यगुणानां *अजुदा सिद्धित्ति* अयुता सिद्धिरिति कथंचिदभिन्नत्वसिद्धिरिति *णिद्दिट्ठा* निर्दिष्टा कथितेति।

अत्र व्याख्याने यथा ज्ञानगुणेन सहानादितादात्म्यसम्बन्धः प्रतिपादितो द्रष्टव्यो जीवेन सह तथैव च यदव्याबाधरूपमप्रमाणमविनश्वरं स्वाभाविकं रागादिदोषरहितं परमानन्दैकस्वभावं पारमार्थिकसुखं तत्प्रभृतयो ये अनंतगुणाः केवलज्ञानांतर्भूतास्तैरपि सहानादितादात्म्यसम्बन्धः श्रद्धातव्यो ज्ञातव्यः तथैव च समस्तरागादिविकल्पत्यागेन निरंतरं ध्यातव्य इत्यभिप्रायः॥ ५६॥

एवं समवायनिराकरणमुख्यत्वेन गाथाद्वयं गतम्।

अथ दृष्टांतदार्ष्टांतरूपेण द्रव्यगुणानां कथंचिदभेदव्याख्यानोपसंहारः कथ्यते —

वण्णरसगंधफासा परमाणुपरूविदा विसेसेहिं। (५१)
दव्वादो य अणण्णा अण्णत्तपयासगा होंति॥ ५७॥

दंसणणाणाणि तहा जीवणिबद्धाणि णण्णभूदाणि।(५२)
ववदेसदो पुधत्तं कुव्वंति हु णो सभावादो॥ ५८॥ जुम्मं

कहलाता है। ***तम्हा*** उस कारण ***दव्वगुणाणं*** द्रव्य-गुणों के ***अजुदा सिद्धित्ति*** अयुतसिद्धि है, कथञ्चित् अभिन्नत्व सिद्धि है – ऐसा ***णिद्दिट्ठं*** निर्दिष्ट है, कहा गया है।

इस व्याख्यान में जैसे ज्ञानगुण के साथ अनादि तादात्म्यसम्बन्ध प्रतिपादित किया है, उसे उसी प्रकार जीव के साथ देख लेना चाहिए तथा जो अव्याबाधरूप, असीम, अविनश्वर, स्वाभाविक, रागादि दोषों से रहित, परमानन्द एक स्वभावमय पारमार्थिक सुख है, तत्प्रभृति केवलज्ञान में अन्तर्भूत जो अनन्तगुण हैं, उनके साथ अनादि तादात्म्यसम्बन्ध का श्रद्धान करना चाहिए, ज्ञान करना चाहिए और उसी प्रकार समस्त रागादि विकल्पों के त्यागपूर्वक उसका ध्यान करना चाहिए – ऐसा अभिप्राय है॥ ५६॥

इस प्रकार समवाय के निराकरण की मुख्यता से दो गाथाएँ पूर्ण हुईं।

अब, दृष्टान्त और दार्ष्टान्तरूप से द्रव्य-गुणों के कथञ्चित् अभेदपरक व्याख्यान का उपसंहार करते हैं –

परमाणु में वर्णित विशेष, स्पर्श रस गंध वर्ण ज्यों।
रहते अभिन्न हैं द्रव्य से, पर भिन्न बतलाते हैं त्यों॥ ५७॥

हैं अनन्यभूत निबद्ध जीव से, दर्शज्ञानादि सभी।
व्यपदेश से पृथक्त्व करते, पर स्वभावों से नहीं॥ ५८॥

वण्णरसगंधफासा वर्णरसगंधस्पर्शाः *परमाणुपरूविदा* परमाणुद्रव्यप्ररूपिताः कथिताः। कैः कृत्वा ? *विसेसेहिं* विशेषैः संज्ञालक्षणप्रयोजनादिभेदैः अथवा *विसेसो हि* इति पाठांतरं विशेषा विशेषगुणधर्माः स्वभाव *हि* स्फुटं। ते कथंभूताः ? *दव्वादो य* परमाणुद्रव्याच्च सकाशात् *अणण्णा* निश्चयनयेनानन्ये *अण्णत्तपयासगा होंति* पश्चाद्व्यवहारनयेन संज्ञादिभेदेनान्यत्वप्रकाशका भवन्ति यथा। इति दृष्टांतगाथा गता।

दंसणणाणाणि तहा दर्शनज्ञाने द्वे तथा। कथंभूते: ? *जीवणिबद्धाणि* जीवनिबद्धे द्वे। पुनरपि कथंभूते ? *अणण्णभूदाणि* निश्चयनयेन प्रदेशरूपेणानन्यभूते। इत्थंभूते ते किं कुरुतः ? *ववदेसदो पुधत्तं* व्यपदेशतः संज्ञादिभेदतः पृथक्त्वं नानात्वं *कुव्वंति* कुरुतः *हु* स्फुटं *णो सहावादो* नैव स्वभावतो निश्चयनयेन इति।

अस्मिन्नधिकारे यद्यप्यष्टविधज्ञानोपयोगचतुर्विधदर्शनोपयोगव्याख्यानकाले शुद्धाशुद्धविवक्षा न कृता तथापि निश्चयनयेनादिमध्यांतवर्जिते परमानंदमालिनि परमचैतन्यशालिनि भगवत्यात्मनि

गाथार्थ – जैसे परमाणु में प्ररूपित द्रव्य से अनन्य वर्ण, रस, गन्ध, स्पर्श विशेषों द्वारा अन्यत्व के प्रकाशक होते हैं; उसी प्रकार जीव में निबद्ध, अनन्यभूत दर्शन, ज्ञान व्यपदेश से पृथक्त्व करते हैं; स्वभाव से नहीं।

टीकार्थ – ***वण्णरसगंधफासा*** वर्ण, रस, गन्ध, स्पर्श ***परमाणुपरूविदा*** परमाणुद्रव्य के प्ररूपित हैं, कहे गए हैं। किसरूप से कहे गए हैं ? ***विसेसेहिं*** विशेषों से; संज्ञा, लक्षण, प्रयोजन आदि की अपेक्षा भेद होने से (भिन्न) कहे गए हैं अथवा ***विसेसो हि*** ऐसा पाठान्तर है, (जिसका अर्थ है) विशेष अर्थात् विशेषगुण-धर्म-स्वभावरूप कहे गए हैं ***हि*** वास्तव में। वे कैसे हैं ? ***दव्वादो य*** परमाणु द्रव्य से ***अणण्णा*** निश्चयनय की अपेक्षा अभिन्न हैं; ***अण्णत्तपयासगा होंति*** बाद में व्यवहारनय की अपेक्षा जैसे संज्ञादि भेद से अन्यत्व के प्रकाशक हैं। – इस प्रकार दृष्टान्त गाथा पूर्ण हुई।

दंसणणाणाणि तहा उसी प्रकार दर्शन-ज्ञान दोनों। वे कैसे हैं ? ***जीवणिबद्धा*** वे दोनों जीव से निबद्ध हैं। वे और कैसे हैं ? ***अणण्णभूदाणि*** निश्चयनय की अपेक्षा प्रदेशरूप से अनन्यभूत हैं। इस प्रकार के वे दोनों क्या करते हैं ? ***ववदेसदा पुधत्तं*** व्यपदेश से, संज्ञादि भेद से पृथक्त्व, नानात्व ***कुव्वन्ति*** करते हैं, ***हि*** वास्तव में; ***णो सहावादो*** परन्तु स्वभाव की अपेक्षा निश्चयनय से नहीं करते हैं।

इस अधिकार में यद्यपि आठ प्रकार के ज्ञानोपयोग, चार प्रकार के दर्शनोपयोग के व्याख्यान-काल में शुद्धाशुद्ध विवक्षा नहीं की है; तथापि निश्चयनय की अपेक्षा आदि-मध्य

यदनाकुलत्वलक्षणं पारमार्थिकसुखं तस्योपादेयभूतस्योपादानकारणभूतं यत्केवलज्ञानदर्शनद्वयं तदेवोपादेयमिति श्रद्धेयं ज्ञेयं तथैवार्तरौद्रादिसमस्तविकल्पजालत्यागेन ध्येयमिति भावार्थः ॥ ५७-५८ ॥

एवं दृष्टांतदार्ष्टांतरूपेण गाथाद्वयं गतम्।

अत्र प्रथमं *उवओगो दुवियप्पो* इत्यादि पूर्वोक्तपाठक्रमेण दर्शनज्ञानकथनरूपेणांतरस्थल-पञ्चकेन गाथानवकं, तदनंतरं *ण वियप्पदि णाणादो* इत्यादि पाठक्रमेण नैयायिकं प्रति गुणगुणिभेद-निराकरणरूपेणांतरस्थलचतुष्टयेन गाथादशकमिति समुदायेनैकोनविंशतिगाथाभिर्जीवाधिकार-व्याख्यानरूपनवाधिकारेषु मध्ये *षष्ठम उपयोगाधिकारः* समाप्तः।

अथानंतरं वीतरागपरमानंदसुधारससमरसीभावपरिणतिस्वरूपात् शुद्धजीवास्तिकायात्सकाशात् भिन्नं यत्कर्मकर्तृत्वभोक्तृत्वसंयुक्तत्वत्रयस्वरूपं तस्य संबन्धित्वेन पूर्वमष्टादशगाथासमुदायपातनिका-रूपेण यत्सूचितं व्याख्यातं तस्येदानीं *जीवा अणाइणिहणा* इत्यादि पाठक्रमेणांतरस्थलपञ्चकेन विवरणं करोति। तद्यथा —

-अन्त से रहित परमानन्द-सम्पन्न, परमचैतन्य से सुशोभित भगवान आत्मा में जो अनाकुलता लक्षण पारमार्थिक सुख है, उस उपादेयभूत पारमार्थिकसुख के उपादान कारणभूत जो दो केवलज्ञान और केवलदर्शन हैं, वे ही उपादेय हैं – ऐसा श्रद्धान करना चाहिए, जानना चाहिए और उसी प्रकार आर्त-रौद्र आदि समस्त विकल्पसमूह के त्यागपूर्वक ध्येय है – ऐसा भावार्थ है॥ ५७-५८ ॥

इस प्रकार दृष्टान्त-दार्ष्टान्तरूप में दो गाथाएँ पूर्ण हुईं।

यहाँ प्रथम ***उवओगे दुवियप्पो*** इत्यादि पूर्वोक्त पाठक्रम से दर्शन-ज्ञान कथनरूप पाँच अन्तर स्थलों द्वारा नौ गाथाएँ हैं। उसके बाद ***ण वियप्पदि णाणादो*** इत्यादि पाठक्रम से नैयायिक के लिए गुण-गुणी भेद के निराकरणरूप से चार अन्तरस्थलों द्वारा दश गाथाएँ – इस प्रकार समूहरूप से १९ गाथाओं द्वारा जीवाधिकार के व्याख्यानरूप नौ अधिकारों में से ***छठवाँ उपयोगाधिकार*** समाप्त हुआ।

तत्पश्चात् वीतराग परमानन्द सुधारस समरसीभाव परिणत स्वरूपवाले शुद्ध जीवास्तिकाय से भिन्न जो कर्म-कर्तृत्व, भोक्तृत्व, संयुक्तत्व – ये तीन स्वरूप, उनसे सम्बन्धित होने से पहले अठारह गाथाओं की समुदाय-पातनिकारूप से जो सूचित किया था, जिसका व्याख्यान किया था, उसका इस समय ***जीवा अणाइणिहणा*** इत्यादि पाठक्रम से पाँच अन्तरस्थलों द्वारा विवरण करते हैं। वह इस प्रकार – आगे जिन जीवों के कर्म का कर्तृत्व, भोक्तृत्व, संयुक्तत्व – ये तीन कहे जाएंगे; पहले उनके स्वरूप और संख्या का प्रतिपादन करते हैं –

येषां जीवानामग्रे कर्मकर्तृत्वभोक्तृत्वसंयुक्तत्वत्रयं कथ्यते तेषां पूर्वं तावत्स्वरूपं संख्यां च प्रतिपादयति —

जीवा अणाइणिहणा संता णंता य जीवभावादो। (५३)
सब्भावदो अणंता पंचग्गगुणप्पधाणा य॥ ५९॥

जीवा अणाइणिहणा जीवा हि शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन शुद्धचैतन्यरूपेणानाद्यनिधनाः पुनश्च कथंभूताः ? *संता* औदयिकक्षायोपशमिकौपशमिकभावत्रयापेक्षयासादिसनिधनाः। पुनरपि किंविशिष्टाः ? *अणंता य* साद्यनंताः। कस्मात्सकाशात् ? *जीवभावादो* जीवभावतः क्षायिको भावस्तस्मात्। नहि क्षायिकभावस्य सादित्वादंतोऽपि किल भविष्यतीत्याशंकनीयम्। स हि कर्मक्षये सति क्षायिकभावः केवलज्ञानादिरूपेण समुत्पद्यमानः सिद्धभाव इव जीवस्य सद्भाव एव स च स्वभावस्य विनाशो नास्ति चेति अनाद्यनिधनसहजशुद्धपारिणामिकैकभावानां सादिसनिधनान्यप्यौदयिकादिभावांतराणि कथं संभवंतीति चेत् *पंचग्गगुणप्पहाणा य* यद्यपि स्वभावेन शुद्धास्तथापि व्यवहारेणानादिकर्मबंधवशात्सकर्दमजलवदौदयिकादि भावपरिणता दृश्यंत इति स्वरूपव्याख्यानं गतम्।

जिव जीवभावों से अनादिनिधन, सांत अनन्त भी।
सद्भाव से वे हैं अनन्त, प्रधानता गुण पाँच की॥ ५९॥

गाथार्थ - जीव, जीवभाव की अपेक्षा अनादि, अनन्त, सान्त और अनन्त हैं। सद्भाव की अपेक्षा अनन्त और पाँच मुख्य गुणों की प्रधानतायुक्त हैं।

टीकार्थ - ***जीवा अणाइणिहणा*** जीव वास्तव में शुद्ध-पारिणामिक-परमभाव-ग्राहक शुद्ध द्रव्यार्थिकनय की अपेक्षा शुद्ध चैतन्यरूप से अनादि-अनिधन हैं। वे और कैसे हैं ? ***संता*** औदयिक, क्षायोपशमिक, औपशमिक — इन तीन भावों की अपेक्षा सादि-सनिधन हैं। वे और किस विशेषतावाले हैं ? ***अणंता य*** सादि-अनन्त हैं। इनरूप वे किस अपेक्षा से हैं। ***जीवभावादो*** जीव के भाव की अपेक्षा वे इसरूप हैं। क्षायिकभाव की अपेक्षा सादिपना होने से उनका अन्त भी होगा ? — ऐसी आशङ्का नहीं करना चाहिए; क्योंकि कर्म का क्षय होने पर केवलज्ञानादिरूप से उत्पन्न होनेवाला वह क्षायिकभाव सिद्धभाव के समान, जीव का सद्भाव / स्वभावरूप ही है और स्वभाव का कभी विनाश नहीं होता है।

अनादि-अनन्त सहज शुद्ध पारिणामिक एक भावमय जीवों के सादि-सान्तरूप औदयिक आदि अन्य भाव कैसे सम्भव हैं ? यदि ऐसा प्रश्न हो तो उत्तर देते हैं — ***पंचग्गगुणप्पहाणा य***

इदानीं संख्यां कथयति – *सब्भावदो अणंता* द्रव्यस्वभावगणनया पुनरनंताः। सांतानंतशब्द-योर्द्वितीयव्याख्यानं क्रियते – सहांतेन संसारविनाशे वर्तन्ते सांता भव्याः, न विद्यतेऽन्तः संसारविनाशो येषां ते पुनरनंता अभव्यास्ते चाभव्या अनंतसंख्यास्तेभ्योऽपि भव्याः अनंतगुणसंख्यास्तेभ्योऽप्यभव्य-समानभव्या अनंतगुणा इति।

अत्र सूत्रे अनादिनिधना अनंतज्ञानादिगुणाधाराः शुद्धजीवा एव सादिसनिधनमिथ्यात्वरागादि-दोषपरिहारपरिणतानां भव्यानामुपादेया इति तात्पर्यार्थः॥ ५९॥

अथ यद्यपि पर्यायार्थिकनयेन विनाशोत्पादौ भवतः तथापि द्रव्यार्थिकनयेन न भवत इति पूर्वापरविरोधो नास्तीति कथयति –

एवं सदो विणासो असदो जीवस्स हवदि उप्पादो। (५४)
इदि जिणवरेहिं भणियं अण्णोण्णविरुद्धमविरुद्धं॥ ६०॥

एवं सदो विणासो एवं पूर्वगाथाकथितप्रकारेणौदयिकभावेनायुरुच्छेदवशान्मनुष्यपर्यायरूपेण

यद्यपि वे स्वभाव से ही शुद्ध हैं; तथापि व्यवहार से अनादि कर्मबन्ध के वश कीचड़युक्त जल के समान औदयिक आदि भावरूप परिणत देखे जाते हैं – इस प्रकार स्वरूप का व्याख्यान हुआ।

अब, संख्या कहते हैं – ***सब्भावदो अणंता*** द्रव्य-स्वभाव-गणना की अपेक्षा, वे अनन्त हैं।

सान्त और अनन्त शब्द का दूसरा व्याख्यान करते हैं – अन्त के साथ अर्थात् संसार के विनाश से सहित हैं, वे सान्त अर्थात् भव्य हैं; तथा जिनके अन्त अर्थात् संसार का विनाश नहीं है, वे अनन्त अर्थात् अभव्य हैं। वे अभव्य भी अनन्त की संख्या में हैं, उनसे भी अनन्त गुणी संख्यावाले भव्य हैं; उनसे भी अनन्त गुणे अभव्य-समान भव्य हैं।

इस गाथा में अनादि-अनन्त ज्ञानादि गुणों का आधारभूत शुद्ध जीव ही सादि-सनिधन मिथ्यात्व-रागादि दोषों के परिहाररूप से परिणत भव्यों को उपादेय है – ऐसा तात्पर्यार्थ है॥ ५९॥

अब, यद्यपि पर्यायार्थिकनय से विनाश-उत्पाद होते हैं; तथापि द्रव्यार्थिकनय से नहीं होते हैं, ऐसा होने पर भी पूर्वापर विरोध नहीं है; ऐसा कहते हैं –

इस विधि सत का व्यय, असत उत्पाद होता जीव का।
दिखते विरोधी परस्पर, अविरुद्ध जिनवर ने कहा॥ ६०॥

गाथार्थ - इस प्रकार जीव के सत् का विनाश और असत् का उत्पाद होता है, ऐसा परस्पर विरुद्ध होने पर भी जिनवरों ने अविरुद्ध स्वरूप कहा है।

सतो विद्यमानस्य विनाशो भवति *असदो जीवस्स हवदि उप्पादो* असतोऽविद्यमानस्य देवादिजीवस्य पर्यायस्य गतिनामकर्मोदयाद्भवत्युत्पादः *इदि जिणवरेहिं भणियं* इति जिनवरैर्वीतरागसर्वज्ञैर्भणितं इदं तु व्याख्यातम्। कथंभूतं ? *अण्णोण्णविरुद्धमविरुद्धं* अन्योन्यविरुद्धमप्यविरुद्धम्। कथमिति चेत् ? द्रव्यपीठिकायां सतो जीवस्य विनाशो नास्त्यसत उत्पादो नास्तीति भणितं। अत्र सतो जीवस्य विनाशो भवत्यसत उत्पादो भवतीति भणितं तेन कारणेन विरोधः तन्न। तत्र द्रव्यपीठिकायां द्रव्यार्थिकनयेनोत्पाद-व्ययौ निषिद्धौ, अत्र तु पर्यायार्थिकनयेनोत्पादव्ययौ भवत इति नास्ति विरोधः। तदपि कस्मादिति चेत् ? द्रव्यार्थिकपर्यायार्थिकनययोः परस्परसापेक्षत्वादिति।

अत्र यद्यपि पर्यायार्थिकनयेन सादिसनिधनं जीवद्रव्यं व्याख्यातं तथापि शुद्धनिश्चयेन यदेवानादिनिधनं टंकोत्कीर्णज्ञायकैकस्वभावं निर्विकारसदानन्दैकस्वरूपं च तदेवोपादेयमित्य-भिप्रायः॥ ६०॥

टीकार्थ - ***एवं सदो विणासो*** इस प्रकार पूर्व गाथा में कही गई पद्धति से औदयिकभाव द्वारा आयु के उच्छेद के वश मनुष्य पर्यायरूप से सत्, विद्यमान का विनाश है; ***असदो जीवस्स हवदि उप्पादो*** असत् अविद्यमान देवादि जीवपर्याय का गति नामकर्म के उदय से उत्पाद होता है। ***इदि जिणवरेहिं भणियं*** ऐसा जिनवर वीतराग-सर्वज्ञ द्वारा कहा गया है। यह व्याख्यात (किया गया कथन) किस प्रकार है ? ***अण्णोण्णविरुद्धमविरुद्धं*** परस्पर में विरुद्ध होने पर भी अविरुद्ध है। यह कैसे है ? यदि ऐसा प्रश्न हो तो कहते हैं –

द्रव्यपीठिका में सत् जीव का विनाश नहीं होता तथा असत् का उत्पाद नहीं होता – ऐसा कहा गया था और यहाँ सत् जीव का विनाश होता है और असत् का उत्पाद होता है – ऐसा कहा गया है – उस कारण विरोध है; परन्तु वास्तव में यह विरोध नहीं है। वहाँ द्रव्यपीठिका में द्रव्यार्थिकनय से उत्पाद-व्यय का निषेध किया गया था और यहाँ पर्यायार्थिकनय से उत्पाद-व्यय होते हैं – इसका प्रतिपादन है – इस प्रकार विरोध नहीं है। वह भी कैसे नहीं है ? यदि ऐसा प्रश्न हो तो कहते हैं – द्रव्यार्थिक और पर्यायार्थिकनय में परस्पर सापेक्षता होने से यह विरोध नहीं है।

यहाँ यद्यपि पर्यायार्थिकनय से सनिधन जीवद्रव्य का व्याख्यान किया है; तथापि शुद्धनिश्चय से जो अनादि-निधन टङ्कोत्कीर्ण ज्ञायक एक स्वभावमय और निर्विकार सदानन्द एकस्वरूपी है, वह ही उपादेय है – ऐसा अभिप्राय है॥ ६०॥

अब, पूर्व सूत्र में जो जीव का उत्पाद-व्यय स्वरूप कहा है, उसका कारण नर-नारक आदि गति-नामकर्म का उदय है, ऐसा कहते हैं –

अथ पूर्वसूत्रे जीवस्योत्पादव्ययस्वरूपं यद्भणितं तस्य नरनारकादिगतिनामकर्मोदयकारणमिति कथयति -

णेरइयतिरियमणुआ देवा इदि णामसंजुदा पयडी। (५५)
कुव्वंति सदो णासं असदो भावस्स उप्पत्तीं॥ ६१॥

णेरइयतिरियमणुआ देवा इदि णामसंजुदा नारकतिर्यग्गमनुष्यदेवा इति नामसंयुक्ताः *पयडी* नामकर्मप्रकृतयः कर्तृ *कुव्वंति* कुर्वन्ति। कं ? *सदो णासं* सतो विद्यमानस्य भावस्य पर्यायस्य नाशं *असदो भावस्स उप्पत्ती* असतो भावस्य पर्यायस्योत्पत्तिमिति।

तथाहि - यथा समुद्रस्य समुद्ररूपेणाविनश्वरस्यापि कल्लोला उत्पादव्ययद्वयं कुर्वन्ति तथा जीवस्य सहजानन्दैकटंकोत्कीर्णज्ञायकस्वभावेन नित्यस्यापि व्यवहारेणानादिकर्मोदयवशान्निर्विकार-शुद्धात्मोपलब्धिच्युतस्य नरकगत्यादिकर्मप्रकृतय उत्पादव्ययं च कुर्वंतीति। तथा चोक्तं -

अनाद्यनिधने द्रव्ये स्वपर्यायाः प्रतिक्षणं। उन्मज्जन्ति निमज्जन्ति जलकल्लोलवज्जले॥

नारक तिर्यक् नर अमर नामक, प्रकृतिआँ करतीं सदा।
सत भाव का भी नाश, असत पदार्थ उत्पादन तथा॥ ६१॥

गाथार्थ - नारक, तिर्यञ्च, मनुष्य, देव – इन नामों से संयुक्त (नामकर्म की) प्रकृतियाँ सत्भाव का नाश और असत्भाव का उत्पाद करती हैं।

टीकार्थ - ***णेरइयतिरियमणुआ देवा इदि णामसंजुदा*** नारक, तिर्यञ्च, मनुष्य, देव – इन नाम से संयुक्त ***पयडी*** नामकर्म की प्रकृतियाँरूपी कर्ता ***कुव्वंति*** करती हैं। वे क्या करती हैं ? ***सदो णासं*** विद्यमानभावरूप पर्याय का नाश ***असदो भावस्स उप्पत्ती*** असत्भावरूप पर्याय का उत्पाद करती हैं।

वह इस प्रकार – जैसे समुद्ररूप से अविनश्वर / स्थायी समुद्र में भी लहरें उत्पाद-व्यय दोनों करती हैं; उसी प्रकार सहजानन्द एक टङ्कोत्कीर्ण ज्ञायकस्वभाव से नित्य होने पर भी व्यवहार से अनादि कर्मोदय के वश निर्विकार शुद्धात्मोपलब्धि से च्युत जीव के नरकगति आदि कर्म प्रकृतियाँ उत्पाद और व्यय करती हैं। वैसा ही कहा भी है –

'जल में जल-कल्लोलों के समान, अनादिनिधन द्रव्य में (उसकी) अपनी पर्यायें प्रतिसमय उत्पन्न होती हैं, नष्ट होती हैं।' *॥ आलाप पद्धति, पद्य-१॥*

यहाँ शुद्ध निश्चयनय से मूलोत्तर प्रकृतिरहित, वीतराग, परमाह्लाद एकरूप चैतन्य

अत्र यदेव शुद्धनिश्चयनयेन मूलोत्तरप्रकृतिरहितं वीतरागपरमाह्लादैकरूपचैतन्यप्रकाशसहितं शुद्धजीवास्तिकायस्वरूपं तदेवोपादेयमिति भावार्थः ॥ ६१ ॥

एवं कर्मकर्तृत्वादित्रयपीठिकाव्याख्यानरूपेण गाथात्रयेण प्रथममंतरस्थलं गतम्।

अथ पीठिकायां पूर्वं जीवस्य यदौदयिकादिभावपञ्चकं सूचितं तस्य व्याख्यानं करोति —

उदयेण उवसमेण य खयेण दुहिं मिस्सिदेण परिणामे।(५६)
जुत्ता ते जीवगुणा बहुसुदसत्थेसु वित्थिण्णा॥ ६२॥

***जुत्ता* युक्ताः। के ? *ते जीवगुणा* ते परमागमप्रसिद्धाः जीवगुणाः जीवभावाः परिणामाः। केन केन युक्ताः ? *उदयेण* कर्मोदयेन *उवसमेण य* कर्मोपशमेन च *खयेण* कर्मक्षयेण *दुहिं मिस्सिदेण* द्वाभ्यां क्षयोपशमाभ्यां मिश्रत्वेन *परिणामे* प्राकृतलक्षणबलात्सप्तम्यंतं तृतीयांतं व्याख्यायते परिणामेन कारणभूतेन इतिव्युत्पत्तिरूपेणौदयिकः औपशमिकः क्षायिकः क्षायोपशमिकः पारिणामिक एवं पञ्च-भावा ज्ञातव्याः। ते च *कथंभूताः ? बहुसुदसत्थेसु वित्थिण्णा* बहुश्रुतशास्त्रेषु तत्त्वार्थादिषु विस्तीर्णाः।**

प्रकाशसहित जो शुद्ध जीवास्तिकाय का स्वरूप है, वह ही उपादेय है – ऐसा भावार्थ है॥ ६१ ॥

इस प्रकार कर्मकर्तृत्व आदि तीन की पीठिका के व्याख्यानरूप से तीन गाथा द्वारा प्रथम अन्तरस्थल पूर्ण हुआ।

अब, पीठिका के पूर्व, जीव के जिन औदयिक आदि पाँच भावों को सूचित किया था, उनका व्याख्यान करते हैं –

उदय उपशम क्षय क्षयोपशम, और है परिणाम भी।
इनसे सहित वे जीवगुण, बहु शास्त्र में वर्णित सभी॥ ६२॥

गाथार्थ - उदय, उपशम, क्षय, इन दोनों के मिश्र / क्षयोपशम और परिणाम से सहित वे जीव के गुण अनेक शास्त्रों में विस्तार से वर्णित हैं।

टीकार्थ - ***जुत्ता*** युक्त हैं। कौन युक्त हैं ? ***ते जीव गुणा*** परमागम में प्रसिद्ध वे जीव के गुण, जीव के भाव, परिणामयुक्त / सहित हैं। किन-किन से सहित हैं ? ***उदयेण*** कर्म के उदय से, ***उवसमेण*** कर्म के उपशम से, **खयेण** कर्म के क्षय से, इन दोनों के मिश्ररूप क्षयोपशम से और परिणाम से; यहाँ 'परिणामे' अर्थात् इसमें प्राकृत लक्षण (व्याकरण) के बल से सप्तमी विभक्ति का प्रयोग होने पर भी तृतीया में व्याख्यान हुआ है; अतः करणभूत परिणाम से सहित हैं – इस प्रकार व्युत्पत्तिरूप से औदयिक, औपशमिक, क्षायिक, क्षायोपशमिक, पारिणामिक - इस प्रकार पाँच भाव जानना चाहिए। वे कैसे हैं ? ***बहुसुदसत्थेसु वित्थिण्णा*** बहुश्रुत शास्त्रों में,

औदयिकौपशमिकक्षायोपशमिकास्त्रयो भावाः कर्मजनिताः क्षायिकस्तु केवलज्ञानादिरूपो यद्यपि वस्तुवृत्त्या शुद्धबुद्धैकजीवस्वभावः तथापि कर्मक्षयेणोत्पन्नत्वादुपचारेण कर्मजनित एव, शुद्ध-पारिणामिकः पुनः साक्षात्कर्मनिरपेक्ष एव।

अत्र व्याख्यानेन मिश्रौपशमिकक्षायिकः मोक्षकारणं मोहोदयसहित औदयिको बंधकारणं शुद्धपारिणामिकस्तु बंधमोक्षयोरकारणमिति भावार्थः। तथा चोक्तं -

मोक्षं कुर्वन्ति मिश्रौपशमिकक्षायिकाभिधाः।
बंधमौदयिका भावा निःक्रियाः पारिणामिकाः॥

एवं द्वितीयांतरस्थले पञ्चभावकथनमुख्यत्वेन गाथासूत्रमेकं गतम्॥ ६२॥

तृतीयस्थलं कथ्यते। अथानंतरं प्रथमगाथायां निश्चयेन रागादिभावानां जीवस्य कर्तृत्वं कथ्यते, द्वितीयगाथायां तदुदयागतद्रव्यकर्मणो व्यवहारेण रागादिभावकर्तृत्वमिति स्वतन्त्रगाथाद्वयं, तदनंतरं प्रथमगाथायां जीवस्य यद्येकांतेनोदयागतद्रव्यकर्मरागादिविभावानां कर्तृ भवति तदा जीवस्य सर्वप्रकारेणाकर्तृत्वं प्राप्नोतीति कथयति द्वितीयगाथायां तु पूर्वोक्तदूषणस्य परिहारं ददातीति पूर्वपक्ष-

---

तत्त्वार्थसूत्र आदि में विस्तृत विवेचनवाले हैं। औदयिक, औपशमिक, क्षायोपशमिक – ये तीन भाव कर्मजनित हैं तथा केवलज्ञानादिरूप क्षायिकभाव यद्यपि वस्तुवृत्ति से शुद्ध-बुद्ध एक जीवस्वभाव है; तथापि कर्मक्षय से उत्पन्न होने के कारण उपचार से कर्मजनित ही है और शुद्ध पारिणामिक साक्षात् कर्मनिरपेक्ष ही है।

यहाँ व्याख्यान से मिश्र, औपशमिक, क्षायिक मोक्ष के कारण हैं; मोह के उदय से सहित औदयिक बन्ध का कारण है; परन्तु शुद्ध पारिणामिक बन्ध-मोक्ष का अकारण है – ऐसा भावार्थ है। वैसा ही कहा भी है –

'मिश्र, औपशमिक और क्षायिक नामक भाव मोक्ष करते हैं; औदयिकभाव बन्ध करते हैं और पारिणामिकभाव निष्क्रिय हैं'।

इस प्रकार द्वितीय अन्तर स्थल में पाँच भावों के कथन की मुख्यता से एक गाथासूत्र पूर्ण हुआ।

(अब), तृतीय स्थल कहते हैं। वहाँ पहली गाथा में निश्चय से जीव को रागादि भावों का कर्तृत्व कहते हैं। दूसरी गाथा में उन (रागादि) सम्बन्धी उदयागत द्रव्यकर्मों का व्यवहार से कर्ता है, यह कहा है – इस प्रकार रागादि भावों के कर्तृत्व प्रतिपादनरूप दो स्वतन्त्र गाथाएँ हैं। इसके बाद प्रथम गाथा में, यदि एकान्त से उदयागत द्रव्यकर्म जीव के रागादि विभावों के कर्ता

परिहारमुख्यत्वेन गाथाद्वयं, तदनन्तरं प्रथमगाथायां जीवः पुद्गलकर्मणां निश्चयेन कर्ता न भवतीत्यागम-संवादं दर्शयति, द्वितीयायां पुनः कर्मणो जीवस्य चाभेदषट्कारकीं कथयतीति स्वतन्त्रगाथाद्वयं इति तृतीयांतरस्थले कर्तृत्वमुख्यत्वेन समुदायेन गाथाषट्कं कथयतीति। तद्यथा —

औदयिकादिभावान् केन रूपेण जीवः करोतीति पृष्टे सत्युत्तरं ददाति —

कम्मं वेदयमाणो जीवो भावं करेदि जारिसयं। (५७)
सो तस्स तेण कत्ता हवदित्ति य सासणे पढिदं॥ ६३॥

***कम्मं वेदयमाणो* कर्म वेदयमानः नीरागनिर्भरानंदलक्षणप्रचंडाखंडज्ञानकांडपरिणतात्मभावना-रहितेन मनोवचनकायव्यापाररूपकर्मकांडपरिणतेन च पूर्वं यदुपार्जितं ज्ञानावरणादिद्रव्यकर्म तदुदयागतं व्यवहारेण वेदयमानः। कौऽसौ? *जीवो* जीवः कर्ता *भावं करेदि जारिसयं* भावं परिणामं करोति**

हैं तो जीव को सर्व प्रकार से अकर्तृत्व प्राप्त होता है – ऐसा कहते हैं। दूसरी गाथा में पूर्वोक्त दूषण का परिहार कहते / करते हैं। – इस प्रकार पूर्व पक्ष के परिहार की मुख्यता से दो गाथाएँ पूर्ण हुईं। तत्पश्चात् प्रथम गाथा में जीव, पुद्गल कर्मों का निश्चय से कर्ता नहीं है – ऐसा आगम-सम्वाद दिखाते हैं तथा दूसरी में कर्म और जीव के अभेद षट्कारक कहते हैं – इस प्रकार दो स्वतन्त्र गाथाएँ हैं।

इस प्रकार तृतीय अन्तरस्थल में कर्तृत्व की मुख्यता से समुदाय द्वारा छह गाथाएँ कहते हैं। वह इस प्रकार –

औदयिक आदि भावों को किसरूप से जीव करता है, ऐसा पूछने पर उत्तर देते हैं -

है कर्म वेदयमान आतम, भाव को जैसे करे।
उसका वही कर्ता कहा, शासन में उसही रूप से॥ ६३॥

गाथार्थ - कर्म का वेदन करता हुआ जीव, जैसा भाव करता है, वह उसरूप से उसका कर्ता है – ऐसा शासन में कहा है।

टीकार्थ - ***कम्मं वेदयमाणो*** कर्म का वेदन करता हुआ, नीराग निर्भर आनन्द लक्षण प्रचण्ड अखण्ड ज्ञानकाण्डरूप से परिणत आत्मभावना से रहित और मन-वचन-काय के व्यापाररूप कर्मकाण्ड से परिणत होने के कारण पहले उपार्जित जो ज्ञानावरणादि द्रव्यकर्म, उनके उदयागत का व्यवहार से वेदन करता हुआ। वह कौन वेदन करता हुआ? ***जीवो*** जीवरूप कर्ता वेदन करता हुआ; ***भावं करेदि जारिसयं*** जैसे परिणाम को करता है। ***सो तस्स तेण कत्ता*** वह

यादृशकं *सो तस्स तेण कत्ता* सः तस्य तेन कर्ता स जीवस्तस्य रागादिपरिणामस्य कर्मतापन्नस्य तेनैव भावेन करणभूतेनाशुद्धनिश्चयेन कर्ता *हवदित्ति य सासणे पढिदं* भवतीति शासने परमागमे पठितमित्यभिप्रायः इति॥ ६३॥

जीवो निश्चयेन कर्मजनितरागादिविभावानां स्वशुद्धात्मभावनाच्युतः सन् कर्ता भोक्ता भवतीति व्याख्यानमुख्यत्वेन गाथा गता।

अथ रागादिपरिणामानामुदयागतं द्रव्यकर्म व्यवहारेण कारणं भवतीति दर्शयति —

कम्मेण विणा उदयं जीवस्स ण विज्जदे उवसमं वा।(५८)
खइयं खओवसमियं तम्हा भावं तु कम्मकदं॥ ६४॥

कम्मेण विणा कर्मणा बिना शुद्धज्ञानदर्शनलक्षणाद्भावकर्मद्रव्यकर्मनोकर्मविलक्षणात्परमात्मनोविपरीतं यदुदयागतं द्रव्यकर्म तेन बिना *उदयं जीवस्स ण विज्जदे* रागादिपरिणामरूप औदयिकभावो

उसका, उस रूप में कर्ता है। वह जीव, कर्मता को प्राप्त उस रागादि परिणाम का, अशुद्ध निश्चय की अपेक्षा करणभूत उस ही भाव से कर्ता ***हवदित्ति य सासणे पढिदं*** होता है — ऐसा शासन में, परमागम में पढ़ा गया है, कहा गया है — ऐसा अभिप्राय है॥ ६३॥

स्वशुद्धात्मा की भावना से च्युत होता हुआ जीव, निश्चय से कर्मजनित रागादि विभावों का कर्ता-भोक्ता होता है — ऐसे व्याख्यान की मुख्यता से गाथा पूर्ण हुई।

[इस गाथा-टीका में आचार्य अमृतचन्द्र ने पाँचों भावों को परिभाषित करते हुए, उन्हें उपाधि और स्वरूप की अपेक्षा विभक्त किया है।]

अब, उदयागत द्रव्यकर्म, व्यवहार से रागादि परिणामों का कारण है; ऐसा दिखाते हैं —

हैं कर्म के उपशम उदय वा, क्षय क्षयोपशम के बिना।
होते नहीं हैं जीव भाव, अतः करमकृत हैं कहा॥ ६४॥

गाथार्थ - कर्म के उदय, उपशम, क्षय, क्षयोपशम बिना जीव के (तत्सम्बन्धी भाव) नहीं होते हैं; अतः वे भाव, कर्मकृत हैं।

टीकार्थ - ***कम्मेण विणा*** कर्म के बिना; भावकर्म, द्रव्यकर्म, नोकर्म से विलक्षण शुद्ध ज्ञान-दर्शन लक्षणमयी परमात्मा से विपरीत जो उदयागत द्रव्यकर्म हैं, उनके बिना ***उदयं जीवस्स ण विज्जदे*** रागादि परिणामरूप औदयिकभाव जीव के नहीं होता है। मात्र औदयिकभाव ही नहीं होता है; ऐसा नहीं है; अपितु ***उवसमो वा*** औपशमिकभाव भी उसी द्रव्यकर्म के उपशम

जीवस्य न विद्यते। न केवलमौदयिकभावः *उवसमं वा* औपशमिकभावो वा न विद्यते तेनैव द्रव्यकर्मोपशमेन बिना *खइयं खओवसमियं* क्षायिकभावः क्षायोपशमिकभावस्तस्यैव द्रव्यकर्मणः क्षयेण क्षयोपशमेन बिना न भवति *तम्हा भावं तु कम्मकदं* तस्माद्भावस्तु कर्मकृतः यस्माच्छुद्धपारिणामिकभावं मुक्त्वा पूर्वोक्तमौदयिकौपशमिकक्षायिकक्षायोपशमिकभावचतुष्टयं द्रव्यकर्मणा बिना न भवति तस्मादेवं ज्ञायते जीवस्यौदयिकादिभावचतुष्टयमनुपचरितासद्भूतव्यवहारेण द्रव्यकर्मकृतमिति।

अत्र सूत्रे सामान्येन केवलज्ञानादिक्षायिकनवलब्धिरूपो विशेषेण तु केवलज्ञानांतर्भूतं यदनाकुलत्वलक्षणं निश्चयसुखं तत्प्रभृतयो येऽनंतगुणास्तेषामाधारभूतो योऽसौ क्षायिको भावः स एव सर्वप्रकारेणोपादेयभूत इति मनसा श्रद्धेयं ज्ञेयं मिथ्यात्वरागादिविकल्पजालत्यागेन निरंतरं ध्येयमिति भावार्थः॥ ६४॥

इति तेषामेव भावानामनुपचरितासद्भूतव्यवहारेण कर्म कर्ता भवतीति व्याख्यानमुख्यत्वेन गाथा गता।

एवं निश्चयेन रागादिभावानां जीवः कर्ता पूर्वगाथायां भणितमत्र तु व्यवहारेण कर्म कर्तृ भवतीति स्वतन्त्रगाथाद्वयं गतम्।

बिना नहीं होता है। ***खइयं खओवसमियं*** क्षायिकभाव, क्षायोपशमिकभाव, उसी द्रव्यकर्म के क्षय, क्षयोपशम के बिना नहीं होते हैं; ***तम्हा भावं तु कम्मकदं*** इसलिए भाव कर्मकृत हैं; जिस कारण शुद्ध पारिणामिकभाव को छोड़कर पूर्वोक्त औदयिक, औपशमिक, क्षायिक, क्षायोपशमिक – ये चार भाव, द्रव्यकर्म के बिना नहीं होते हैं; उससे ही ज्ञात होता है कि जीव के औदयिक आदि चार भाव अनुपचरित असद्भूतव्यवहार से द्रव्यकर्म-कृत हैं।

इस सूत्र में सामान्य से केवलज्ञानादि नव क्षायिकलब्धिरूप और विशेष से केवलज्ञान में अन्तर्भूत जो अनाकुलत्व लक्षण निश्चय सुख, तत्प्रभृति जो अनन्त गुण, उनका आधारभूत जो वह क्षायिकभाव है, वह ही सर्व प्रकार से उपादेयभूत है – ऐसा मन से श्रद्धान करना चाहिए, जानना चाहिए और मिथ्यात्व-रागादि विकल्पजाल के त्यागरूप से (उसका ही) निरन्तर ध्यान करना चाहिए – ऐसा भावार्थ है॥ ६४॥

इस प्रकार अनुपचरित असद्भूतव्यवहार से उन्हीं भावों का कर्म कर्ता है, इस व्याख्यान की मुख्यता से गाथा पूर्ण हुई।

इस प्रकार पूर्व गाथा में निश्चय से रागादि भावों का कर्ता जीव को कहा गया था और यहाँ व्यवहार से कर्म को कर्ता कहा गया है - इस प्रकार दो स्वतन्त्र गाथाएँ पूर्ण हुईं।

अथ जीवस्यैकांतेन कर्माकर्तृत्वे दूषणद्वारेण पूर्वपक्षं करोति —

भावो जदि कम्मकदो अत्ता कम्मस्स होदि किह कत्ता।(५९)
ण कुणदि अत्ता किंचिवि मुत्ता अण्णं सगं भावं॥ ६५॥

भावो जदि कम्मकदो भावो यदि कर्मकृतः यद्येकांतेन रागादिभावः कर्मकृतो भवति *आदा कम्मस्स होदि किह कत्ता* तदात्मा द्रव्यकर्मणः कथं कर्ता भवति यतः कारणाद्रागादिपरिणामाभावे सति द्रव्यकर्म नोत्पद्यते। तदपि कथमितिचेत्? *ण कुणदि अत्ता किंचिवि* न करोत्यात्मा किमपि। किंकृत्वा? *मुत्ता अण्णं सगं भावं* स्वकीयचैतन्यभावं मुक्त्वान्यत् द्रव्यकर्मादिकं न करोतीत्यात्मनः सर्वथाप्यकर्तृत्वदूषणद्वारेण पूर्वपक्षेऽग्रे द्वितीयगाथायां परिहार इत्येकं व्याख्यानं तावत् द्वितीयव्याख्याने पुनरत्रैव पूर्वपक्षोऽत्रैव परिहारो द्वितीयगाथायां स्थितपक्ष एव। कथमिति चेत्? पूर्वोक्तप्रकारेणात्मा कर्मणां कर्ता न भवतीति दूषणे दत्ते सति सांख्यमतानुसारिशिष्यो वदति —

अब, एकान्त से जीव को कर्म के अकर्तृत्व में दूषण द्वार से पूर्व पक्ष कहते हैं —

यदि कर्मकृत हों भाव तो, आतम करम कर्ता बने।
पर यह अशक्य है जीव क्योंकि, अपने भावों को करे॥ ६५॥

गाथार्थ - यदि (सर्वथा) भाव, कर्मकृत हों तो आत्मा कर्म का कर्ता होना चाहिए; परन्तु वह कैसे हो सकता है? क्योंकि आत्मा अपने भाव को छोड़कर, अन्य कुछ भी नहीं करता है।

टीकार्थ - ***भावो जदि कम्मकदो*** भाव यदि कर्मकृत हैं, यदि एकान्त से (सर्वथा) रागादिभाव कर्मकृत हैं; ***आदा कम्मस्स होदि किह कत्ता*** तो आत्मा द्रव्यकर्मों का कर्ता कैसे होता है (हो सकता है)? जिस कारण रागादि परिणाम का अभाव होने पर द्रव्यकर्म उत्पन्न नहीं होता है। वह भी कैसे? यदि ऐसा प्रश्न हो तो कहते हैं — ***ण कुणदि अत्ता किंचिवि*** आत्मा कुछ नहीं करता है? वह क्या करके कुछ भी नहीं करता है? ***मुत्ता अण्णं सगं भावं*** अपने चैतन्यभाव को छोड़कर अन्य द्रव्यकर्मादि का कुछ भी नहीं करता है। — इस प्रकार आत्मा के सर्वथा अकर्तृत्व में दूषण की अपेक्षा पूर्व पक्ष में और आगे द्वितीय गाथा में परिहार (इस प्रकार गाथा पूर्ण हुई)। — ऐसा एक व्याख्यान है।

तथा द्वितीय व्याख्यान में पुनः यहाँ ही पूर्व पक्ष और यहाँ ही परिहार है द्वितीय गाथा में तो स्थितपक्ष (सुनिश्चित हुआ तथ्य) ही दिखाया है। यह कैसे? यदि ऐसा प्रश्न हो तो कहते हैं कि पूर्वोक्त प्रकार से आत्मा कर्मों का कर्ता नहीं है — इसमें दोष दिए जाने पर सांख्यमतानुसारी शिष्य कहता है —

''अकर्ता निर्गुणः शुद्धो नित्यः सर्वगतोऽक्रियः। अमूर्तश्चेतनो भोक्ता जीवः कपिलशासने॥''

इति वचनादस्माकं मते आत्मनः कर्माकर्तृत्वं भूषणमेव न दूषणम्। अत्र परिहारः – यथा शुद्धनिश्चयेन रागाद्यकर्तृत्वमात्मनः तथा यद्यशुद्धनिश्चयेनाप्यकर्तृत्वं भवति तदा द्रव्यकर्मबंधाभावस्तदभावे संसाराभावः संसाराभावे सर्वदैव मुक्तप्रसंगः स च प्रत्यक्षविरोध इत्यभिप्रायः॥ ६५॥

एवं प्रथमव्याख्याने पूर्वपक्षद्वारेण द्वितीयव्याख्याने पुनः पूर्वपक्षपरिहारद्वारेणेति गाथा गता।

अथ पूर्वसूत्रे आत्मनः कर्माकर्तृत्वे सति दूषणरूपेण पूर्वपक्षस्तस्य परिहारं ददाति द्वितीयव्याख्यानपक्षे स्थितपक्षं दर्शयति –

भावो कम्मणिमित्तो कम्मं पुण भावकारणं हवदि। (६०)
ण दु तेसिं खलु कत्ता ण विणा भूदा दु कत्तारं॥ ६६॥

***भावो* निर्मलचिज्ज्योतिः स्वभावाच्छुद्धजीवास्तिकायात्प्रतिपक्षभूतो भावो मिथ्यात्वरागादि-**

'कपिल शासन (सांख्यमत) में जीव, अकर्ता, निर्गुण, शुद्ध, नित्य, सर्वगत, अक्रिय, अमूर्त, चेतन, भोक्ता है।'

अविभागि जैसे परमात्मद्रव्य निश्चय से लोकाकाशप्रमाण असंख्येय प्रदेशी होने पर भी विवक्षित अखण्ड एक द्रव्य होने के कारण भाग / भेद का अभाव होने से अविभागी है; उसी प्रकार परमाणुद्रव्य भी निरंश होने के कारण भाग / भेद का अभाव होने से अविभागी है। और वह परमाणु कैसा है? ***मुत्तिभवो*** अमूर्त परमात्मद्रव्य से विलक्षण जो स्पर्श, रस, गन्ध, वर्ण युक्त मूर्ति है, उससे उत्पन्न होने के कारण मूर्तिभव है — ऐसा सूत्र का अभिप्राय है॥ ८४॥

इस प्रकार परमाणु के स्वरूपकथन की अपेक्षा द्वितीय स्थल में प्रथम गाथा पूर्ण हुई।

अब, पृथ्वी आदि जाति से भिन्न परमाणु नहीं है, ऐसा निश्चय करते हैं —

आदेश मात्र से मूर्त कारण चार धातु का तथा।
परिणाम गुणयुत स्वयं शब्द विहीन परमाणु सदा॥ ८५॥

आदेसमत्तमुत्तो आदेशमात्रमूर्तः आदेशमात्रेण संज्ञादिभेदेनैव परमाणोर्मूर्तत्वनिबंधनभूता वर्णादिगुणा भिद्यंते पृथक् क्रियंते, न च सत्ताप्रदेशभेदेन। वस्तुतस्तु य एव परमाणोरादिमध्यांतभूतप्रदेशः स एव रूपादिगुणानामपि, अथवा मूर्त इत्यादिश्यते कथ्यते न च दृष्ट्या दृश्यते तेनादेशमात्रमूर्तः, *धाउचउक्कस्स कारणं जो दु* निश्चयेन शुद्धबुद्धैकस्वभावैरपि पृथिव्यादिजीवैर्व्यवहारेणानादिकर्मोदय-वशेन यानि पृथिव्यप्तेजोवायुधातुचतुष्कसंज्ञानि शरीराणि गृहीतानि तिष्ठन्ति तेषामन्येषां च जीवेना-गृहीतानां हेतुत्वेन निमित्तत्वाद्धातुचतुष्कस्य कारणं यस्तु *सो णेओ परमाणू* यः पूर्वं कथित एकोऽपि परमाणुः पृथिव्यादिधातुचतुष्करूपेण कालांतरेण परिणमति, स परमाणुरिति ज्ञेयः। *परिणामगुणो* औदयिकादिभावचतुष्टयरहितत्वेन पारिणामिकगुणः। पुनः किंविशिष्टः ? *सयमसद्दो* एकप्रदेशत्वेन कृत्वानंत परमाणुपिण्डलक्षणेन शब्दपर्यायेण सह विलक्षणत्वात्स्वयं व्यक्तिरूपेणाशब्द इति सूत्रार्थः ॥ ८५ ॥

एवं परमाणूनां पृथिव्यादिजातिभेदनिराकरणकथनेन द्वितीयगाथा गता।

गाथार्थ - जो आदेशमात्र से मूर्त है, चार धातुओं का कारण है, परिणाम गुणवाला और स्वयं अशब्द है, उसे परमाणु जानो।

टीकार्थ - ***आदेसमत्तमुत्तो*** आदेशमात्र मूर्त है; आदेशमात्र से संज्ञादि भेद से ही परमाणु के मूर्तत्व को निबन्धनभूत / कारणभूत वर्णादि गुण भेदित होते हैं, पृथक् किए जाते हैं; सत्ता और प्रदेश-भेद की अपेक्षा पृथक् नहीं किए जाते हैं। वास्तव में तो जो परमाणु का आदि-मध्य -अन्तभूत प्रदेश है, वही रूपादि गुणों का भी है। अथवा ***'मूर्त'*** ऐसा कहा जाता है परन्तु दृष्टि से दिखाई नहीं देता, उस कारण आदेशमात्र से मूर्त है। ***धाउचउक्कस्स कारणं जो दु*** निश्चय से शुद्ध-बुद्ध एक स्वभावी होने पर भी पृथ्वी आदि जीवों द्वारा व्यवहार से अनादि कर्मोदयवश जो पृथ्वी, जल, अग्नि, वायुरूप धातु चतुष्क नामक शरीर ग्रहण किए जाते हैं, वे उनमें रहते हैं, उनके और अन्य के तथा जीव के द्वारा नहीं ग्रहण किए गए शरीरों के भी हेतु होने से, निमित्त होने के कारण धातु चतुष्क का कारण है जो, ***सो णेओ परमाणू*** जो पूर्वकथित एक ही परमाणु कालान्तर में पृथ्वी आदि धातु चतुष्करूप से परिणमित होता है, वह परमाणु है – ऐसा जानो। ***परिणामगुणो*** औदयिक आदि चार भाव से रहित होने के कारण पारिणामिक गुणवाला है। और किस विशेषतावाला है ? ***सयमसद्दो*** एक प्रदेशी होने के कारण, अनन्त परमाणुओं के पिण्ड द्वारा व्यक्त होनेवाले लक्षणरूप शब्द पर्याय के साथ विलक्षण होने से स्वयं व्यक्तिरूप से अशब्द है – ऐसा सूत्रार्थ है॥ ८५ ॥

इस प्रकार परमाणु के पृथ्वी आदि जातिभेद के निराकरण-कथन की अपेक्षा दूसरी गाथा पूर्ण हुई।

अथ शब्दस्य पुद्गलस्कंदपर्यायत्वं दर्शयति —

सद्दो खंधप्पभवो खंधो परमाणुसंगसंघादो। (७९)
पुट्ठेसु तेसु जायदि सद्दो उप्पादगो णियदो॥ ८६॥

सद्दो श्रवणेन्द्रियावलम्बनो भावेन्द्रियपरिच्छेद्यो ध्वनिविशेषः शब्दः। स च किंविशिष्टः? *खंधप्पभवो* स्कंदेभ्यः सकाशादुत्पन्नः प्रभवः इति स्कंदप्रभवः। स्कंदलक्षणं कथ्यते — *खंधो परमाणु-संगसंघादो* स्कंदो भवति। कथंभूतः? परमाणुसंगसंघातः अनंतपरमाणुसंगानां समूहानामपि संघातः समुदायः। इदानीं स्कंदेभ्यः सकाशाच्छब्दस्य प्रभवत्वमुत्पत्तिं कथयति। *पुट्ठेसु तेसु* स्पृष्टेषु तेषु पूर्वोक्तेषु स्कंदेषु स्पृष्टेषु लग्नेषु परस्परं संघट्टितेषु सत्सु *जायदि* जायते प्रभवति। स कः कर्ता? *सद्दो* पूर्वोक्तशब्दः।

अयमत्राभिप्राय :— द्विविधाः स्कंदा भवन्ति भाषावर्गणायोग्या ये तेऽभ्यंतरे कारणभूताः सूक्ष्मास्ते च निरंतरं लोके तिष्ठन्ति, ये तु बहिरंगकारणभूतास्तालवोष्ठपुटव्यापारघंटाभिघातमेघादयस्ते

अब, शब्द पुद्गल-स्कन्ध की पर्याय है; ऐसा दिखाते हैं —

स्कन्ध से उत्पन्न शब्द स्कन्ध अणुसंघात हैं।
अभिघात से उत्पन्न शब्द, अतः नियम उत्पाद्य है॥ ८६॥

गाथार्थ - शब्द, स्कन्धजन्य हैं। स्कन्ध, परमाणुओं के समूह के संघात / मिलाप से बनता है। उन स्कन्धों के परस्पर स्पर्शित / टकराने पर शब्द उत्पन्न होते हैं; इस प्रकार वे नियम से उत्पन्न होने-योग्य हैं।

टीकार्थ - ***सद्दो*** श्रवणेन्द्रिय के अवलम्बन से, भावेन्द्रिय द्वारा जानने-योग्य ध्वनिविशेष शब्द है। वह किस विशेषतावाला है? ***खंधप्पभवो*** स्कन्ध से प्रभव, उत्पन्न होता है; इसलिए स्कन्धप्रभव है। स्कन्ध का लक्षण कहते हैं — ***खंधो परमाणुसंगसंघादो*** स्कन्ध है। वह कैसा है? परमाणुसंगसंघातमय है, अनन्त परमाणुसङ्गों के, समूहों के भी संघातमय है।

अब, स्कन्धों से शब्द के प्रभवत्व, उत्पत्ति को कहते हैं — ***पुट्ठेसु तेसु*** उनके स्पष्ट होने पर, पूर्वोक्त स्कन्धों के स्पृष्ट होने पर, लग्न / संलग्न / मिलने पर, संघट्टित होने / टकराने पर, ***जायदि*** उत्पन्न होता है। कर्तारूप वह कौन उत्पन्न होता है? ***सद्दो*** पूर्वोक्त शब्द उत्पन्न होता है।

यहाँ अभिप्राय यह है — स्कन्ध दो प्रकार के हैं। भाषावर्गणा के योग्य जो वे अन्तरङ्ग में कारणभूत सूक्ष्म हैं, वे निरन्तर लोक में रहते हैं; और जो वे बहिरङ्ग कारणभूत तालू, ओष्ठपुट -व्यापार (ओंठ की हलन-चलनरूप क्रिया), घण्टा का अभिघात, मेघादि स्थूल हैं वे कहीं,

स्थूलाः क्वापि क्वापि तिष्ठन्ति, न सर्वत्र; यत्रेयमुभयसामग्री समुदिता तत्र भाषावर्गणाः शब्दरूपेण परिणमन्ति न सर्वत्र।

स च शब्दः किं विशिष्टः? *उप्पादिगो णियदो* भाषावर्गणास्कंदेभ्य उत्पद्यते इत्युत्पादकः नियतो निश्चितः न चाकाशद्रव्यरूपस्तद्गुणो वा यद्याकाशगुणो भवति तर्हि श्रवणेन्द्रियविषयो न भवति। कस्मात्? आकाशगुणस्यामूर्तत्वादिति। अथवा *उप्पादिगो* प्रायोगिकः पुरुषादिप्रयोगप्रभवः *णियदो* नियतो वैश्रसिको मेघादिप्रभवः। अथवा भाषात्मको भाषारहितश्चेति, भाषात्मको द्विविधोऽक्षरात्मकोऽनक्षरात्मकश्चेति। अक्षरात्मकः संस्कृतप्राकृतादिरूपेणार्यम्लेच्छभाषाहेतुः अनक्षरात्मको द्वीन्द्रियादिशब्दरूपो दिव्यध्वनिरूपश्च। इदानीमभाषात्मकः कथ्यते — सोऽपि द्विविधो प्रायोगिको वैश्रसिकश्चेति। प्रायोगिकस्तु ततविततं घनसुषिरादिः। तथा चोक्तं —

ततं वीणादिकं ज्ञेयं विततं पटहादिकं।
घनं तु कंसतालादि सुषिरं वंशादिकं विदुः॥

वैश्रसिकस्तु मेघादिप्रभवः पूर्वोक्तः एव।

कहीं रहते हैं, सर्वत्र नहीं रहते हैं। जहाँ ये दोनों सामग्री एकत्रित हो जाती हैं, वहाँ भाषावर्गणा शब्दरूप से परिणमित होती है; सर्वत्र नहीं होती है। वह शब्द और किस विशेषतावाला है?

उप्पादिगो णियदो भाषावर्गणारूप स्कन्ध से उत्पन्न होता है; अतः उत्पन्न होनेवाला नियत, निश्चित है; आकाश द्रव्यरूप नहीं है अथवा उसका गुण नहीं है। यदि आकाश का गुण होता तो श्रवणेन्द्रिय का विषय नहीं होता। आकाश का गुण होने पर श्रवणेन्द्रिय का विषय क्यों नहीं होता? आकाश गुण के अमूर्त होने से वह श्रवणेन्द्रिय का विषय नहीं हो सकता है।

अथवा ***उप्पादिगो*** प्रायोगिक है, पुरुष आदि के प्रयोग से उत्पन्न होता है। ***णियदो*** नियत है, वैश्रसिक / स्वाभाविक है, मेघादि से उत्पन्न है; अथवा भाषात्मक और भाषारहित है। भाषात्मक दो प्रकार का है – अक्षरात्मक और अनक्षरात्मक। संस्कृत-प्राकृत आदि रूप से आर्य-म्लेच्छ भाषा के हेतुभूत अक्षरात्मक हैं। दो इन्द्रिय आदि के शब्दरूप और दिव्यध्वनिरूप अनक्षरात्मक हैं।

अब, अभाषात्मक कहते हैं; वह भी दो प्रकार का है – प्रायोगिक और वैश्रसिक। तत, वितत, घन, सुषिर आदि प्रायोगिक हैं। वैसा ही कहा भी है – 'वीणादि को तत जानना चाहिए, पटहादि को वितत, काँसे-ताल आदि को घन और वंशादि को सुषिररूप जानो।'

पूर्वोक्त मेघादि से उत्पन्न ही वैश्रसिक हैं।

इदं सर्वं हेयतत्त्वमेतस्माद्भिन्नं शुद्धात्मतत्त्वमुपादेयमिति भावार्थः ॥ ८६ ॥

एवं शब्दस्य पुद्गलद्रव्यपर्यायत्वस्थापनामुख्यत्वेन तृतीयगाथा गता।

अथ परमाणोरेकप्रदेशत्वं व्यवस्थापयति —

णिच्चो णाणवगासो ण सावगासो पदेसदो भेत्ता।(८०)
खंदाणं वि य कत्ता पविभत्ता कालसंखाणं॥ ८७॥

णिच्चो नित्यः। कस्मात्? *पदेसदो* प्रदेशतः परमाणो खलु एकेन प्रदेशेन सर्वदैवाविनश्वरत्वान्नित्यो भवति *णाणवगासो* नानवकाशः किन्त्वेकेन प्रदेशेन स्वकीयवर्णादिगुणानामवकाशदानात्सावकाशः *ण सावगासो* न सावकाशः किंत्वेकेन प्रदेशेन द्वितीयादिप्रदेशाभावान्निरवकाशः *भेत्ता खंदाणं* भेत्ता स्कंदानां *कत्ता अवि य* कर्ता अपि च स्कंदानां जीववत्।

तद्यथा — यथायं जीवः स्वप्रदेशगतरागादिविकल्परूपनिःस्नेहभावेन परिणतः सन् कर्मस्कंदानां

ये सभी हेय तत्त्व हैं, इनसे भिन्न शुद्धात्मतत्त्व उपादेय है – ऐसा भावार्थ है॥ ८६ ॥

इस प्रकार शब्द, पुद्गलद्रव्य की पर्याय है, इसकी स्थापना की मुख्यता से तीसरी गाथा पूर्ण हुई।

अब, परमाणु के एक प्रदेशत्व व्यवस्थापित करते हैं —

ना अनवकाश न सावकाश, प्रदेशतः है नित्य अणु।
स्कन्ध भेत्ता तथा कर्ता प्रविभागि संख्या काल अणु॥ ८७॥

गाथार्थ - प्रदेश की अपेक्षा परमाणु नित्य है, न वह अनवकाश है और न सावकाश है; स्कन्धों का भेत्ता / भेदन करनेवाला है, कर्ता है, काल और संख्या का प्रविभाग करनेवाला है।

टीकार्थ - ***णिच्चो*** नित्य है। किस अपेक्षा नित्य है? ***पदेसदो*** प्रदेश की अपेक्षा नित्य है। वास्तव में परमाणु का एक प्रदेश होने से सर्वदा ही अविनश्वर होने के कारण नित्य है। ***णाणवगासो*** अनवकाश नहीं है; किन्तु एक प्रदेश होने से अपने वर्णादि गुणों को अवकाश देने के कारण सावकाश है। ***ण सावगासो*** सावकाश नहीं है, किन्तु एक प्रदेश होने से द्वितीय आदि प्रदेश का अभाव होने के कारण निरवकाश है। ***भेत्ता खंदाणं*** स्कन्धों का भेत्ता / भेदन करनेवाला है। ***कत्ता अवि य*** और जीव के समान स्कन्धों का कर्ता भी है।

वह इस प्रकार – जैसे यह जीव प्रदेशगत रागादि विकल्पोंरूप स्नेह से रहित हो

भेत्ता विनाशको भवति तथा परमाणुरप्येकप्रदेशगतनिःस्नेहभावेन परिणतः सन् स्कंदानां विघटनकाले भेत्ता भेदको भवति। यथा स एव जीवो निःस्नेहात्परमात्मतत्त्वाद्विपरीतेन स्वप्रदेशगतमिथ्यात्वरागादिस्निग्धभावेन परिणतः सन्नवतरज्ञानावरणादिकर्मस्कंदानां कर्ता भवति तथा स एव परमाणुरेकप्रदेशगतस्निग्धभावेन परिणतः सन् द्व्यणुकादिस्कंदानां कर्ता भवति। अत्र योऽसौ स्कंदानां भेदको भणितः स कार्यपरमाणुरुच्यते यस्तु कारकस्तेषां स कारणपरमाणुरिति कार्यकारणभेदेन द्विधा परमाणुर्भवति। तथा चोक्तं — *''स्कंदभेदाद्भवेदाद्यः स्कंदानां जनकोपरः।''*

अथवा भेदविषये द्वितीयव्याख्यानं क्रियते। परमाणुरयम्। कस्मात्। एकप्रदेशत्वेन बहुप्रदेशस्कंदाद्भिन्नत्वात्। स्कंदोऽयम्। कस्मात्? बहुप्रदेशत्वेनैकप्रदेशत्वेनैकप्रदेशपरमाणोर्भिन्नत्वादिति। *पविभत्ता कालसंखाणं* प्रविभक्ता कालसंख्ययोर्जीववदेव। यथा एकप्रदेशस्थकेवलज्ञानांशेनैकसमयेन भगवान् केवली समयरूपव्यवहारकालस्य संख्यायाश्च प्रविभक्ता परिच्छेदको ज्ञायको भवति तथा

परिणमित होता हुआ कर्मस्कन्धों का भेत्ता, विनाशक है; उसी प्रकार परमाणु भी एक प्रदेशगत स्नेहभाव से रहित हो परिणमित होता हुआ स्कन्धों के विघटन काल में भेत्ता, भेदक होता है। जैसे वह ही जीव स्नेह से रहित परमात्मतत्त्व से विपरीत होने के कारण स्वप्रदेशगत मिथ्यात्व -रागादि स्निग्धभाव से परिणमित होता हुआ नवीन ज्ञानावरणादि कर्मस्कन्धों का कर्ता होता है; उसी प्रकार वह ही परमाणु एक प्रदेशगत स्निग्धभाव से परिणत होता हुआ द्व्यणुक आदि स्कन्धों का कर्ता होता है।

यहाँ जो वह स्कन्धों का भेदक कहा है, वह कार्य परमाणु कहलाता है और जो उन्हें करनेवाला है, वह कारण परमाणु है; इस प्रकार कार्य-कारण के भेद से परमाणु दो प्रकार का है। वैसा ही कहा भी है – 'स्कन्ध के भेद से पहला अर्थात् कार्य परमाणु और स्कन्धों का जनक दूसरा अर्थात् कारण परमाणु है।'

अथवा भेद विषय में दूसरा व्याख्यान किया जाता है – यह परमाणु है, यह परमाणु क्यों है? एक प्रदेशी होने के कारण, बहु प्रदेशी स्कन्धों से भिन्न होने की अपेक्षा यह परमाणु है। यह स्कन्ध है। यह स्कन्ध क्यों है? बहुप्रदेशी होने के कारण, एक प्रदेशी परमाणु से भिन्न होने की अपेक्षा स्कन्ध है।

पविभत्ता कालसंखाणं जीव के समान ही काल और संख्या का प्रविभागी है। जैसे एक प्रदेश में स्थित एक समयवर्ती केवलज्ञान अंश द्वारा भगवान केवली समयरूप व्यवहारकाल के और संख्या के प्रविभक्त, परिच्छेदक, ज्ञायक हैं; उसी प्रकार परमाणु भी मन्दगति से अणु से

परमाणुरप्येकप्रदेशेन मंदगत्याऽणोरण्वंतरव्यतिक्रमणलक्षणेन कृत्वा समयरूपव्यवहारकालस्य संख्यायाश्च प्रविभक्ता भेदको भवतीति।

संख्या कथ्यते — द्रव्यक्षेत्रकालभावरूपेण संख्या चतुर्विधा भवति, सा च जघन्योत्कृष्टभावेन प्रत्येकं द्विविधा। एकपरमाणुरूपा जघन्या द्रव्यसंख्येति, अनंतपरमाणुपुंजरूपोत्कृष्टद्रव्यसंख्येति; एक-प्रदेशरूपा जघन्या क्षेत्रसंख्या, अनंतप्रदेशरूपोत्कृष्टा क्षेत्रसंख्या; एकसमयरूपा जघन्या व्यवहारकाल-संख्या, अनंतसमयरूपोत्कृष्टव्यवहारकालसंख्या; परमाणुद्रव्ये वर्णादीनां सर्वजघन्या तु या शक्तिः सा जघन्या भावसंख्या, तस्मिन्नेव परमाणुद्रव्ये सर्वोत्कृष्टा तु या वर्णादिशक्तिः सा तूत्कृष्टा भावसंख्येति। एवं जघन्योत्कृष्टा प्रत्येकं द्रव्यक्षेत्रकालभावसंख्या ज्ञातव्याः॥ ८७॥

एवं परमाणुद्रव्यप्रदेशाधारं कृत्वा समयादिव्यवहारकालकथनमुख्यत्वेन एकत्वादिसंख्याकथनेन च द्वितीयस्थले चतुर्थगाथा गता।

अथ परमाणुद्रव्ये गुणपर्यायस्वरूपं कथयति —

दूसरे अणु का व्यतिक्रमण / उल्लङ्घन लक्षण एक प्रदेश द्वारा समयरूप व्यवहारकाल का और संख्या का प्रविभक्त, भेदक होता है।

संख्या कहते हैं – द्रव्य, क्षेत्र, काल, भावरूप से संख्या चार प्रकार की है; और वह भी प्रत्येक जघन्य और उत्कृष्ट के भेद से दो-दो प्रकार की है। एक परमाणुरूप जघन्य द्रव्य संख्या है, अनन्त परमाणुओं के समूहरूप उत्कृष्ट द्रव्य संख्या है। एक प्रदेशरूप जघन्य क्षेत्र संख्या है, अनन्त प्रदेशरूप उत्कृष्ट क्षेत्र संख्या है। एक समयरूप जघन्य व्यवहारकाल संख्या है, अनन्त समयरूप उत्कृष्ट व्यवहारकाल संख्या है। परमाणु द्रव्य में वर्णादि की जो सर्व जघन्य शक्ति है, वह जघन्यभाव संख्या है; उसी परमाणु द्रव्य में जो सर्वोत्कृष्ट वर्णादि शक्ति है, वह उत्कृष्टभाव संख्या है।

इस प्रकार द्रव्य, क्षेत्र, काल, भाव में से प्रत्येक की संख्या जघन्य और उत्कृष्ट जानना चाहिए॥ ८७॥

इस प्रकार परमाणु द्रव्य के प्रदेश को आधार कर समय आदि व्यवहारकाल के कथन की मुख्यता से और एकत्व आदि संख्या-कथन की अपेक्षा द्वितीय स्थल में चौथी गाथा पूर्ण हुई।

अब, परमाणु द्रव्य में गुण-पर्याय के स्वरूप को कहते हैं —

जो एक रस अरु गंध, वर्ण, स्पर्श दो युत, शब्द का।
कारण, अशब्द, स्कन्ध अंदर वह परमाणु जानना॥ ८८॥

एयरसवण्णगंधं दो फासं सद्दकारणमसद्दं। (८१)
खंदंतरिदं दव्वं परमाणुं तं वियाणाहि॥ ८८॥

एयरसवण्णगंधं दो फासं एकरसवर्णगंधद्विस्पर्शः। तथाहि — तत्र परमाणौ तिक्तादिपञ्चरस-पर्यायाणामेकतमेनैकेनैकदा रसो वर्तते शुक्लादिपञ्चवर्णपर्यायाणामेकतमेनैकेनैकदा वर्णो वर्तते सुरभिदुरभिरूपगंधपर्याययोर्द्वयोरेकतरेणैकेनैकदा गंधो वर्तते शीतस्निग्धशीतरूक्षउष्णस्निग्धउष्णरूक्ष-रूपाणां चतुर्णां स्पर्शपर्यायद्वंद्वानामेकतमेनैकेनैकदा स्पर्शो वर्तते *सद्दकारणमसद्दं* शब्दकारणोऽप्यशब्द आत्मवत्। यथात्मा व्यवहारेण ताल्वोष्ठपुटव्यापारेण शब्दकारणभूतोऽपि निश्चयेनातीन्द्रियज्ञान-विषयत्वाच्छब्दज्ञानविषयो न भवति शब्दादिपुद्गलपर्यायरूपो वा न भवति तेन कारणेनाशब्दः तथा परमाणुरपि शक्तिरूपेण शब्दकारणभूतोऽप्येकप्रदेशत्वेन शब्दव्यक्त्यभावादशब्दः *खंदंतरिदं दव्वं परमाणुं तं वियाणाहि* यमेवमुक्तवर्णादिगुणशब्दादिपर्यायवृत्तिविशिष्टस्कंदांतरितं द्रव्यरूपस्कंदपरमाणुं विजानीहि परमात्मवदेव।

तद्यथा — यथा परमात्मा व्यवहारेण द्रव्यभावरूपकर्मस्कन्दांतर्गतोऽपि निश्चयनयेन शुद्ध

गाथार्थ - जो एक रस, एक वर्ण, एक गन्ध, दो स्पर्शवाला है, शब्द का कारण और अशब्द है, स्कन्धों के अन्दर है, उसे परमाणु द्रव्य जानो।

टीकार्थ - ***एयरसवण्णगंधं दोफासं*** एक रस-वर्ण-गन्ध, दो स्पर्श हैं। वह इस प्रकार — वहाँ परमाणु में तिक्त आदि पाँच रस पर्यायों में से एक समय में कोई एक रस रहता है; शुक्ल आदि पाँच वर्ण पर्यायों में से एक समय में कोई एक वर्ण रहता है; सुरभि-दुरभिरूप दो गन्ध पर्यायों में से एक समय में कोई एक गन्ध रहती है; शीत-स्निग्ध, शीत-रूक्ष, उष्ण-स्निग्ध, उष्ण-रूक्ष — स्पर्श पर्याय के इन चार युगलों में से एक समय में कोई एक युगल स्पर्श रहता है। ***सद्दकारणमसद्दं*** शब्द का कारण होने पर भी आत्मा के समान अशब्द है। जैसे आत्मा, व्यवहार से तालु, औष्ठपुट-व्यापार से (दोनों ओठों के हलन-चलनरूप व्यापार से) शब्द का कारणभूत होने पर भी निश्चय से अतीन्द्रिय ज्ञान का विषय होने के कारण शब्द-ज्ञान का विषय नहीं है; अथवा शब्द आदि पुद्गल पर्यायरूप नहीं होता है, उस कारण अशब्द है; उसी प्रकार परमाणु भी शक्तिरूप से शब्द का कारणभूत होने पर भी एक प्रदेशी होने के कारण शब्द की व्यक्ति / प्रगटता का अभाव होने से अशब्द है। ***खंदंतरिदं दव्वं परमाणुं तं वियाणाहि*** परमात्मा के समान कहे गए वर्णादि गुण, शब्दादि पर्याय की वृत्ति से विशिष्ट जो स्कन्ध के अन्दर (परमाणु) है, उसे ही द्रव्यरूप स्कन्ध परमाणु जानो।

वह इस प्रकार — जैसे परमात्मा व्यवहार से द्रव्य-भावरूप कर्मस्कन्धों के अन्तर्गत होने

-बुद्धैकस्वभाव एव तथा परमाणुरपि व्यवहारेण स्कंदांतर्गतोऽपि निश्चयनयेन स्कंदबहिर्भूतशुद्धद्रव्यरूप एव अथवा स्कंदांतरित इति कोऽर्थः स्कंदात्पूर्वमेव भिन्न इत्यभिप्रायः॥ ८८॥

एवं परमाणुद्रव्यवर्णादिगुणस्वरूपशब्दादिपर्यायस्वरूपकथनेन पञ्चगाथा गता।

इति परमाणुद्रव्यरूपेण द्वितीयस्थले समुदायेन गाथापञ्चकं गतम्।

अथ सकलपुद्गलभेदानामुपसंहारमावेदयति —

उवभोज्जमिंदिएहिं य इंदियकाया मणो य कम्माणि।(८२)
जं हवदि मुत्तिमण्णं तं सव्वं पोग्गलं जाणे॥ ८९॥

उवभोज्जमिंदियेहिं य वीतरागातीन्द्रियसुखास्वादरहितानां जीवानां यदुपभोग्यं पञ्चेन्द्रियविषय-स्वरूपं *इंदियकाया* अतीन्द्रियात्मस्वरूपाद्विपरीतानीन्द्रियाणि अशरीरात्मपदार्थात्प्रतिपक्षभूता औदारिक-वैक्रियिकाहारकतैजसकार्मणशरीरसंज्ञाः पञ्चकायाः *मणो य* मनोगतविकल्पजालरहितात्

पर भी निश्चयनय से शुद्ध-बुद्ध एक स्वभावी हैं; उसी प्रकार परमाणु भी व्यवहार से स्कन्ध के अन्तर्गत होने पर भी निश्चयनय की अपेक्षा स्कन्ध से बहिर्भूत / भिन्न शुद्ध द्रव्यरूप ही है।

अथवा ***स्कंदांतरित*** इसका क्या अर्थ है – स्कन्ध से पहले ही वह उससे भिन्न है – ऐसा अभिप्राय है॥ ८८॥

इस प्रकार परमाणु द्रव्य के वर्णादि गुणों का स्वरूप और शब्द आदि पर्याय के स्वरूप -कथन की अपेक्षा पाँचवीं गाथा पूर्ण हुई।

इस प्रकार परमाणु द्रव्यरूप से दूसरे स्थल में समुदाय की अपेक्षा पाँच गाथाएँ पूर्ण हुईं।

अब, सकल पुद्गल-भेदों के उपसंहार का आवेदन करते हैं / मर्यादापूर्वक ज्ञान कराते हैं –

उपभोग्य इन्द्रिय से व इन्द्रिय काय मन व कर्म भी।
जो कुछ भी मूर्तिक है सभी, जानो कहा पुद्गल वही॥ ८९॥

गाथार्थ - इन्द्रियों द्वारा उपभोग्य-विषय, इन्द्रियाँ, शरीर, मन, कर्म और अन्य जो कुछ मूर्त है, वह सब पुद्गल जानो।

टीकार्थ - ***उवभोज्जमिंदिएहिं*** वीतराग अतीन्द्रियसुख के आस्वाद से रहित जीवों के जो उपभोग्य पञ्चेन्द्रिय विषयस्वरूप, ***इन्दियकाया*** अतीन्द्रिय आत्मस्वरूप से विपरीत इन्द्रिय; अशरीर आत्मपदार्थ से प्रतिपक्षभूत औदारिक, वैक्रियिक, आहारक, तैजस, कार्मणशरीर नामक पाँच शरीर ***मणो य*** और मनोगत विकल्पजाल से रहित शुद्ध जीवास्तिकाय से विपरीत मन;

शुद्ध-जीवास्तिकायाद्विपरीतं मनश्च *कम्माणि* कर्मरहितात्मद्रव्यात् प्रतिकूलानि ज्ञानावरणाद्यष्टकर्माणि *जं हवदि मुत्तिमण्णं* अमूर्तात्मस्वभावात्प्रतिपक्षभूतमन्यदपि यन्मूर्तं प्रत्येकानंतसंख्येयासंख्येयानंताणु-स्कंदरूपमनंताविभागिपरमाणुराशिरूपं च *तं सव्वं पोग्गलं जाणे* तत्सर्वमन्यच्च नोकर्मादिकं पुद्गलं जानीहि। इति पुद्गलद्रव्योपसंहारः ॥ ८९ ॥

एवं पुद्गलास्तिकायोपसंहाररूपेण तृतीयस्थले गाथैका गता।

इति *पञ्चास्तिकायषड्द्रव्यप्रतिपादकप्रथममहाधिकारे* गाथादशकपर्यंतं स्थलत्रयेण *पुद्गलास्ति-काय* नामा *पञ्चमोऽन्तराधिकारः* समाप्तः।

अथानंतरमनंतकेवलज्ञानादिरूपादुपादेयभूतात् शुद्धजीवास्तिकायात्सकाशाद्भिन्ने हेयरूपे धर्माधर्मास्तिकायाधिकारे गाथासप्तकं भवति। तत्र गाथासप्तकमध्ये धर्मास्तिकायस्वरूपकथनमुख्यत्वेन *धम्मत्थिकायमरसं* इत्यादि पाठक्रमेण गाथात्रयं, तदनंतरमधर्मास्तिकायस्वरूपनिरूपणमुख्यत्वेन *जह हवदि* इत्यादि गाथासूत्रमेकं, अथ धर्माधर्मोभयसमर्थनमुख्यत्वेन तयोरस्तित्वाभावे दूषणमुख्यत्वेन च *जादो अलोग* इत्यादि पाठक्रमेण गाथात्रयमिति। एवं सप्तगाथाभिः स्थलत्रयेण धर्माधर्मास्तिकाय-व्याख्याने समुदायपातनिका। तद्यथा —

कम्माणि कर्मरहित आत्मद्रव्य से प्रतिकूल ज्ञानावरणादि आठ कर्म; ***जं हवदि मुत्तिमण्णं*** अमूर्त आत्मस्वभाव से प्रतिपक्षभूत अन्य भी जो मूर्त प्रत्येक अनन्त की संख्यावाले संख्येय, असंख्येय, अनन्त अुण-स्कन्धरूप, अनन्त अविभागी परमाणु राशिरूप ***तं सव्वं पोग्गलं जाणे*** वे सभी और अन्य नोकर्मादि भी पुद्गल जानो — इस प्रकार पुद्गलद्रव्य के कथन का उपसंहार हुआ॥ ८९ ॥

इस प्रकार पुद्गलास्तिकाय के उपसंहाररूप से तृतीय स्थल में एक गाथा पूर्ण हुई।

इस प्रकार ***पञ्चास्तिकाय षड्द्रव्य प्रतिपादक प्रथम महाधिकार*** में दश गाथा पर्यन्त तीन स्थल द्वारा ***पुद्गलास्तिकाय नामक पाँचवाँ अन्तराधिकार*** पूर्ण हुआ।

अब, इसके बाद अनन्त केवलज्ञानादिरूप से उपादेयभूत शुद्ध जीवास्तिकाय से भिन्न हेयरूप ***धर्माधर्मास्तिकाय अधिकार*** में सात गाथाएँ हैं। उन सात गाथाओं में से धर्मास्तिकाय के स्वरूप-कथन की मुख्यता से ***धम्मत्थिकायमरसं*** इत्यादि पाठक्रम से तीन गाथाएँ हैं। तत्पश्चात् अधर्मास्तिकाय-स्वरूप के निरूपण की मुख्यता से ***जह हवदि*** इत्यादि एक गाथा -सूत्र है। तदनन्तर धर्म-अधर्म दोनों के समर्थन की मुख्यता से और दोनों के अस्तित्व के अभाव में दूषण की मुख्यता से ***जादो अलोग*** इत्यादि पाठक्रम से तीन गाथाएँ हैं।

धर्मास्तिकायस्वरूपं कथयति —

धम्मत्थिकायमरसं अवण्णगंधं असद्दमप्फासं।(८३)
लोगागाढं पुट्ठं पिहुलमसंखादियपदेसं॥ ९०॥

धम्मत्थिकायं धर्मास्तिकायो भवति *अरसमवण्णमगंधमसद्दमप्फासं* रसवर्णगंधशब्दस्पर्शरहितः *लोगागाढं* लोकव्यापकः *पुट्ठं* निर्विकारस्वसंवेदनज्ञानपरिणतजीवप्रदेशेषु परमानन्दैकलक्षणसुखरसा -स्वादसमरसीभाववत् सिद्धक्षेत्रे सिद्धराशिवत् पूर्णघटे जलवत् तिलेषु तैलवद्वा स्पृष्टः परस्परप्रदेशव्यव -धानरहितत्वेन निरंतरः न च निर्जनप्रदेशे भावितात्ममुनिसमूहवन्नगरे जनचयवद्वा सांतरः, बहुलं अभव्य -जीवप्रदेशेषु मिथ्यात्वरागादिवल्लोके नभोवद्वा पृथुलोऽनाद्यनंतरूपेण स्वभावविस्तीर्णः न च केवलि -समुद्घाते जीवप्रदेशवल्लोके वस्त्रादिप्रदेशविस्तारवद्वा पुनरिदानीं विस्तीर्णः। पुनरपि किंविशिष्टः ?

इस प्रकार सात गाथाओं द्वारा तीन स्थलों के माध्यम से धर्माधर्मास्तिकाय व्याख्यान में सामूहिक उत्थानिका पूर्ण हुई। वह इस प्रकार —

धर्मास्तिकाय का स्वरूप कहते हैं —

धर्मास्तिकाय अरस अवर्ण अगन्ध शब्द-स्पर्श बिन।
विस्तृत अखण्ड रु लोक-व्यापि, कहें असंख्य प्रदेश जिन॥ ९०॥

गाथार्थ - धर्मास्तिकाय अरस, अवर्ण, अगन्ध, अशब्द, अस्पर्श स्वभावी है; लोकव्यापक है, अखण्ड, विशाल और असंख्यात प्रदेशी है।

टीकार्थ - ***धम्मत्थिकायं*** धर्मास्तिकाय है। ***अरसमवण्णमगंधमसद्दमप्फासं*** रस, वर्ण, गन्ध, शब्द, स्पर्श से रहित है। ***लोगागाढं*** लोकव्यापक है। ***पुट्ठं*** निर्विकार स्वसंवेदन ज्ञान परिणत जीवप्रदेशों में परम आनन्द एक लक्षण सुखरस के आस्वादमय समरसी भाव के समान, सिद्धक्षेत्र में सिद्धसमूह के समान, पूर्ण घट में भरे जल के समान या तिल में तेल के समान स्पृष्ट है; परस्पर प्रदेशों में व्यवधान / अन्तर से रहित होने के कारण निरन्तर है; निर्जनप्रदेश में आत्मा को भाते हुए (आत्मा में लीन) मुनिसमूह के समान या नगर में स्थित जनसमूह के समान सान्तर / अन्तरसहित नहीं है; ***बहुलं*** अभव्य जीव के प्रदेशों में स्थित मिथ्यात्व-रागादि के समान या लोक में स्थित नभ / आकाश के समान विशाल है; स्वभावतः ही अनादि-अनन्तरूप से विस्तृत है; केवली समुद्घात में जीव-प्रदेशों के समान अथवा लोक में वस्त्रादि-प्रदेशों के विस्तार के समान यह विस्तृत नहीं है। वह और किस विशेषतावाला है? ***असंखादियपदेसं*** निश्चय से

असंखादियपदेसं निश्चयेनाखण्डैकप्रदेशोऽपि सद्भूतव्यवहारेण लोकाकाशप्रमितासंख्यातप्रदेश इति सूत्रार्थः ॥ ९० ॥

अथ धर्मस्यैवावशिष्टस्वरूपं प्रतिपादयति —

अगुरुगलहुगेहिं सया तेहिं अणंतेहिं परिणदं णिच्चं। (८४)
गदिकिरियाजुत्ताणं कारणभूदं सयमकज्जं ॥ ९१ ॥

अगुरुगलहुगेहिं सदा तेहिं अणंतेहिं परिणदं अगुरुलघुकैः सदा तैरनंतैर्परिणतः प्रतिसमयसंभवत्-षट्स्थानपतितवृद्धिहानिभिरनंतैरविभागपरिच्छेदैः परिणताः येऽगुरुलघुकगुणाः स्वरूपप्रतिष्ठत्वनिबंधन-भूतास्तैः कृत्वा पर्यायार्थिकनयेनोत्पादव्ययपरिणतोऽपि द्रव्यार्थिकनयेन *णिच्चं* नित्यं *गदिकिरिया-जुत्ताणं कारणभूदं* गतिक्रियायुक्तानां कारणभूतः यथा सिद्धो भगवानुदासीनोऽपि सिद्धगुणानुराग-परिणतानां भव्यानां सिद्धगतेः सहकारिकारणं भवति तथा धर्मोऽपि स्वभावेनैव गतिपरिणतजीवपुद्गला-नामुदासीनोऽपि गतिसहकारिकारणं भवति *सयमकज्जं* स्वयमकार्यः यथा सिद्धः स्वकीयशुद्धास्तित्वेन

अखण्ड एक प्रदेशी होने पर भी सद्भूत व्यवहार से लोकाकाश प्रमाण असंख्यात प्रदेशी है — ऐसा सूत्रार्थ है ॥ ९० ॥

अब, धर्म के ही शेष रहे स्वरूप का प्रतिपादन करते हैं —

उन नंत रूप अगुरुलघु से, सदा परिणमता तथा।
है हेतु गति परिणाम युत को, नहीं कार्य स्वयं तथा ॥ ९१ ॥

गाथार्थ - वह उन अनन्त अगुरुलघुकों द्वारा नित्य परिणमित है, गतिक्रिया-युक्तों को कारणभूत और स्वयं अकार्य है।

टीकार्थ - ***अगुरुगलघुगेहिं सदा तेहिं अणंतेहिं परिणदं*** सदा उन अनन्त अगुरुलघुकों द्वारा परिणमित है; प्रतिसमय होनेवाली षट्स्थान पतित हानि-वृद्धिरूप अनन्त अविभाग परिच्छेद से परिणमित जो अगुरुलघुकगुण हैं, उनसे स्वरूप-प्रतिष्ठान का निबन्धन / कारणभूत है। पर्यायार्थिकनय से उत्पाद-व्ययरूप परिणमित होने पर भी द्रव्यार्थिकनय से ***णिच्चं*** नित्य है। ***गतिकिरियाजुत्ताणं कारणभूदं*** गतिक्रिया-युक्तों को कारणभूत है। जैसे सिद्ध भगवान उदासीन होने पर भी सिद्ध गुणों के प्रति अनुरागरूप से परिणमित भव्यों के लिए वे सिद्धगति में सहकारी कारण हैं; उसी प्रकार धर्म भी उदासीन होने पर भी स्वभाव से ही गतिरूप परिणत जीव-पुद्गलों को गति में सहकारी कारण होता है। ***सयमकज्जं*** स्वयं अकार्य है। जैसे सिद्ध अपने शुद्ध अस्तित्व से निष्पन्न होने के कारण अन्य किसी के द्वारा कृत नहीं हैं, अतः अकार्य हैं; उसी प्रकार

निष्पन्नत्वादन्येन केनापि न कृत इत्यकार्यः तथा धर्मोऽपि स्वकीयास्तित्वेन निष्पन्नत्वादकार्य इत्यभिप्रायः॥ ९१॥

अथ धर्मस्य गतिहेतुत्वे लोकप्रसिद्धदृष्टांतमाह —

उदयं जह मच्छाणं गमणाणुग्गहयरं हवदि लोए। (८५)
तह जीवपुग्गलाणं धम्मं दव्वं वियाणीहि॥ ९२॥

उदकं यथा मत्स्यानां गमनानुग्रहकरं भवति लोके तथैव जीवपुद्गलानां धर्मद्रव्यं विजानीहि हे शिष्य। तथाहि — यथा हि जलं स्वयमगच्छन्मत्स्यानप्रेरयत्सत्तेषां स्वयं गच्छतां गतेः सहकारिकारणं भवति तथा धर्मोऽपि स्वयमगच्छत्परानप्रेरयंश्च स्वयमेव गतिपरिणतानां जीवपुद्गलानां गतेः सहकारिकारणं भवति। अथवा भव्यानां सिद्धगतेः पुण्यवत्।

तद्यथा — यथा रागादिदोषरहितः शुद्धात्मानुभूतिसहितो निश्चयधर्मो यद्यपि सिद्धगतेरुपादान -कारणं भव्यानां भवति तथा निदानरहितपरिणामोपार्जिततीर्थकरप्रकृत्युत्तमसंहननादिविशिष्टपुण्यरूप -धर्मोऽपि सहकारिकारणं भवति, तथा यद्यपि जीवपुद्गलानां गतिपरिणतेः स्वकीयोपादानकारणमस्ति तथापि धर्मास्तिकायोऽपि सहकारिकारणं भवति। अथवा भव्यानामभव्यानां वा यथा चतुर्गतिगमनकाले यद्यप्यभ्यंतरशुभाशुभपरिणाम उपादानकारणं भवति तथापि द्रव्यलिङ्गादि दानपूजादिकं वा बहिरंगशुभा -नुष्ठानं च बहिरंगसहकारिकारणं भवति तथा जीवपुद्गलानां यद्यपि स्वयमेव निश्चयेनाभ्यंतरेऽन्तरंग -सामर्थ्यमस्ति तथापि व्यवहारेण धर्मास्तिकायोऽपि गतिकारणं भवतीति भावार्थः॥ ९२॥

धर्म भी अपने अस्तित्व से निष्पन्न होने के कारण अकार्य है — ऐसा अभिप्राय है॥ ९१॥

अथवा जैसे भव्यों या अभव्यों को चतुर्गति गमन के समय यद्यपि अन्तरङ्ग शुभाशुभ परिणाम उपादान कारण हैं, तथापि द्रव्यलिङ्गादि या दान-पूजादि और बहिरङ्ग शुभ अनुष्ठान बहिरङ्ग सहकारी कारण हैं; उसी प्रकार यद्यपि जीव-पुद्गलों की स्वयं ही निश्चय से अभ्यन्तर में अन्तरङ्ग सामर्थ्य है, तथापि व्यवहार से धर्मास्तिकाय भी गति में कारण है — ऐसा भावार्थ है॥ ९२॥

इस प्रकार प्रथम स्थल में धर्मास्तिकाय के व्याख्यान की मुख्यता से तीन गाथाएँ पूर्ण हुईं।

अब, (द्वितीय स्थल में) अधर्मास्तिकाय का स्वरूप कहते हैं —

ज्यों धर्मद्रव्य उसी प्रकार अधर्मद्रव्य भी जानना।
है भू समान निमित्त स्थिति क्रियायुत को जानना॥ ९३॥

गाथार्थ - जैसे धर्मद्रव्य है, उसी प्रकार अधर्म नामक द्रव्य भी जानो; परन्तु वह स्थिति -क्रिया-युक्त को पृथ्वी के समान कारणभूत है।

एवं प्रथमस्थले धर्मास्तिकायव्याख्यानमुख्यत्वेन गाथात्रयं गतम्।

अथाधर्मास्तिकायस्वरूपं कथ्यते —

जह हवदि धम्मदव्वं तह तं जाणेह दव्वमधमक्खं। (८६)
ठिदिकिरियाजुत्ताणं कारणभूदं तु पुढवीव॥ ९३॥

यथा भवति धर्मद्रव्यं तथार्थं कर्तुं जानीहि हे शिष्य द्रव्यमधर्माख्यं। तच्च कथंभूतं ? स्थितिक्रिया -युक्तानां कारणभूतं पृथिवीवत्। तथाहि — यथा पूर्वमरसादिविशेषणविशिष्टं धर्मद्रव्यं व्याख्यातं अधर्मद्रव्यमपि तद्रूपं ज्ञातव्यं, अयं तु विशेषः तन्मत्स्यानां जलवज्जीवपुद्गलानां गतेर्बहिरंगसहकारिकारणं, इदं तु यथा पृथिवी स्वयं पूर्वं तिष्ठंती परं स्थापयंती तुरंगादीनां स्थितेर्बहिरंगसहकारिकारणं भवति तथा जीवपुद्गलानां स्थापयत्स्वयं च पूर्वं तिष्ठत्सत् स्थितेस्तेषां कारणमिति पथिकानां छायावद्वा।

अथवा शुद्धात्मस्वरूपे या स्थितिस्तस्या निश्चयेन वीतरागनिर्विकल्पस्वसंवेदनं कारणं व्यवहारेण पुनरर्हत्सिद्धादिपरमेष्ठिगुणस्मरणं च यथा तथा जीवपुद्गलानां निश्चयेन स्वकीयस्वरूपमेव स्थितेरुपादानकारणं व्यवहारेण पुनरधर्मद्रव्यं चेति सूत्रार्थः॥ ९३॥

अथ धर्माधर्मसद्भावे साध्ये हेतुं दर्शयति —

टीकार्थ - जैसा धर्मद्रव्य है; उसी प्रकार के प्रयोजन को करने के लिए हे शिष्य! अधर्म नामक द्रव्य को जानो। वह और कैसा है ? पृथ्वी के समान स्थिति-क्रिया-युक्तों को कारणभूत है। वह इस प्रकार — जैसे पहले अरस आदि विशेषण विशिष्ट धर्मद्रव्य का व्याख्यान किया था; उसी रूप अधर्मद्रव्य भी जानो परन्तु यह विशेष है कि वह मछलियों को जल के समान जीव -पुद्गलों की गति का बहिरङ्ग सहकारी कारण है और यह जैसे पहले से ही स्थित पृथ्वी दूसरे ठहरते हुए तुरङ्ग / घोड़े आदि को स्थिति में / ठहरने में बहिरङ्ग सहकारी कारण होती है उसी प्रकार; अथवा पथिकों को छाया के समान; स्वयं पहले से स्थित रहता हुआ, जीव पुद्गलों को स्थित होने में / ठहरने में उनका कारण है।

अथवा जो शुद्धात्मस्वरूप में स्थिति है, उसका निश्चय से वीतराग निर्विकल्प स्वसम्वेदन कारण है तथा जैसे व्यवहार से अरहन्त, सिद्ध आदि परमेष्ठियों के गुणों का स्मरण करता है; उसी प्रकार निश्चय से जीव-पुद्गलों को अपना स्वरूप ही स्थिति का उपादान कारण है तथा व्यवहार से अधर्मद्रव्य है — ऐसा सूत्रार्थ है॥ ९३॥

इस प्रकार अधर्मद्रव्य के व्याख्यानरूप से दूसरे स्थल में एक गाथा-सूत्र पूर्ण हुआ।

अब, (तृतीय स्थल में) धर्म-अधर्म के सद्भावरूप साध्य में हेतु दिखाते हैं —

जादो अलोगलोगो जेसिं सब्भावदो य गमणठिदी। (८७)
दो वि य मया विभत्ता अविभत्ता लोयमेत्ता य॥ ९४॥

जादो जातम्। किं कर्तृ ? *अलोगलोगो* लोकालोकद्वयम्। कस्माज्जातं ? *जेसिं सब्भावदो य* ययोर्धर्माधर्मयोः स्वभावतश्च। न केवलं लोकालोकद्वयं जातम्। *गमणठिदी* गतिस्थितिश्चैतौ द्वौ। कथंभूतौ ? *दोवि य मया* द्वौ धर्माधर्मौ मतौ संमतौ स्तः अथवा पाठांतरं *अमया* अमयौ न केनापि कृतौ *विभत्ता* विभक्तौ भिन्नौ *अविभत्ता* अविभक्तौ *लोयमेत्ता य* लोकमात्रौ चेति।

तद्यथा — धर्माधर्मौ विद्येते लोकालोकसद्भावात् षड्द्रव्यसमूहात्मको लोकः, तस्माद्बहिर्भूतं शुद्ध -माकाशमलोकः, तत्र लोके गतिं तत्पूर्वकस्थितिमास्कंदतोः स्वीकुर्वतोर्जीवपुद्गलयोर्यदि बहिरंगहेतुभूत -धर्माधर्मौ न स्यातां, तदा लोकाद्बहिर्भूतबाह्यभागेऽपि गतिः केन नाम निषिध्यते न केनापि, ततो लोकालोकविभागादेव ज्ञायते धर्माधर्मौ विद्येते। तौ च किंविशिष्टौ ? भिन्नास्तित्व-

सद्भाव से जिनके हैं लोक अलोक व गमनस्थिति।
अविभक्त और विभक्त लोकप्रमाण उनकी सम्मति॥ ९४॥

गाथार्थ - जिनके सद्भाव से लोक-अलोक का विभाग है, (जीव-पुद्गलों की) गति -स्थिति है, वे दोनों विभक्त और अविभक्त स्वरूप तथा लोकप्रमाण माने गए हैं।

टीकार्थ - ***जादो*** उत्पन्न हैं। कर्तारूप कौन उत्पन्न हैं ? ***अलोगलोगो*** लोकालोक दोनों उत्पन्न हैं। वे किससे उत्पन्न हैं ? ***जेसिं सब्भावदो य*** जिन धर्म-अधर्म से और स्वभाव से उत्पन्न हैं। मात्र लोकालोक दोनों ही उत्पन्न नहीं हैं; अपितु ***गमणठिदी*** गति और स्थिति ये दोनों भी हैं। ये दोनों कैसे हैं ? ***दोवि य मया*** उन दोनों धर्म और अधर्म की सम्मति से, स्वीकृति से हैं। अथवा ***'अमया'*** पाठान्तर भी है, जिसका अर्थ है ये दोनों किसी ने भी बनाए नहीं हैं; अकृत हैं। ***विभत्ता*** विभक्त / भिन्न हैं; ***अविभत्ता*** अविभक्त / अभिन्न हैं, ***लोयमेत्ता य*** और लोकमात्र हैं।

वह इस प्रकार — लोक-अलोक का सद्भाव होने से धर्म-अधर्म हैं; षट्द्रव्यों के समूहात्मक लोक है, उससे बहिर्भूत शुद्ध / मात्र आकाश अलोक है। वहाँ लोक में गति और उस पूर्वक स्थिति को प्राप्त हुए, स्वीकार किए जीव-पुद्गलों के यदि बहिरङ्ग हेतुभूत धर्म-अधर्म न हों तो लोक से बहिर्भूत बाह्य भाग में भी गति किसके द्वारा रोकी जा सकती है ? किसी के द्वारा भी रोकी नहीं जा सकती है; इस लोक-अलोक के विभाग से ही धर्म-अधर्म की विद्यमानता ज्ञात होती है। वे दोनों किस विशेषतावाले हैं ? भिन्न अस्तित्व से निष्पन्न होने के कारण निश्चयनय से पृथग्भूत हैं, एकक्षेत्रावगाही होने से असद्भूत व्यवहारनय की अपेक्षा सिद्धसमूह के समान

निष्पन्नत्वात् निश्चयनयेन पृथग्भूतौ एकक्षेत्रावगाहत्वादसद्भूतव्यवहारनयेन सिद्धराशिवदभिन्नौ सर्वदैव निःक्रियत्वेन लोकव्यापक -त्वाल्लोकमात्राविति सूत्रार्थः ॥ ९४॥

अथ धर्माधर्मौ गतिस्थितिहेतुत्वविषयेऽत्यंतोदासीनाविति निश्चिनोति —

ण य गच्छदि धम्मत्थी गमणं ण करेदि अण्णदवियस्स।(८८)
हवदि गती स प्पसरो जीवाणं पुग्गलाणं च॥ ९५॥

ण य गच्छदि नैव गच्छति। स कः ? *धम्मत्थी* धर्मास्तिकायः *गमणं ण करेदि अण्णदवियस्स* गमनं न करोत्यन्यद्रव्यस्य *हवदि* तथापि भवति। स कः ? *पसरो* प्रसरः प्रवृत्तिः। कस्याश्च ? *गदिस्स य* गतेश्च। केषां गतेः ? *जीवाणं पोग्गलाणं च* जीवानां पुद्गलानां चेति।

तथाहि — यथा तुरंगः स्वयं गच्छन् स्वकीयारोहकस्य गमनहेतुर्भवति न तथा धर्मास्तिकायः। कस्मात् ? निष्क्रियत्वात् किंतु यथा जलं स्वयं तिष्ठति सति वा तिष्ठत्सत्स्वयं गच्छतां मत्स्यानामौदासीन्येन

अभिन्न हैं; सर्वदा ही निःक्रिय होने से, लोक व्यापक होने से लोकमात्र हैं — ऐसा सूत्रार्थ है॥ ९४॥

अब, गति-स्थितिहेतुत्व के विषय में धर्म-अधर्म अत्यन्त उदासीन हैं, ऐसा निश्चित करते हैं —

धर्मास्ति करता गमन न, परद्रव्य को न कराता।
निरपेक्ष हेतु मात्र ही है, जीव पुद्गल गति का॥ ९५॥

गाथार्थ - धर्मास्तिकाय गमन नहीं करता है, अन्य द्रव्य को गमन नहीं कराता है; जीव और पुद्गलों की गति का प्रसर / उदासीन निमित्तमात्र होता है।

टीकार्थ - ***ण य गच्छदि*** नहीं जाता है। वह कौन नहीं जाता है ? ***धम्मत्थी*** धर्मास्तिकाय नहीं जाता है। ***गमणं ण करेदि अण्णदवियस्स*** अन्य द्रव्य का गमन नहीं करता है; ***हवदि*** तथापि होती है। वह क्या होती है ? ***पसरो*** प्रसर, प्रवृत्ति होती है। किसकी प्रवृत्ति होती है ? ***गदिस्स य*** गति की प्रवृत्ति होती है। किनकी गति की प्रवृत्ति होती है ? ***जीवाणं पोग्गलाणं च*** जीवों और पुद्गलों की गति की प्रवृत्ति होती है।

वह इस प्रकार — जैसे स्वयं चलता हुआ घोड़ा अपने आरोहक / अश्वारोही के गमन का कारण होता है; उस प्रकार धर्मास्तिकाय नहीं है। धर्मास्तिकाय ऐसा क्यों नहीं है ? निष्क्रिय होने से वह ऐसा नहीं है; अपितु जैसे स्वयं स्थायी रहता हुआ जल उदासीनरूप से चलती हुई मछलियों की गति का निमित्त होता है; उसी प्रकार स्वयं स्थिर रहता हुआ धर्मास्तिकाय भी अपने

गतेर्निमित्तं भवति तथा धर्मोऽपि स्वयं तिष्ठन्सन् स्वकीयोपादानकारणेन गच्छतां जीवपुद्गलानामप्रेरकत्वेन बहिरंगनिमित्तं भवति। यद्यपि धर्मास्तिकायो उदासीनो जीवपुद्गलगतिविषये तथापि जीवपुद्गलानां स्वकीयोपादानबलेन जले मत्स्यानामिव गतिहेतुर्भवति, अधर्मस्तु पुनः स्वयं तिष्ठतामश्वादीनां पृथिवी-वत्पथिकानां छायावद्वा स्थितेर्बहिरंगहेतुर्भवतीति भगवतां श्रीकुंदकुंदाचार्यदेवानामभिप्रायः॥ ९५॥

अथ धर्माधर्मयोर्गतिस्थितिहेतुत्वोदासीनविषये युक्तिमुद्योतयति —

विज्जदि जेसिं गमणं ठाणं पुण तेसिमेव संभवदि। (८९)
ते सगपरिणामेहिं दु गमणं ठाणं च कुव्वंति॥ ९६॥

विद्यते येषां गमनं स्थानं पुनस्तेषामेव संभवति ते जीवपुद्गलाः स्वकपरिणामैरेव स्थानं गमनं च कुर्वंतीति। तथाहि — धर्मस्तावत्क्वापि काले गतिहेतुत्वं न त्यजति न चाधर्मः स्थितिहेतुत्वं तौ यदि

उपादान कारण से चलते हुए जीव-पुद्गलों की गति का अप्रेरक / उदासीनरूप से बहिरङ्ग निमित्त होता है। यद्यपि जीव-पुद्गल की गति के विषय में धर्मास्तिकाय उदासीन है, तथापि मछलियों को जल के समान, अपने उपादान बल से होती हुई जीव-पुद्गलों की गति का वह कारण है। अधर्म भी स्वयं स्थिर रहता हुआ, ठहरते हुए घोड़ों को पृथ्वी के समान, पथिकों को छाया के समान, अपने उपादान कारण से ठहरते हुए जीव-पुद्गलों की स्थिति का बहिरङ्ग कारण है – ऐसा ***'भगवान श्री कुन्दकुन्दाचार्यदेव'*** का अभिप्राय है॥ ९५॥

अब, धर्म-अधर्म की गति-स्थिति हेतुत्व सम्बन्धी उदासीनता के विषय में युक्ति प्रकाशित करते हैं —

है गति जिनकी उन्हीं की स्थिति सम्भव है तथा।
वे स्वयं स्व परिणाम से, गति-स्थिति करते सदा॥ ९६॥

गाथार्थ - जिनके गमन होता है, उनके ही स्थिति सम्भव है; वे (गति-स्थितिमान पदार्थ) अपने परिणामों से ही गति और स्थिति करते हैं।

टीकार्थ - जिनके गमन / गति विद्यमान है, उनके ही स्थान / स्थिति होती है। वे जीव -पुद्गल अपने परिणामों से ही गति और स्थिति करते हैं।

वह इस प्रकार – धर्मद्रव्य किसी भी समय गतिहेतुत्व नहीं छोड़ता है और अधर्मद्रव्य स्थितिहेतुत्व भी नहीं छोड़ता है। यदि गति और स्थिति के वे दोनों ही मुख्य कारण हों तो गति और स्थिति के समय परस्पर मत्सर होता। मत्सर कैसे होता? यदि ऐसा प्रश्न हो तो कहते हैं -

गतिस्थित्योर्मुख्यहेतू स्यातां तदा गतिस्थितिकाले परस्परं मत्सरो भवति। कथमिति चेत्? येषां गतिस्तेषां सर्वदैव गतिरेव न च स्थितिः येषां पुनः स्थितिस्तेषां सर्वदैव स्थितिरेव न च गतिः। न तथा दृश्यते। किंतु ये गतिं कुर्वन्ति त एव पुनरपि स्थितिं कुर्वन्ति ये स्थितिं कुर्वन्ति त एव पुनर्गतिं कुर्वन्ति। ततो ज्ञायते न तौ धर्माधर्मौ गतिस्थित्योर्मुख्यहेतु। यदि मुख्यहेतू न भवेतां तर्हि गतिस्थितिमतां जीवपुद्गलानां कथं गति स्थिति इति चेत्? ते निश्चयेन स्वकीयपरिणामैरेव गतिं स्थितिं च कुर्वंतीति।

अत्र सूत्रे निर्विकारचिदानंदैकस्वभावादुपादेयभूतात् शुद्धात्मतत्त्वाद्भिन्नत्वाद्धेयतत्त्वमित्यभिप्रायः॥ ९६॥

एवं धर्माधर्मौभयव्यवस्थापनमुख्यत्वेन तृतीयस्थले गाथात्रयं गतम्।

इति गाथासप्तकपर्यंतं स्थलत्रयेण पंचास्तिकायषड्द्रव्यप्रतिपादकप्रथममहाधिकारमध्ये धर्माधर्म-व्याख्यानरूपेण षष्ठमोऽन्तराधिकारः समाप्तः।

अथानंतरं शुद्धबुद्धैकस्वभावान्निश्चयमोक्षकारणभूतात्सर्वप्रकारोपादेयरूपात् शुद्धजीवास्तिकायात्सकाशाद्भिन्न आकाशास्तिकायः सप्तगाथापर्यंतं कथ्यते। तत्र गाथासप्तकमध्ये प्रथमतस्तावल्लो-

---

जिनकी गति होती है, उनकी हमेशा गति रहती; स्थिति नहीं हो पाती और जिनकी स्थिति होती, उनकी सर्वदा ही स्थिति रहती; गति नहीं हो पाती; परन्तु ऐसा तो दिखाई नहीं देता है; अपितु जो गति करते हैं, वे ही बाद में स्थिति करते हैं; और जो स्थिति करते हैं, वे ही बाद में गति करते हैं। इससे ज्ञात होता है कि वे धर्म-अधर्म, गति-स्थिति के मुख्य कारण नहीं हैं। यदि वे मुख्य कारण नहीं हैं तो गति-स्थितिमान जीव-पुद्गलों के गति-स्थिति कैसे होती है? वे निश्चय से अपने परिणामों द्वारा ही गति और स्थिति करते हैं।

यहाँ सूत्र में उपादेयभूत निर्विकार चिदानन्द एक स्वभावी शुद्धात्मतत्त्व से भिन्न होने के कारण ये हेय तत्त्व हैं – ऐसा अभिप्राय है॥ ९६॥

इस प्रकार धर्म-अधर्म दोनों को व्यवस्थापित करने की मुख्यता से तीसरे स्थल में तीन गाथाएँ पूर्ण हुईं।

इस प्रकार सात गाथा पर्यन्त तीन स्थल द्वारा ***'पञ्चास्तिकाय-षट्द्रव्य प्रतिपादक प्रथम महाधिकार'*** में ***'धर्म-अधर्म व्याख्यान'*** रूप से ***'छठवाँ अन्तराधिकार'*** समाप्त हुआ।

अब, इसके बाद शुद्ध-बुद्ध एक स्वभावी निश्चय मोक्ष के कारणभूत सर्व प्रकार से उपादेयरूप शुद्ध जीवास्तिकाय से भिन्न आकाशास्तिकाय का सात गाथा पर्यन्त कथन करते हैं। उन सात गाथाओं में से सर्व प्रथम लोकाकाश-अलोकाकाश – दोनों के स्वरूप-कथन की

कालोकाकाशद्वयस्वरूपकथनमुख्यत्वेन *सव्वेसिं जीवाणं...* इत्यादि गाथाद्वयं, अथ आकाशमेव गतिस्थितिद्वयं करिष्यति धर्माधर्माभ्यां किं प्रयोजनमिति पूर्वपक्षनिराकरणमुख्यत्वेन *आगासं अवगासं....* इत्यादि पाठक्रमेण गाथाचतुष्टयं, तदनंतरं धर्माधर्मलोकाकाशानामेकक्षेत्रावगाहत्वात्समानपरिमाण-त्वाच्चासद्भूतव्यवहारेणैकत्वं भिन्नलक्षणत्वान्निश्चयेन पृथक्त्वमिति प्रतिपादनमुख्यत्वेन *धम्माधम्मागासा* इत्यादि सूत्रमेकम्। एवं सप्तगाथाभिः स्थलत्रयेणाकाशास्तिकायव्याख्याने समुदायपातनिका। तद्यथा —

आकाशस्वरूपं कथयति —

सव्वेसिं जीवाणं सेसाणं तह य पुग्गलाणं च। (९०)
जं देदि विवरमखिलं तं लोए हवदि आयासं॥ ९७॥

सव्वेसिं जीवाणं* सर्वेषां जीवानां *सेसाणं तह य* शेषाणां तथैव च धर्माधर्मकालानां *पोग्गलाणं

मुख्यता से ***सव्वेसिं जीवाणं....*** इत्यादि दो गाथाएँ हैं। तत्पश्चात् गति-स्थिति दोनों को आकाश ही कर लेगा, धर्म-अधर्म से क्या प्रयोजन है ? ऐसे पूर्वपक्ष (प्रश्न) के निराकरण की मुख्यता से ***आगासं अवगासं....*** इत्यादि पाठक्रम द्वारा चार गाथाएँ हैं। तदनन्तर धर्म-अधर्म-लोकाकाश के एक क्षेत्रावगाही होने से और समान परिमाणत्व होने से असद्भूत व्यवहार की अपेक्षा एकत्व है तथा भिन्न लक्षणत्व होने से निश्चय की अपेक्षा पृथक्त्व है – ऐसे प्रतिपादन की मुख्यता से ***धम्माधम्मागासा....*** इत्यादि एक गाथा; इस प्रकार सात गाथाओं द्वारा तीन स्थल से आकाशास्तिकाय व्याख्यान में सामूहिक उत्थानिका है। वह इस प्रकार —

९८ से १०४ गाथा पर्यन्त सातवें अन्तराधिकार की सारणी

स्थलक्रम	स्थल प्रतिपादित विषय	कहाँ से कहाँ पर्यन्त	कुल गाथाएँ
१	लोकाकाश-अलोकाकाश स्वरूप कथन	९८-९९ वीं	२
२	धर्माधर्म सम्बन्धी पूर्वपक्ष, उत्तरपक्ष कथन	१००-१०३ वीं	४
३	धर्माधर्म लोकाकाश के कथञ्चित् भिन्नाभिन्नत्व	१०४ वीं	१

आकाश का स्वरूप कहते हैं —

नित जीव पुद्गल को तथा सब शेष द्रव्यों को सदा।
दे लोक में अवकाश सब आकाश द्रव्य उसे कहा॥ ९७॥

गाथार्थ - लोक में जीवों, पुद्गलों और उसी प्रकार शेष सभी द्रव्यों को जो सम्पूर्ण अवकाश देता है, वह आकाश है।

च पुद्गलानां च *जं देदि* यत्कर्तृ ददाति। किं? *विवरं* विवरं छिद्रं अवकाशमवगाहं अखिलं समस्तं तं तत्पूर्वोक्तं *लोगे* लोकविषये *हवदि आगासं* आकाशं भवति।

अत्राह शिवकुमारमहाराजनामा — हे भगवान् लोकस्तावदसंख्यातप्रदेशः अत्र लोके निश्चयनयेन नित्यनिरंजनज्ञानमयपरमानंदैकलक्षणाः अनंतानंतजीवास्तेभ्योऽप्यनंतगुणाः पुद्गला लोकाकाशप्रमितप्रदेशप्रमाणाः कालाणवो धर्माधर्मौ चेति सर्वे कथमवकाशं लभंत इति? भगवानाह — एकापवरके अनेकप्रदीपप्रकाशवदेकगूढनागरसगद्याणके बहुसुवर्णवदेकस्मिन्नुष्ट्रीक्षीरघटे मधुघटवदेकस्मिन् भूमिगृहे जयघंटादिशब्दवद्विशिष्टावगाहगुणेनासंख्येयप्रदेशेऽपि लोके अनंतसंख्या अपि जीवादयोऽवकाशं लभंत इत्यभिप्रायः॥ ९७॥

अथ षड्द्रव्यसमवायो लोकस्तस्माद्बहिरनंतमाकाशमलोक इति प्रकटयति —

टीकार्थ - ***सव्वेसिं जीवाणं*** सभी जीवों को। ***सेसाणं तह य*** और उसी प्रकार शेष धर्म, अधर्म, काल को; ***पोग्गलाणं च*** और पुद्गलों को, ***जं देदि*** कर्तारूप जो देता है। क्या देता है? ***विवरं*** विवर, छिद्र, अवकाश, अवगाह देता है; ***अखिलं*** समस्त, ***तं*** उस पूर्वोक्त, ***लोगे*** लोक विषय में, ***हवदि आगासं*** आकाश है।

यहाँ शिवकुमार नामक महाराज कहते हैं – हे भगवन्! लोक तो मात्र असंख्यात प्रदेशी है, उस लोक में निश्चयनय से नित्य, निरञ्जन, ज्ञानमय, परमानन्द एक लक्षणवाले अनन्तानन्त जीव; उनसे भी अनन्तगुणे पुद्गल, लोकाकाश के बराबर प्रदेश प्रमाण कालाणु, धर्म और अधर्म – ये सभी अवकाश / स्थान कैसे प्राप्त करते हैं?

भगवान कहते हैं – एक अपवरक / कमरे में अनेक प्रदीपों के प्रकाश-समान, एक गूढ़ नाग रस गद्याणक में बहुत सुवर्ण के समान, उष्ट्री (ऊँटनी) के दूध से भरे एक घट में मधुघट के समान; एक भूमिगृह में जय, घण्टा आदि शब्दों के समान विशिष्ट अवगाहगुण के कारण असंख्य प्रदेश होने पर भी लोक में अनन्त संख्यावाले जीवादि भी अवकाश / स्थान प्राप्त करते हैं – ऐसा अभिप्राय है॥ ९७॥

अब, षट्द्रव्यों का समूह लोक है, उससे बाहर अनन्त आकाश अलोक है; ऐसा प्रगट करते हैं —

सब जीव पुद्गल काय, धर्म अधर्म अन्य न लोक से।
है अन्त बिन नभ भिन्न और अभिन्न कहते उसी से॥ ९८॥

जीवा पुग्गलकाया धम्माधम्मा य लोगदोणण्णा। (९१)
तत्तो अणण्णमण्णं आयासं अंतवदिरित्तं॥ ९८॥

जीवा पुग्गलकाया धम्माधम्मा य जीवाः पुद्गलकायाः धर्माधर्मद्वयं चकारात्कालश्च। एते सर्वे कथंभूताः ? ***लोगदो अणण्णा*** लोकात्सकाशादनन्ये ***तत्तो*** तस्माल्लोकाकाशात् ***अणण्णमण्णं आगासं*** अनन्यदन्यच्चाकाशं यदन्यदलोकाकाशं। तत्किं प्रमाणं। ***अंतवदिरित्तं*** अन्त्यव्यतिरिक्तमनंतमिति।

अत्र सूत्रे यद्यपि सामान्येन पदार्थानां लोकादनन्यत्वं भणितं तथापि निश्चयेन मूर्तिरहितत्वकेवल -ज्ञानत्वसहजपरमानंदत्वनित्यत्वनिरंजनत्वादिलक्षणेन शेषद्रव्येभ्यो जीवानामन्यत्वं स्वकीयस्वकीय -लक्षणेन शेषद्रव्याणां च जीवेभ्यो भिन्नत्वम्। तेन कारणेन ज्ञायते संकरव्यतिकरदोषो नास्तीति भावः॥ ९८॥

एवं लोकालोकाकाशद्वयस्वरूपसमर्थनरूपेण प्रथमस्थले गाथाद्वयं गतम्।

अथाकाशं जीवादीनां यथावकाशं ददाति तथा यदि गतिस्थिती अपि ददाति तदा दोषं दर्शयति —

गाथार्थ - जीव, पुद्गलकाय, धर्म और अधर्म लोक अनन्य है, उस (लोक) से अनन्य और अन्य, अन्तरहित आकाश है।

टीकार्थ - ***जीवो पोग्गलकाया धम्मा धम्मा य*** जीव, पुद्गलकाय, धर्म-अधर्म दोनों और चकार से काल। ये सब कैसे हैं ? ***लोगदो अणण्णा*** ये सभी लोक से अनन्य हैं। ***तत्तो*** उस लोकाकाश से, ***अणण्णमण्णं आकासं*** आकाश (लोकाकाश से) अनन्य भी है और अन्य भी है परन्तु अलोकाकाश अन्य ही है। वह कितना है ? ***अंतवदिरित्तं*** अन्त से रहित, अनन्त है।

यहाँ सूत्र में यद्यपि सामान्य की अपेक्षा पदार्थों का लोक से अनन्यत्व कहा, तथापि निश्चय की अपेक्षा मूर्तिरहितत्व / अमूर्तत्व, केवलज्ञानत्व, सहज-परमानन्दत्व, नित्यत्व, निरञ्जनत्व आदि लक्षण द्वारा शेष द्रव्यों से जीव का अन्यत्व / भिन्नत्व है; और अपने-अपने लक्षण द्वारा शेष द्रव्यों का जीवों से भिन्नत्व है। उस कारण ज्ञात होता है कि संकर-व्यतिकर दोष नहीं हैं — ऐसा भाव है॥ ९८॥

इस प्रकार लोकाकाश-अलोकाकाश दोनों के स्वरूप-समर्थनरूप से प्रथम स्थल में दो गाथाएँ पूर्ण हुईं।

अब, जैसे आकाश जीवादि को अवकाश / स्थान देता है; उसी प्रकार यदि गति-स्थिति दे, तो (उसमें आनेवाले) दोष दिखाते हैं —

आयासं अवगासं गमणट्ठिदिकारणेहिं देदि जदि। (९२)
उड्ढं गदिप्पधाणा सिद्धा चिट्ठंति किध तत्थ॥ ९९॥

आयासं आकाशं कर्तृ *देदि जदि* ददाति यदि चेत्। किं ? *अवगासं* अवकाशमवगाहं। कथं सह काभ्यां ? *गमणट्ठिदिकारणेहिं* गमनस्थितिकारणाभ्यां। तदा किं दूषणं ? *उड्ढं गदिप्पधाणा* निर्विकार -विशिष्टचैतन्यप्रकाशमात्रेण कारणसमयसारभावनाबलेन नारकतिर्यग्मनुष्यदेवगतिविनाशं कृत्वा पश्चात्स्वाभाविकोर्ध्वगतिस्वभावाः संतः। के ते ? *सिद्धा* स्वभावोपलब्धिसिद्धिरूपाः सिद्धा भगवंतः *चेट्ठंति किह* तिष्ठन्ति कथं ? कुत्र ? *तत्थ* तत्र लोकाग्र इति।

अत्र सूत्रे लोकाद्बहिर्भागेऽप्याकाशं तिष्ठति तत्र किं न गच्छंतीति भावार्थः॥ ९९॥

अथ स्थितपक्षं प्रतिपादयति —

हो गति स्थिति हेतुमय, अवकाशदायक नभ यदि।
तो ऊर्ध्वगति में मुख्य शिव, कैसे ठहरते वहाँ ही ?॥ ९९॥

गाथार्थ - यदि गति-स्थिति के कारणसहित आकाश अवकाश / स्थान देता है तो ऊर्ध्वगति में प्रधान सिद्ध वहाँ (लोकाकाश में) ही कैसे (क्यों) ठहरते हैं ? (उनका गमन उससे आगे क्यों नहीं होता है ?)।

टीकार्थ - ***आयासं*** आकाशरूप कर्ता, ***देदि जदि*** यदि देता है तो। क्या देता है ? ***अवगासं*** अवकाश / अवगाह / स्थान देता है। स्थान कैसे या किनके साथ देता है ? ***गमणठिदि -कारणेहिं*** गमन-स्थिति में कारण होने के साथ देता है। यदि वह ऐसा करता है तो क्या दोष आएगा ? ***उड्ढं गदिप्पधाणा*** निर्विकार विशिष्ट चैतन्यप्रकाशमात्र कारण-समयसार की भावना के बल से नारक, तिर्यञ्च, मनुष्य, देव गति का विनाश कर, पश्चात् स्वाभाविक ऊर्ध्वगति स्वभाववान होते हुए। इस रूप वे कौन हैं ? ***सिद्धा*** स्वभाव की उपलब्धि, सिद्धिरूप सिद्ध भगवान हैं। ***चिट्ठन्ति किह*** इस रूप वे कैसे ठहरते हैं ? कहाँ ठहरते हैं ? ***तत्थ*** वहाँ लोकाग्र में ही वे कैसे ठहरते ?

इस सूत्र में (यह बताया जा रहा है कि) लोक से बहिर्भाग में भी आकाश है, वे वहाँ क्यों नहीं जाते हैं ? — यह भावार्थ है (इससे सिद्ध हुआ कि गति-स्थिति के कारण धर्म-अधर्म द्रव्य हैं; आकाशद्रव्य नहीं है)॥ ९९॥

अब, स्थित पक्ष (निश्चित हुए पक्ष) का प्रतिपादन करते हैं -

जम्हा उवरिट्ठाणं सिद्धाणं जिणवरेहिं पण्णत्तं।(९३)
तम्हा गमणट्ठाणं आयासे जाण णत्थित्ति॥ १००॥

यस्मादुपरि स्थानं सिद्धानां जिनवरैः प्रज्ञप्तं तस्मादूमनस्थानमाकाशे नास्ति जानीहीति। तथाहि -यस्मात्पूर्वगाथायां भणितं लोकाग्रेऽवस्थानं। केषां? अंजनसिद्धपादुकासिद्धगुटिकासिद्धदिग्विजय -सिद्धखड्गसिद्धादिलौकिकसिद्धविलक्षणानां सम्यक्त्वाद्यष्टगुणांतर्भूतनिर्नामनिर्गोत्रामूर्तत्वाद्यनंतगुण -लक्षणानां सिद्धानां तस्मादेव ज्ञायते नभसि गतिस्थितिकारणं नास्ति, किंतु धर्माधर्मादेव गतिस्थित्योः कारणमित्यभिप्रायः॥ १००॥

अथाकाशस्य गतिस्थितिहेतुत्वाभावे साध्ये पुनरपि कारणं कथयति —

जदि हवदि गमणहेदू आयासं ठाणकारणं तेसिं।(९४)
पसयदि अलोगहाणी लोगस्स य अंतपरिवड्ढी॥ १०१॥

सर्वज्ञ ने लोकाग्र स्थिति, सिद्ध जीवों की कही।
यों गति-स्थिति हेतुता, आकाश में किंचित् नहीं॥ १००॥

गाथार्थ - जिस कारण सिद्धों की लोक के ऊपर स्थिति, जिनवरों ने कही है, उस कारण आकाश में गति-स्थिति (हेतुता) नहीं है — ऐसा जानो।

टीकार्थ - जिस कारण जिनवरों ने सिद्धों का ऊपर स्थान कहा है, उस कारण आकाश में गमन-स्थिति (हेतुता) नहीं है — ऐसा जानो।

वह इस प्रकार — जिस कारण पूर्व गाथा में लोकाग्र में अवस्थान कहा गया है। वहाँ अवस्थान किनका कहा गया है? अञ्जनसिद्ध, पादुकासिद्ध, गुटिकासिद्ध, दिग्विजयसिद्ध, खड्ग (तलवार) सिद्ध इत्यादि लौकिक सिद्धिओं से विलक्षण, सम्यक्त्व आदि आठ गुणों में अन्तर्भूत निर्नाम, निर्गोत्र, अमूर्तत्व आदि अनन्त गुण लक्षण सिद्धों का वहाँ अवस्थान कहा गया है; इससे ही ज्ञात होता है कि आकाश में गति-स्थिति की कारणता नहीं है, अपितु धर्म-अधर्म ही गति-स्थिति के कारण हैं — ऐसा अभिप्राय है॥ १००॥

अब, आकाश के गति-स्थिति हेतुत्व के अभावरूप साध्य में और भी कारण कहते हैं —

उनकी गति में हेतु स्थितिहेतु यदि आकाश ही।
तो हो अलोकाकाश हानि वृद्धि हो लोकान्त की॥ १०१॥

गाथार्थ - यदि आकाश उनके (जीव-पुद्गलों के) गमन का हेतु और स्थिति का हेतु

जदि हवदि यदि चेद्भवति। स कः ? *गमणहेदू* गमनहेतुः। किं ? *आयासं* आकाशं, न केवलं गमनहेतुः *ठाणकारणं* स्थितिकारणं। केषां ? *तेसिं* तेषां जीवपुद्गलानां। तदा किं दूषणं भवति ? *पसयदि* प्रसजति प्राप्नोति। सा का ? *अलोगहाणी* अलोकहानिः न केवलमलोकहानिः *लोगस्स य अंतपरिवड्ढी* लोकस्य चांतपरिवृद्धिरिति।

तद्यथा — यद्याकाशं गतिस्थित्योः कारणं च भवति तदा तस्याकाशस्य लोकबहिर्भागेऽपि सद्भावात्तत्रापि जीवपुद्गलानां गमनं भवति ततश्चालोकस्य हानिर्भवति लोकांतस्य तु वृद्धिर्भवति न च तथा, तस्मात्कारणात् ज्ञायते नाकाशं स्थितिगत्योः कारणमित्यभिप्रायः॥ १०१॥

अथाकाशस्य गतिस्थितिकारणनिराकरणव्याख्यानोपसंहारः कथ्यते —

तम्हा धम्माधम्मा गमणट्ठिदिकारणाणि णागासं। (९५)
इदि जिणवरेहिं भणिदं लोगसहावं सुणंताणं॥ १०२॥

हो तो अलोक की हानि और लोक के अन्त की परिवृद्धि (सब ओर से वृद्धि) का प्रसङ्ग आएगा।

टीकार्थ - ***जदि हवदि*** यदि होता तो। वह क्या होता ? गमन में हेतु होता तो। कौन होता तो ? ***आयासं*** आकाश होता तो। मात्र गमन में ही हेतु नहीं, अपितु ***ठाणकारणं*** स्थिति में भी कारण होता तो। किनकी गति-स्थिति में कारण होता तो ? ***तेसिं*** उन जीव-पुद्गलों की गति -स्थिति में कारण होता तो। तब क्या दोष होता ? ***पसजदि*** प्रसङ्ग प्राप्त होता। वह कौन सा / कैसा प्रसङ्ग प्राप्त होता ? ***अलोगहाणि*** अलोक की हानि का प्रसङ्ग प्राप्त होता, मात्र अलोक की हानि का ही प्रसङ्ग प्राप्त नहीं होता, अपितु ***लोगस्स य अंतपरिवड्ढी*** लोक के अन्त की वृद्धि का प्रसङ्ग प्राप्त होगा।

वह इस प्रकार — यदि आकाश गति और स्थिति का कारण है तो उस आकाश का लोक से बहिर्भाग में भी सद्भाव होने से, वहाँ भी जीव-पुद्गलों का गमन होता और इससे अलोक की हानि हो जाती तथा लोकान्त की वृद्धि हो जाती; परन्तु ऐसा तो होता नहीं है; उस कारण ज्ञात होता है कि आकाश स्थिति-गति में कारण नहीं है — ऐसा अभिप्राय है॥ १०१॥

अब, आकाश की गति-स्थिति कारणता के निराकरणपरक व्याख्यान का उपसंहार कहते / करते हैं —

इसलिए गति स्थिति कारण धर्म और अधर्म हैं।
नभ नहीं, लोकस्वभाव श्रोताओं से जिन ने कहा है॥ १०२॥

तस्माद्धर्माधर्मौ गमनस्थितिकारणे न चाकाशं इति जिनवरैर्भणितं। केषां संबन्धित्वेन ? भव्यानां। किं कुर्वतां ? समवसरणे लोकस्वभावं शृण्वतामिति भावार्थः॥ १०२॥

एवं धर्माधर्माकाशानामेकक्षेत्रावगाहत्वाद्व्यवहारेणैकत्वं निश्चयेन भिन्नत्वं दर्शयति —

धम्माधम्मागासा अपुधब्भूदा समाणपरिमाणा। (९६)
पुधगुवलद्धविसेसा करेंति एगत्तमण्णत्तं॥ १०३॥

धम्माधम्मागासा धर्माधर्मलोकाकाशद्रव्याणि भवन्ति। किंविशिष्टानि ? *अपुधब्भूदा समाण -परिमाणा* व्यवहारनयेनापृथग्भूतानि तथा समानपरिमाणानि च। पुनश्च किंरूपाणि ? *पुधगुवलद्ध*

गाथार्थ - इसलिए गति-स्थिति के कारण धर्म-अधर्म हैं, आकाश नहीं है; ऐसा लोकस्वभाव श्रोताओं से जिनवरों ने कहा है।

टीकार्थ - इसलिए गमन-स्थिति के कारण धर्म-अधर्म हैं; आकाश नहीं है – ऐसा जिनवरों ने कहा है। किनके सम्बन्धीत्व से / किनसे कहा है ? भव्यों से कहा है। क्या करते हुए भव्यों से कहा है ? समवसरण में लोक-स्वभाव को सुनते हुए भव्यों से कहा है – ऐसा भावार्थ है॥ १०२॥

इस प्रकार गति-स्थिति में कारण धर्म-अधर्म हैं, आकाश नहीं; इस कथनरूप से दूसरे स्थल में चार गाथाएँ पूर्ण हुईं।

अब, धर्म, अधर्म और आकाश के एक क्षेत्रावगाहता होने के कारण व्यवहार से एकत्व और निश्चय से भिन्नत्व दिखाते हैं —

धर्माधरम आकाश अपृथग्भूत सम परिमाणमय।
हैं पृथक् उपलब्धि विशेष करें एकत्व अन्यत्वमय॥ १०३॥

गाथार्थ - धर्म, अधर्म, आकाश (लोकाकाश) अपृथग्भूत, समान परिमाणवाले और पृथक् उपलब्धि विशेषवान् हैं; इसलिए एकत्व और अन्यत्व को करते हैं।

टीकार्थ - ***धम्माधम्मागासा*** धर्म, अधर्म, लोकाकाश द्रव्य हैं। वे किस विशेषतावाले हैं ? ***अपुधब्भूदा समाणपरिमाणा*** व्यवहारनय से अपृथग्भूत और समान परिमाणवाले हैं। और किस रूप वाले हैं ? ***पुधगुवलद्धविसेसा*** निश्चय की अपेक्षा पृथक्रूप से उपलब्ध विशेषवान् हैं। ऐसे होते हुए क्या करते हैं ? ***करेंति*** करते हैं, ***एयत्तमण्णत्तं*** व्यवहार से एकत्व और निश्चय से अन्यत्व करते हैं।

-*विसेसा* निश्चयेन पृथग्रूपेणोपलब्धविशेषाणि। इत्थंभूतानि संति किं कुर्वन्ति? *करेंति* कुर्वन्ति *एयत्तमण्णत्तं* व्यवहारेणैकत्वं निश्चयेनान्यत्वं चेति।

तथाहि — यथायं जीवः पुद्गलादिपञ्चद्रव्यैः सह शेषजीवांतरैश्चैकक्षेत्रावगाहित्वाद्व्यवहारे -णैकत्वं करोति, निश्चयेन तु समस्तवस्तुगतानंतधर्मयुगपत्प्रकाशेन परमचैतन्यविलासलक्षणज्ञानगुणेन भिन्नत्वं च, तथा धर्माधर्मलोकाकाशद्रव्याण्येकक्षेत्रावगाहेनाभिन्नत्वात्समानपरिमाणत्वाच्चोपचरिता -सद्भूतव्यवहारेण परस्परमेकत्वं कुर्वन्ति, निश्चयनयेन गतिस्थित्यवगाहरूपस्वकीयलक्षणैर्नानात्वं चेति सूत्रार्थः॥ १०३॥

एवं धर्माधर्मलोकाकाशानामेकत्वान्यत्वकथनरूपेण तृतीयस्थले गाथासूत्रं गतम्।

इति पञ्चास्तिकायषड्द्रव्यप्रतिपादकप्रथममहाधिकारमध्ये गाथासप्तकपर्यंतं स्थलत्रयेणा-काशस्तिकायव्याख्यानरूपः सप्तमोऽन्तराधिकारः समाप्तः।

वह इस प्रकार — जैसे यह जीव, पुद्गलादि पाँच द्रव्यों और शेष जीवान्तरों के साथ एक क्षेत्रावगाही होने के कारण व्यवहार से एकत्व करता है; परन्तु निश्चय से समस्त वस्तुगत अनन्त धर्मों को एक साथ प्रकाशित करनेवाले परम चैतन्य विलास लक्षण ज्ञानगुण द्वारा भिन्नत्व करता है; उसी प्रकार धर्म, अधर्म, लोकाकाशद्रव्य एक क्षेत्रावगाह के कारण अभिन्न होने से और समान परिमाणी होने से उपचरित असद्भूत व्यवहार की अपेक्षा परस्पर एकत्व करते हैं; तथा निश्चयनय की अपेक्षा गति, स्थिति, अवगाहरूप अपने-अपने लक्षणों द्वारा नानात्व / भिन्नत्व करते हैं — ऐसा सूत्रार्थ है॥ १०३॥

इस प्रकार धर्म, अधर्म, लोकाकाश के एकत्व-अन्यत्व कथनरूप से तीसरे स्थल में गाथासूत्र पूर्ण हुआ।

[*इस गाथा-टीका में आचार्य अमृतचन्द्र ने दोनों नयों की अपेक्षा अन्यत्व स्पष्ट किया है; वह इस प्रकार — 'व्यवहार से गतिहेतुत्व, स्थितिहेतुत्व और अवगाहनहेतुत्वरूप पृथक् उपलब्ध विशेष द्वारा तथा निश्चय से विभक्तप्रदेशरूप पृथक् उपलब्ध विशेष द्वारा वे अन्यत्ववाले ही हैं।'*]

इस प्रकार ***'पञ्चास्तिकाय षड्द्रव्य प्रतिपादक प्रथम महाधिकार'*** में सात गाथा पर्यन्त तीन स्थल द्वारा ***'आकाशास्तिकाय व्याख्यान'*** रूप ***'सातवाँ अन्तराधिकार'*** पूर्ण हुआ।

तत्पश्चात् ***(आठवें अन्तराधिकार में)*** आठ गाथा पर्यन्त ***पञ्चास्तिकाय, षड्द्रव्य का चूलिका-व्याख्यान*** करते हैं —

तदनंतरमष्टगाथापर्यंतं पञ्चास्तिकायषड्द्रव्यचूलिकाव्याख्यानं करोति। तत्र गाथाष्टकमध्ये चेतनाचेतनमूर्तामूर्तत्वप्रतिपादनमुख्यत्वेन *आगास....* इत्यादि गाथासूत्रमेकं, अथ सक्रियनिःक्रियत्व -मुख्यत्वेन *जीवा पोग्गलकाया....* इत्यादि सूत्रमेकं, पुनश्च प्रकारांतरेण मूर्तामूर्तत्वकथनमुख्यत्वेन *जे खलु इंदियगेज्झा....* इत्यादि सूत्रमेकं, अथ नवजीर्णपर्यायादिस्थितिरूपो व्यवहारकालः जीवपुद्गलादीनां पर्यायपरिणतेः सहकारिकारणभूतः कालाणुरूपो निश्चयकाल इति कालद्वयव्याख्यानमुख्यत्वेन *कालो परिणामभवो....* इत्यादि गाथाद्वयं, तस्यैव कालस्य द्रव्यलक्षणसंभवात् द्रव्यत्वं द्वितीयादिप्रदेशाभावाद -कायत्वमिति प्रतिपादनमुख्यत्वेन *एदे कालागासा....* इत्यादि सूत्रमेकं, अथ पञ्चास्तिकायांतर्गतस्य केवलज्ञानदर्शनरूपशुद्धजीवास्तिकायस्य वीतरागनिर्विकल्पसमाधिपरिणतिकाले निश्चयमोक्षमार्ग

वहाँ आठ गाथाओं में से चेतनत्व-अचेतनत्व, मूर्तत्व-अमूर्तत्व के प्रतिपादन की मुख्यता से ***आगास....*** इत्यादि एक गाथासूत्र है। इसके बाद सक्रिय-निष्क्रियत्व की मुख्यता से ***जीवा -पोग्गलकाया....*** इत्यादि एक सूत्र है; तदुपरान्त प्रकारान्तर से मूर्त-अमूर्तत्व कथन की मुख्यता से ***जे खलु इन्दियगेज्झा....*** इत्यादि एक सूत्र है। तदनन्तर नवीन-पुरानी पर्यायादि स्थितिरूप व्यवहारकाल, जीव-पुद्गलादि की पर्यायों के परिणमन में सहकारी कारणभूत कालाणुरूप निश्चयकाल – इस प्रकार दो कालों के व्याख्यान की मुख्यता से ***कालो परिणामभवो....*** इत्यादि दो गाथाएँ हैं। उसी काल के द्रव्य का लक्षण सम्भव / सम्यक्प्रकार से घटित होने के कारण द्रव्यत्व, द्वितीयादि प्रदेश का अभाव होने से अकायत्व – इस प्रतिपादन की मुख्यता से ***एदे कालागासा....*** इत्यादि एक सूत्र है। इसके बाद पञ्चास्तिकाय के अन्तर्गत केवलज्ञान-दर्शनरूप शुद्ध जीवास्तिकाय के निश्चय मोक्षमार्गभूत वीतराग निर्विकल्प-समाधिरूप परिणमने के समय भावना / तद्रूप परिणमन के फल प्रतिपादनरूप से ***एवं पवयणसारं....*** इत्यादि दो गाथाएँ हैं।

इस प्रकार आठ गाथाओं वाले छह स्थलों द्वारा चूलिका में सामूहिक उत्थानिका हुई।

गाथा १०४ से १११ पर्यन्त अष्टम अन्तराधिकार की सारणी

स्थलक्रम	स्थल प्रतिपादित विषय	कहाँ से कहाँ पर्यन्त	कुल गाथाएँ
१	चेतनाचेतनत्वादि प्रतिपादन	१०४ वीं	१
२	सक्रिय-निष्क्रियत्व प्रतिपादन	१०५ वीं	१
३	प्रकारान्तर से मूर्तत्वामूर्तत्व प्रतिपादन	१०६ वीं	१
४	व्यवहार-निश्चयकाल प्रतिपादन	१०७-१०८ वीं	२
५	काल का द्रव्यत्व-अकायत्व प्रतिपादन	१०९ वीं	१
६	स्वरूपलीनता का फल प्रतिपादन	११०-१११ वीं	२

-भूतस्य भावनाफलप्रतिपादनरूपेण *एवं पवयणसारं....* इत्यादि गाथाद्वयम्। इत्यष्टगाथाभिः षट्स्थलैश्चूलिकायां समुदायपातनिका।

तद्यथा — द्रव्याणां मूर्तामूर्तत्वं चेतनाचेतनत्वं प्रतिपादयति —

आगासकालजीवा धम्माधम्मा य मुत्तिपरिहीणा। (९७)
मुत्तं पुग्गलदव्वं जीवो खलु चेदणो तेसु॥ १०४॥

स्पर्शरसगंधवर्णवत्या मूर्त्या रहितत्वादमूर्ता भवन्ति। ते के ? आकाशकालजीवधर्माधर्माः किंतु जीवो यद्यपि निश्चयेनामूर्ताखंडैकप्रतिभासमयत्वादमूर्तस्तथापि रागादिरहितसहजानंदैकस्वभावात्म -तत्त्वभावनारहितेन जीवेन यदुपार्जितं मूर्तं कर्म तत्संसर्गाद्व्यवहारेण मूर्तोऽपि भवति स्पर्शरसगंधवर्ण -वत्त्वान्मूर्तं पुद्गलद्रव्यम्। संशयादिरहितत्वस्वपरपरिच्छित्तिसमर्थानंतचैतन्यपरिणतत्वाज्जीवः खलु चेतकस्तेषु स्वपरप्रकाशचैतन्याभावात् शेषाण्यचेतनानीति भावार्थः॥ १०४॥

एवं चेतनाचेतनमूर्तामूर्तप्रतिपादनमुख्यत्वेन गाथासूत्रं गतम्।

वह इस प्रकार —

द्रव्यों के मूर्तत्व-अमूर्तत्व और चेतनत्व-अचेतनत्व का प्रतिपादन करते हैं —

आकाश काल रु जीव धर्म अधर्म मूर्तविहीन हैं।
है मूर्त पुद्गलद्रव्य, उनमें चेतनायुत जीव है॥ १०४॥

गाथार्थ - आकाश, काल, जीव, धर्म और अधर्म मूर्तरहित अमूर्त हैं; पुद्गलद्रव्य मूर्त है; उनमें वास्तव में जीव, चेतन है।

टीकार्थ - स्पर्श, रस, गन्ध, वर्णवाली मूर्ति से रहित होने के कारण अमूर्त हैं। अमूर्त वे कौन हैं ? आकाश, काल, जीव, धर्म और अधर्म अमूर्त हैं; किन्तु जीव यद्यपि निश्चय से अमूर्त, अखण्ड, एक प्रतिभासमय होने के कारण अमूर्त है; तथापि रागादि रहित सहजानन्द एक स्वभावी आत्मतत्त्व की भावना से रहित जीव द्वारा जो उपार्जित मूर्त कर्म हैं, उनके संसर्ग की अपेक्षा व्यवहार से मूर्त भी है; स्पर्श, रस, गन्ध, वर्णवाला होने से पुद्गलद्रव्य मूर्त है। उनमें से संशय आदि से रहित स्व-पर परिच्छित्ति / जानकारी में समर्थ अनन्त चैतन्यरूप से परिणत होने के कारण जीव वास्तव में चेतक है; स्व-पर प्रकाशक चैतन्य का अभाव होने से शेष अचेतन हैं — ऐसा भावार्थ है॥ १०४॥

इस प्रकार चेतन-अचेतन मूर्त-अमूर्त के प्रतिपादन की मुख्यता से गाथासूत्र पूर्ण हुआ।

अथ द्रव्याणां सक्रियनिःक्रियत्वं कथयति —

जीवा पुग्गलकाया सह सक्किरिया हवंति ण य सेसा।(९८)
पुग्गलकरणा जीवा खंधा खलु कालकरणेहिं दु॥ १०५॥

जीवाः पुद्गलकाया *सह सक्किरिया हवंति* सक्रिया भवंति। कथं ? सह। सह कोऽर्थः ? बहिरंग -सहकारिकारणैः सहिताः *ण य सेसा* न च जीवपुद्गलाभ्यां शेषद्रव्याणि सक्रियाणि। जीवानां सक्रियत्वे बहिरंगनिमित्तं कथ्यते *पोग्गलकरणा जीवा* मनोवचनकायव्यापाररूपक्रियापरिणतैर्निःक्रियनिर्विकार -शुद्धात्मानुभूतिभावनाच्युतैर्जीवैर्ये समुपार्जिताः कर्मनोकर्मपुद्गलास्त एव करणं कारणं निमित्तं येषां ते जीवाः पुद्गलकरणा भण्यंते। *खंदा* स्कंदाःस्कंदशब्देनात्रस्कंदाणुभेदभिन्नाद् द्विधा पुद्गला गृह्यंते। ते च कथंभूताः ? सक्रियाः। कैःकृत्वा ? *कालकरणोहिं* परिणामनिर्वर्तककालाणुद्रव्यैः *खलु* स्फुटम्।

अब, द्रव्यों का सक्रिय-निष्क्रियत्व कहते हैं —

सक्रिय सकारण जीव पुद्गल शेष सब निष्क्रिय कहे।
हैं जीव पुद्गल करणयुत स्कन्ध कालकरण कहे॥ १०५॥

गाथार्थ - बाह्य कारणसहित जीव और पुद्गल सक्रिय हैं; शेष द्रव्य सक्रिय नहीं, निष्क्रिय हैं। जीव पुद्गल-करणवाले हैं और वास्तव में स्कन्ध काल-करणवाले हैं।

टीकार्थ - ***जीवा पुग्गलकाया सक्किरिया हवंति*** जीव, पुद्गलकाय सक्रिय हैं। वे सक्रिय कैसे हैं ? ***सह*** साथ में सक्रिय हैं। ***'साथ'*** का क्या अर्थ है ? 'बहिरङ्ग सहकारी कारणों से सहित – साथ' का अर्थ है; अर्थात् बहिरङ्ग सहकारी कारणों से सहित वे सक्रिय हैं। ***ण य सेसा*** जीव-पुद्गलों से भिन्न शेष द्रव्य सक्रिय नहीं हैं। जीवों के सक्रियत्व में बहिरङ्ग निमित्त कहते हैं – ***पोग्गलकरणा जीवा*** निष्क्रिय, निर्विकार शुद्धात्मानुभूति-भावना से च्युत तथा मन, वचन, काय के व्यापाररूप क्रिया-परिणत जीव द्वारा जो समुपार्जित कर्म-नोकर्मरूप पुद्गल हैं, वे ही करण, कारण, निमित्त हैं जिनके; वे जीव पुद्गल-करण कहलाते हैं। ***खंदा*** स्कन्ध हैं। यहाँ स्कन्ध शब्द से स्कन्ध और अणु के भेद से भिन्न होने के कारण दो प्रकार के पुद्गल ग्रहण करना चाहिए। वे पुद्गल कैसे हैं ? वे सक्रिय हैं। वे किनसे सक्रिय हैं ? ***कालकरणोहिं*** परिणामनिर्वर्तक / पर्याय की उत्पत्ति में निमित्त होनेवाले कालाणुद्रव्य से सक्रिय हैं। ***खलु*** वास्तव में।

यहाँ जैसे शुद्धात्मानुभूति के बल से कर्म का क्षय हो जाने पर कर्म-नोकर्मरूप पुद्गलों का अभाव होने से सिद्धों के निष्क्रियत्व होता है, वैसा पुद्गलों के नहीं होता है।

अत्र यथा शुद्धात्मानुभूतिबलेन कर्मक्षये जाते कर्मनोकर्मपुद्गलानामभावात्सिद्धानां निःक्रियत्वं भवति न तथा पुद्गलानाम्। कस्मात्? कालस्य सर्वदैव वर्णवत्या मूर्त्या रहितत्वादमूर्तस्य विद्यमानत्वादिति भावार्थः॥ १०५॥

एवं सक्रियनिःक्रियत्वमुख्यत्वेन गाथा गता।

अथ पुनरपि प्रकारांतरेण मूर्तामूर्तस्वरूपं कथयति —

जे खलु इंदियगेज्झा विसया जीवेहिं हुंति ते मुत्ता। (९९)
सेसं हवदि अमुत्तं चित्तं उभयं समादियदि॥ १०६॥

जे खलु इंदियगेज्झा विसया ये खलु इन्द्रियैः करणभूतैर्ग्राह्या विषयाः कर्मतापन्नाः। कैः कर्तृभूतैः? *जीवेहिं* विषयसुखानंदरतैर्नीरागनिर्विकल्पनिजानंदैकलक्षणसुखामृतरसास्वादच्युतैर्बहिर्मुख-जीवैः *होंति ते मुत्ता* भवन्ति ते मूर्ताः विषयातीतस्वाभाविकसुखस्वभावात्मतत्त्वविपरीतविषयास्ते च

प्रश्न – उनके क्यों नहीं होता है?

उत्तर – वर्णवाली मूर्ति से रहित होने के कारण अमूर्त काल के सदा ही विद्यमान होने से उनके निष्क्रियत्व नहीं है – ऐसा भावार्थ है॥ १०५॥

इस प्रकार सक्रिय-निष्क्रियत्व की मुख्यता से गाथा पूर्ण हुई।

अब, और भी प्रकारान्तर से मूर्त-अमूर्त का स्वरूप कहते हैं –

जो जीव द्वारा इन्द्रियों से ग्राह्य वे सब मूर्त हैं।
हैं शेष मूर्तविहीन दोनों चित्त द्वारा ज्ञात हैं॥ १०६॥

गाथार्थ – जीवों द्वारा जो इन्द्रियों से ग्रहण करने-योग्य विषय हैं, वे वास्तव में मूर्त हैं, शेष अमूर्त हैं; चित्त इन दोनों को ग्रहण करता है / जानता है।

टीकार्थ – ***जे खलु इन्दियगेज्झा विसया*** कर्मता को प्राप्त (कर्मकारक में प्रयुक्त) जो विषय वास्तव में करणभूत इन्द्रियों से ग्राह्य हैं। कर्ताभूत किसके द्वारा ग्राह्य हैं? ***जीवेहिं*** नीराग, निर्विकल्प, निजानन्द एक लक्षण सुखामृत रस के आस्वाद से च्युत, विषयसुख के आनन्द में रत बहिर्मुख जीवों द्वारा ग्राह्य हैं। ***होंति ते मुत्ता*** विषयातीत स्वाभाविक सुखस्वभावी आत्मतत्त्व से विपरीत वे विषय मूर्त हैं। यद्यपि उनमें से कुछ सूक्ष्म होने से वर्तमान काल में इन्द्रियों के विषय नहीं हैं; तथापि कालान्तर में होंगे – इस प्रकार इन्द्रियों द्वारा ग्रहण होने की योग्यता का सद्भाव होने से वे भी इन्द्रियग्रहण-योग्य कहलाते हैं। ***सेसं हवदि अमुत्तं*** पुद्गल से भिन्न, अमूर्त,

सूक्ष्मत्वेन केचन यद्यपीन्द्रियविषयाः वर्तमानकाले न भवन्ति तथापि कालांतरे भविष्यंतीतीन्द्रियग्रहण -योग्यतासद्भावादिन्द्रियग्रहणयोग्या भण्यंते। *सेसं हवदि अमुत्तं* अमूर्तातीन्द्रियज्ञानसुखादिगुणाधारं यदात्मद्रव्यं तत्प्रभृति पञ्चद्रव्यरूपं पुद्गलादन्यत् यच्छेषं तद्भवत्यमूर्तं *चित्तं उभयं समादियदि* चित्तमुभयं समाददाति। चित्तं हि मतिश्रुतज्ञानयोरुपादानकारणभूतमनियतविषयं च, तच्च श्रुतज्ञानस्वसंवेदनज्ञान -रूपेण यदात्मग्राहकं भावश्रुतं तत्प्रत्यक्षं यत्पुनर्द्वादशांगचतुर्दशपूर्वरूपपरमागमसंज्ञं तच्च मूर्तामूर्तोभय -परिच्छित्तिविषये व्याप्तिज्ञानरूपेण परोक्षमपि केवलज्ञानसदृशमित्यभिप्रायः। तथा चोक्तं —

सुदकेवलं च णाणं दोण्णिवि सरिसाणि होंति बोहादो।
सुदणाणं च परोक्खं पच्चक्खं केवलं णाणं॥

एवं प्रकारांतरेण मूर्तामूर्तस्वरूपकथनगाथा गता॥ १०६॥

अथ व्यवहारकालस्य निश्चयकालस्य च स्वरूपं व्यवस्थापयति —

कालो परिणामभवो परिणामो दव्वकालसंभूदो। (१००)
दोण्हं एस सहावो कालो खणभंगुरो णियदो॥ १०७॥

अतीन्द्रिय ज्ञान-सुखादि गुणों का आधार जो आत्मद्रव्य, तत्प्रभृति पाँच द्रव्यरूप जो शेष हैं, वे अमूर्त हैं। ***चित्तं उभयं समादियदि*** चित्त दोनों को ग्रहण करता है / जानता है। चित्त वास्तव में मति-श्रुतज्ञान का उपादान कारणभूत और अनियत विषयवाला है; और वह श्रुतज्ञान, स्वसम्वेदन ज्ञानरूप से जब आत्मा को ग्रहण करने/जाननेवाले भाव श्रुतरूप होता है, वह प्रत्यक्ष है; और जो द्वादशाङ्ग, चौदह पूर्वरूप परमागम नामक श्रुतज्ञान है, वह मूर्त-अमूर्त दोनों की जानकारी के विषय में व्याप्तिज्ञान रूप से परोक्ष होने पर भी केवलज्ञान के समान हैं — ऐसा अभिप्राय है। वैसा ही कहा भी है —

'श्रुतज्ञान और केवलज्ञान दोनों ही ज्ञान की अपेक्षा समान हैं; इनमें से श्रुतज्ञान परोक्ष है और केवलज्ञान प्रत्यक्ष है।'॥ १०६॥

इस प्रकार प्रकारान्तर से मूर्त-अमूर्त का स्वरूप कथन करनेवाली गाथा पूर्ण हुई।

अब, व्यवहारकाल और निश्चयकाल का स्वरूप व्यवस्थापित करते हैं —

परिणामभव है काल, काल पदार्थभव परिणाम भी।
है उभय का स्व भाव यह, वह काल नश्वर नित्य भी॥ १०७॥

गाथार्थ - काल, परिणाम से उत्पन्न होता है; परिणाम, द्रव्य-काल से उत्पन्न होता है, यह दोनों का स्वभाव है; काल क्षणभङ्गुर तथा नित्य है।

कालो समयनिमिषघटिकादिवसादिरूपो व्यवहारकालः। स च कथंभूतः ? *परिणामभवो* मंदगतिरूपेणाणोरण्वंतरव्यतिक्रमणं नयनपुटविघटनं जलभाजनहस्तविज्ञानरूपपुरुषचेष्टितं दिनकर -बिंबागमनमित्येवं स्वभावः पुद्गलद्रव्यक्रियापर्यायरूपः परिणामस्तेन व्यज्यमानत्वात्प्रकटीक्रियमाणत्वाद्धे -तोर्व्यवहारेण पुद्गलपरिणामभव इत्युपनीयते, परमार्थेन तु कालाणुद्रव्यरूपनिश्चयकालस्य पर्यायः *परिणामो दव्वकालसंभूदो* अणोरण्वंतरव्यतिक्रमणप्रभृतिपूर्वोक्तपुद्गलपरिणामस्तु शीतकाले पाठक -स्याग्निवत् कुम्भकारचक्रभ्रमणविषयेऽधस्तनशिलावद्बहिरङ्गसहकारिकारणभूतेन कालाणुरूपद्रव्य -कालेनोत्पन्नत्वाद्द्रव्यकालसंभूतः *दोण्हं एससहाओ* द्वयोर्निश्चयव्यवहारकालयोरेषः पूर्वोक्तः स्वभावः। स किं रूपः व्यवहारकालः ? पुद्गलपरिणामेन व्यज्यमानत्वात्परिणामजन्यः। निश्चयकालस्तु परिणाम -जनकः। *कालो खणभंगुरो* समयरूपो व्यवहारकालः क्षणभंगुरः *णियदो* स्वकीयगुणपर्यायाधारत्वेन सर्वदैवाविनश्वरत्वाद्द्रव्यकालो नित्य इति।

अत्र यद्यपि काललब्धिवशेन भेदाभेदरत्नत्रयलक्षणं मोक्षमार्गं प्राप्य जीवो रागादिरहितनित्यानंदै

टीकार्थ - ***कालो*** समय, निमिष, घटिका, दिवस आदि रूप व्यवहारकाल है। और वह कैसा है ? ***परिणामभवो*** मन्दगतिरूप से अणु के द्वारा दूसरे अणु का व्यतिक्रमण / उल्लङ्घन करनेरूप, नयनपुटविघटन / नेत्र पलकों के खुलनेरूप, जलभाजन-हस्तविज्ञानरूप पुरुष की चेष्टामय, सूर्यबिम्ब के आनेरूप – इस प्रकार के स्वभाववाले पुद्गलद्रव्य के क्रिया पर्यायरूप परिणाम हैं, उनसे व्यक्त होने के कारण, प्रगट किये जाने के कारण हेतु होने से व्यवहार की अपेक्षा पुद्गल परिणामभव है – ऐसा कहा जाता है। परमार्थ से कालाणु-द्रव्यरूप निश्चयकाल की पर्याय ***परिणामो दव्वकालसंभूदो*** अणु के द्वारा दूसरे अुण का उल्लङ्घन करना इत्यादि पूर्वोक्त पुद्गल परिणाम, पाठक / पढ़नेवाले को शीतकाल में अग्नि के समान, कुम्भकार द्वारा चक्र घुमाने के विषय में नीचे स्थित शिला के समान बहिरङ्ग सहकारी कारणभूत कालाणुरूप द्रव्यकाल से उत्पन्न होने के कारण द्रव्यकाल-सम्भूत है। ***दोण्हं एस सहाओ*** निश्चय-व्यवहार दोनों ही कालों का यह पूर्वोक्त स्वभाव है। वह व्यवहारकाल किसरूप है ? पुद्गल परिणाम से व्यक्त होने के कारण परिणाम से जन्य / उत्पन्न होने-योग्य है। निश्चयकाल तो परिणाम का जनक / परिणाम को उत्पन्न करनेवाला है। ***कालो खणभंगुरो*** समयरूप व्यवहारकाल क्षणभङ्गुर है; ***णियदो*** अपने गुण-पर्यायों का आधार होने से सर्वदा ही अविनश्वर होने के कारण द्रव्य -काल नित्य है।

यहाँ यद्यपि काललब्धि के वश से भेदाभेदरत्नत्रयलक्षण मोक्षमार्ग को प्राप्तकर जीव, रागादि रहित नित्यानन्द एक स्वभावमय उपादेयभूत पारमार्थिक सुख को साधते हैं; तथापि

-कस्वभावमुपादेयभूतं पारमार्थिकसुखं साधयति तथापि जीवस्तस्योपादानकारणं, न च काल इत्यभिप्रायः। तथा चोक्तं — *आत्मोपादानसिद्धमित्यादिरिति*॥ १०७॥

अथ नित्यक्षणिकत्वेन पुनरपि कालभेदं दर्शयति —

कालो त्ति य ववदेसो सब्भावपरूवगो हवदि णिच्चो।(१०१)
उप्पण्णप्पद्धंसी अवरो दीहंतरट्ठाई॥ १०८॥

कालोत्ति य ववदेसो काल इति व्यपदेशः संज्ञा। स च किं करोति? *सब्भावपरूवगो हवदि* काल इत्यक्षरद्वयेन वाचकभूतेन स्वकीयवाच्यं परमार्थकालसद्भावं निरूपयति। क इव किं निरूपयति? सिंहशब्द इव सिंहस्वरूपं, सर्वज्ञशब्द इव सर्वज्ञस्वरूपमिति। एवं स्वकीयस्वरूपं निरूपयन् कथंभूतो भवति? *णिच्चो* यद्यपि काल इत्यक्षरद्वयरूपेण नित्यो न भवति तथापि कालशब्देन वाच्यं यद्द्रव्यकाल -स्वरूपं तेन नित्यो भवतीति निश्चयकालो ज्ञातव्यः, *अवरो* अपरो व्यवहारकालः। स च किंरूपः?

उनका उपादान कारण जीव है; काल नहीं – ऐसा अभिप्राय है। वैसा ही कहा भी है – 'आत्मारूप उपादान से सिद्ध दशा प्रगट होती है।'॥ १०७॥

अब, नित्य और क्षणिक होने के कारण फिर से काल के भेद दिखाते हैं —

है 'काल' ऐसा नाम सत्ताप्ररूपक है नित्य जो।
उत्पन्नध्वंसी अन्य दीर्घस्थायि कहते उसी को॥ १०८॥

गाथार्थ - *'काल'* ऐसा नाम सद्भाव का प्ररूपक है; अतः नित्य है। दूसरा काल उत्पन्न -ध्वंसी है; तथापि (परम्परा-अपेक्षा) दीर्घान्तरस्थायी / दीर्घकाल तक रहनेवाला भी कहा जाता है।

टीकार्थ - ***कालोत्ति य ववदेसो*** 'काल' ऐसा व्यपदेश, संज्ञा, नाम। वह नाम क्या करता है? ***सब्भावपरूवगो हवदि*** 'काल' ऐसे वाचकभूत दो अक्षरों द्वारा अपने वाच्यभूत परमार्थकाल के सद्भाव का निरूपण करता है। किसके समान क्या निरूपित है? 'सिंह' शब्द से 'सिंह-स्वरूप' के निरूपण-समान; 'सर्वज्ञ' शब्द से 'सर्वज्ञ-स्वरूप' के निरूपण-समान; 'काल' शब्द से काल की सत्ता निरूपित है। इस प्रकार अपने स्वरूप का निरूपण करता हुआ वह कैसा है? ***णिच्चो*** यद्यपि 'काल' – ये दो अक्षर, अक्षररूप से नित्य नहीं है; तथापि काल शब्द से वाच्य जो द्रव्यकाल का स्वरूप है, उससे वह नित्य है – ऐसा निश्चयकाल जानना चाहिए। ***अवरो*** अपर / दूसरा व्यवहारकाल है। वह किस रूपवाला है? ***उप्पण्णप्पद्धंसी***

उप्पण्णप्पद्धंसी यद्यपि वर्तमानसमयापेक्षयोत्पन्नप्रध्वंसी भवति, तथापि पूर्वापरसमयसंतानापेक्षया व्यवहारनयेन *दीहंतरट्ठाई* आवलिकापल्योपमसागरोपमादिरूपेण दीर्घांतरस्थायी च घटते, नास्ति दोषः। एवं नित्यक्षणिकरूपेण निश्चयव्यवहारकालो ज्ञातव्यः।

अथवा प्रकारांतरेण निश्चयव्यवहारकालस्वरूपं कथ्यते। तथाहि — अनाद्यनिधनः समयादि-कल्पनाभेदरहितः कालाणुद्रव्यरूपेण व्यवस्थितो वर्णादिमूर्तिरहितो निश्चयकालः, तस्यैव पर्यायभूतः सादिसनिधनः समयनिमिषघटिकादिविवक्षितकल्पनाभेदरूपो व्यवहारकालो भवतीति॥ १०८॥

एवं निर्विकारनिजानंदसुस्थितचिच्चमत्कारमात्रभावनारतानां भव्यानां बहिरंगकाललब्धिभूतस्य निश्चयव्यवहारकालस्य निरूपणमुख्यत्वेन चतुर्थस्थले गाथाद्वयं गतम्।

अथ कालस्य द्रव्यसंज्ञाविधानं कायत्वनिषेधं च प्रतिपादयति —

एदे कालागासा धम्माधम्मा य पोग्गला जीवा। (१०२)
लब्भंति दव्वसण्णं कालस्स दु णत्थि कायत्तं॥ १०९॥

यद्यपि वर्तमान समय की अपेक्षा उत्पन्न-प्रध्वंसी है; तथापि पूर्वापर समयों की सन्तान / परम्परा अपेक्षा व्यवहारनय से ***दीहंतरट्ठाई*** आवलिका, पल्योपम, सागरोपम आदिरूप से दीर्घान्तर स्थायीत्व घटित होता है — इसमें दोष नहीं है। इस प्रकार नित्य-क्षणिकरूप से निश्चय -व्यवहारकाल जानना चाहिए।

अथवा प्रकारान्तर से निश्चय-व्यवहारकाल का स्वरूप कहते हैं। वह इस प्रकार — अनाद्यनिधन, समय आदि कल्पना भेद से रहित, कालाणुद्रव्यरूप से व्यवस्थित, वर्णादि मूर्तिरहित निश्चयकाल है; उसकी ही पर्यायभूत, सादिसनिधन, समय-निमिष-घड़ी आदि विवक्षित कल्पना भेदरूप व्यवहारकाल है॥ १०८॥

इस प्रकार निर्विकार निजानन्द सुस्थित चित् चमत्कारमात्र की भावना में रत भव्यों की बहिरङ्गकाललब्धिभूत निश्चय-व्यवहारकाल के निरूपण की मुख्यता से चतुर्थ स्थल में दो गाथाएँ पूर्ण हुईं।

अब, काल के द्रव्य-संज्ञा विधान का और कायत्व के निषेध का प्रतिपादन करते हैं —

ये जीव पुद्गल काल धर्म अधर्म व आकाश भी।
सब 'द्रव्य' संज्ञा प्राप्त पर न काल के कायत्व ही॥ १०९॥

गाथार्थ - ये काल, आकाश, धर्म और अधर्म, पुद्गल, जीव 'द्रव्य' संज्ञा को प्राप्त करते हैं; परन्तु काल के कायत्व नहीं है।

एदे एते प्रत्यक्षीभूताः *कालागासा धम्माधम्मा य पोग्गला जीवा* कालाकाशधर्माधर्मपुद्गलजीवाः कर्तारः *लब्भंति* लभंते। कां ? *दव्वसण्णं* द्रव्यसंज्ञां। कस्मादिति चेत् ? सत्तालक्षणमुत्पादव्ययध्रौव्य -लक्षणं गुणपर्यायलक्षणं चेति द्रव्यपीठिकाकथितक्रमेण द्रव्यलक्षणत्रययोगात् *कालस्स य णत्थि कायत्तं* कालस्य च नास्ति कायत्वम्। तदपि कस्मात् ? विशुद्धदर्शनज्ञानस्वभावशुद्धजीवास्तिकायप्रभृति -पञ्चास्तिकायानां बहुप्रदेशप्रचयत्वलक्षणं कायत्वं यथा विद्यते न तथा कालाणूनां —

लोगागासपदेसे एक्केक्के जे ठिया हु एक्केक्का।
रयणाणं रासीमिव ते कालाणू असंखदव्वाणि॥

इति गाथाकथितक्रमेण लोकाकाशप्रमितासंख्येयद्रव्याणामपीति।

अत्र केवलज्ञानादिशुद्धगुणसिद्धत्वागुरुलघुत्वादिशुद्धपर्यायसहितशुद्धजीवद्रव्यादन्यद्रव्याणि हेयानीति भावः॥ १०९॥

अथ कालस्य द्रव्यास्तिकायसंज्ञाविधिनिषेधव्याख्यानेन पञ्चमस्थले गाथासूत्रं गतम्।

टीकार्थ - ***एदे*** ये प्रत्यक्षीभूत ***कालागासा धम्माधम्मा य पोग्गला जीवा*** काल, आकाश, धर्म, अधर्म, पुद्गल, जीवरूप कर्ता, ***लब्भंति*** प्राप्त करते हैं। वे किसे प्राप्त करते हैं ? ***दव्वसण्णं*** वे द्रव्यसंज्ञा को प्राप्त करते हैं। वे इसे कैसे प्राप्त करते हैं ? सत्तालक्षण, उत्पाद -व्यय-ध्रौव्य लक्षण और गुण-पर्याय लक्षण — इस प्रकार द्रव्यपीठिका में कहे गए क्रम से द्रव्य के तीनों लक्षणों का योग होने से, वे 'द्रव्य' संज्ञा को प्राप्त करते हैं। ***कालस्स य णत्थि कायत्तं*** तथा काल के कायत्व नहीं है। उसके कायत्व कैसे नहीं है ? विशुद्ध दर्शन-ज्ञानस्वभावी शुद्ध जीवास्तिकाय आदि पाँच अस्तिकायों के बहुप्रदेश-प्रचयत्वलक्षण कायत्व जैसे विद्यमान है, उस प्रकार कालाणुओं के नहीं है —

'रत्नों की राशि के समान असंख्य द्रव्य कालाणु लोकाकाश के एक-एक प्रदेश पर एक -एक स्थित हैं।'

इस गाथा में कहे गए क्रम से लोकाकाश प्रमाण असंख्येय द्रव्य होने पर भी उनके कायत्व नहीं है।

यहाँ केवल ज्ञानादि शुद्ध गुण, सिद्धत्व-अगुरुलघुत्व आदि शुद्ध पर्यायसहित शुद्ध जीवद्रव्य से अन्य हेय हैं — ऐसा भाव है॥ १०९॥

इस प्रकार काल के द्रव्यास्तिकाय संज्ञा की विधि-निषेध के व्याख्यान से पाँचवें स्थल में गाथासूत्र पूर्ण हुआ।

अथ पञ्चास्तिकायाध्ययनस्य मुख्यवृत्त्या तदंतर्गतशुद्धजीवास्तिकायपरिज्ञानस्य वा फलं दर्शयति —

एवं पवयणसारं पंचत्थियसंगहं वियाणित्ता। (१०३)
जो मुयदि रागदोसे सो गाहदि दुक्खपरिमोक्खं॥ ११०॥

एवं पूर्वोक्तप्रकारेण *वियाणित्ता* विज्ञाय पूर्वम्। कं ? *पंचत्थियसंगहं* पञ्चास्तिकायसंग्रहनाम -संज्ञं ग्रंथम्। किंविशिष्टं ? *पवयणसारं* प्रवचनसारं पञ्चास्तिकायषड्द्रव्याणां संक्षेपप्रतिपादकत्वात् मुख्यवृत्त्या परमसमाधिरतानां मोक्षमार्गत्वेन सारभूतस्य शुद्धजीवास्तिकायस्य प्रतिपादकत्वाद्वा द्वादशांगरूपेण विस्तीर्णस्यापि प्रवचनस्य सारभूतं एवं विज्ञाय। किं करोति ? *जो मुयदि* यः कर्ता मुंचति। कौ कर्मतापन्नौ ? *रायदोसे* अनंतज्ञानादिगुणसहितवीतरागपरमात्मनो विलक्षणौ हर्षविषादलक्षणौ भाविरागादिदोषोत्पादककर्मास्रवजनकौ च रागद्वेषौ द्वौ *सो* सः पूर्वोक्तः ध्याता *गाहदि* गाहते प्राप्नोति। कं ? *दुक्खपरिमोक्खं* निर्विकारात्मोपलब्धिभावनोत्पन्नपरमाह्लादैकलक्षणसुखामृतविपरीतस्य

अब, पञ्चास्तिकाय के अध्ययन का अथवा मुख्यवृत्ति से उसके अन्तर्गत शुद्ध जीवास्तिकाय के परिज्ञान का फल दिखाते हैं —

इस रीति प्रवचनसारमय पंचास्तिसंग्रह जान जो।
तजता है राग-द्वेष को, वह सकलदुख-परिमुक्त हो॥ ११०॥

गाथार्थ - इस प्रकार प्रवचन के सारभूत ***'पञ्चास्तिकाय संग्रह'*** को विशेषरूप से जानकर जो राग-द्वेष को छोड़ता है, वह दुःखों से परिमुक्त होता है।

टीकार्थ - ***एवं*** पूर्वोक्त प्रकार से, ***वियाणित्ता*** पहले विशेषरूप से जानकर। किसे जानकर ? ***पंचत्थियसंगहं*** पञ्चास्तिकायसंग्रह नामक ग्रन्थ को जानकर। किस विशेषतावाले ग्रन्थ को जानकर ? ***पवयणसारं*** प्रवचन के सारभूत, पञ्चास्तिकाय-षड्द्रव्य का संक्षेप से प्रतिपादक होने के कारण अथवा मुख्यरूप से परमसमाधिरतों को मोक्षमार्गरूप से सारभूत शुद्ध जीवास्तिकाय का प्रतिपादक होने से, द्वादशाङ्गरूप से विस्तृत होने पर भी प्रवचन के सारभूत इस ग्रन्थ को जानकर। इसे जानकर क्या करता है ? ***जो मुयदि*** कर्तारूप जो छोड़ता है। कर्मता को प्राप्त किन्हें छोड़ता है ? ***रायदोसे*** अनन्त ज्ञानादि गुणसहित वीतराग परमात्मा से विलक्षण, हर्ष -विषाद लक्षणवाले और आगामी रागादि दोषों को उत्पन्न करनेवाले कर्मास्रव के जनक राग -द्वेषों को छोड़ता है; ***सो*** वह पूर्वोक्त ध्याता ***गाहदि*** प्राप्त होता है। वह किसे प्राप्त होता है ? ***दुक्खपरिमोक्खं*** निर्विकार आत्मोपलब्धिरूप भावना से उत्पन्न परम आह्लाद एक लक्षण

नानाप्रकारशारीरमानसरूपस्य चतुर्गतिदुःखस्य परिमोक्षं मोचनं विनाशमित्यभिप्रायः ॥ ११० ॥

अथ दुःखमोक्षकारणस्य क्रमं कथयति —

मुणिदूण एदमत्थं तमणुग्गमणुज्जुदो णिहदमोहो। (१०४)
पसमियरागद्दोसो हवदि हदपरावरो जीवो॥ १११ ॥

मुणिदूण मत्त्वा विशिष्टस्वसंवेदनज्ञानेन ज्ञात्वा तावत्। कं ? *एदं* इमं प्रत्यक्षीभूतं नित्यानंदैक-शुद्धजीवास्तिकायलक्षणं *अत्थं* अर्थं विशिष्टपदार्थं *तमणु* तं शुद्धजीवास्तिकायलक्षणमर्थं अनुलक्षणीकृत्य समाश्रित्य *गमणुज्जुदो* गमनोद्यतः तन्मयत्वेन परिणमनोद्यतः *णिहदमोहो* शुद्धात्मै-वोपादेय इति रुचिरूपनिश्चयसम्यक्त्वप्रतिबंधकदर्शनमोहाभावात्तदनंतरं निहतमोहो नष्टदर्शनमोहः *पसमियरागद्दोसो* निश्चलात्मपरिणतिरूपनिश्चयचारित्रप्रतिकूलचारित्रमोहोदयाभावात्तदनंतरं प्रशमित-रागद्वेषः एवं पूर्वोक्तप्रकारेण स्वपरयोर्भेदज्ञाने सति शुद्धात्मरुचिरूपे सम्यक्त्वे तथैव शुद्धात्मस्थितिरूपे

सुखामृत से विपरीत, नाना प्रकार के शारीरिक-मानसिकरूप चतुर्गति-दुःख के परिमोक्ष को, विनाश को प्राप्त होता है — ऐसा अभिप्राय है॥ ११० ॥

अब, दुःख से मोक्ष के कारण का क्रम कहते हैं —

यह अर्थ समझ के अनुगमन उद्यमी नाशे मोह को।
प्रशमित करे राग द्वेष आतम परापर से रहित हो॥ १११ ॥

गाथार्थ - इसके अर्थ को जानकर, उसके अनुगमन को उद्यत / अनुसरण करने के लिए प्रयत्नशील, मोह से रहित हो, राग-द्वेष को प्रशमित कर जीव पूर्वापर बन्ध से रहित होता है।

टीकार्थ - ***मुणिदूण*** मानकर, सर्व प्रथम विशिष्ट स्वसम्वेदन ज्ञान द्वारा जानकर। किसे जानकर ? ***एदं*** इस प्रत्यक्षीभूत नित्य आनन्दमय एक शुद्ध जीवास्तिकाय लक्षणवाले ***अत्थं*** अर्थ को, विशिष्ट पदार्थ को जानकर; ***तमणु*** उस शुद्धजीवास्तिकाय लक्षण अर्थ का अनुलक्षणी कर, समाश्रय कर; ***गमणुज्जुदो*** गमन के लिए उद्यत है, तन्मयता होने से परिणमन के लिए उद्यत है; ***णिहदमोहो*** शुद्धात्मा ही उपादेय है — ऐसी रुचिरूप निश्चय सम्यक्त्व के प्रतिबन्धक दर्शन मोह का अभाव हो जाने से, तदनन्तर निहतमोह, नष्ट-दर्शनमोहवाला है; ***पसमियरागद्दोसो*** निश्चल आत्मपरिणतिरूप निश्चयचारित्र से प्रतिकूल चारित्रमोह के उदय का अभाव होने से, तत्पश्चात् प्रशमित-राग-द्वेष है; इस प्रकार पूर्वोक्त प्रकार से स्व-पर का भेदज्ञान होने पर शुद्धात्मरुचिरूप सम्यक्त्व और उसी प्रकार शुद्धात्मा में स्थितिरूप चारित्र होने पर, पश्चात्

चारित्रे च सति पश्चात् *हवदि* भवति। कथंभूतः ? *हदपरावरो* हतपरापरः। अत्र परमानंदज्ञानादिगुणा -धारत्वात्परशब्देन मोक्षो भण्यते परशब्दवाच्यान्मोक्षादपरो भिन्नः परापरः संसार इति हेतोः विनाशितः परापरो येन स भवति हतपरापरो नष्टसंसारः। स कः ? *जीवो* भव्यजीवः॥ १११॥

इति पञ्चास्तिकायपरिज्ञानफलप्रतिपादनरूपेण षष्ठमस्थले गाथाद्वयं गतम्।

एवं प्रथममहाधिकारमध्ये गाथाष्टकेन षट्भिः स्थलैश्चूलिकासंज्ञोऽष्टमोऽन्तराधिकारो ज्ञातव्यः।

अत्र पञ्चास्तिकायप्राभृतग्रंथे पूर्वोक्तक्रमेण सप्तगाथाभिः समयशब्दपीठिका, चतुर्दशगाथाभि -र्द्रव्यपीठिका, पञ्चगाथाभिर्निश्चयव्यवहारकालमुख्यता, त्रिपञ्चाशद्गाथाभिर्जीवास्तिकायव्याख्यानं, दशगाथाभिः पुद्गलास्तिकायव्याख्यानं, सप्तगाथाभिर्धर्माधर्मास्तिकायद्वयविवरणं, सप्तगाथाभिराका-शास्तिकायव्याख्यानं, अष्टगाथाभिश्चूलिकामुख्यत्वमित्येकादशोत्तरशतगाथाभिरष्टांतराधिकारा गताः।

इति *श्रीमद्जयसेनाचार्यकृतायां तात्पर्यवृत्तौ पञ्चास्तिकायषड्द्रव्यप्रतिपादनं* नाम *प्रथमो महाधिकारः* समाप्तः॥ १॥

हवदि होता है। कैसा होता है ? ***हदपरावरो*** हतपरापर होता है। यहाँ परमानन्द ज्ञानादि गुणों का आधार होने से ***'परं'*** शब्द द्वारा मोक्ष कहा जाता है, पर शब्द के वाच्यभूत मोक्ष से अपर भिन्न / परापर / संसार; इस प्रकार जिसके द्वारा संसार नष्ट किया गया है, वह हतपरापर, नष्ट-संसारी होता है। वह कौन है ? ***जीवो*** वह भव्यजीव है॥ १११॥

इस प्रकार पञ्चास्तिकाय-परिज्ञान के फल-प्रतिपादनरूप से छठवें स्थल में दो गाथाएँ पूर्ण हुईं।

इस प्रकार ***प्रथम महाधिकार*** में आठ गाथा द्वारा छह स्थलों से ***चूलिका*** नामक ***आठवाँ अन्तराधिकार*** जानना चाहिए।

यहाँ 'पञ्चास्तिकाय प्राभृत' ग्रन्थ में पूर्वोक्त क्रम से सात गाथाओं द्वारा ***समय-शब्द -पीठिका,*** चौदह गाथाओं द्वारा ***द्रव्यपीठिका,*** पाँच गाथाओं द्वारा ***निश्चय-व्यवहारकाल की मुख्यता,*** त्रेपन गाथाओं द्वारा ***जीवास्तिकाय का व्याख्यान,*** दश गाथाओं द्वारा ***पुद्गलास्तिकाय का व्याख्यान,*** सात गाथाओं द्वारा ***धर्माधर्मास्तिकाय – दोनों का विवरण,*** सात गाथाओं द्वारा ***आकाशास्तिकाय का व्याख्यान,*** आठ गाथाओं द्वारा ***चूलिका की मुख्यता*** – इस प्रकार एक सौ ग्यारह गाथाओं द्वारा आठ अन्तराधिकार पूर्ण हुए।

इस प्रकार ***'श्रीमद्जयसेनाचार्य'*** कृत ***'तात्पर्यवृत्ति'*** में ***'पञ्चास्तिकाय षड्द्रव्य प्रतिपादन'*** नामक ***'प्रथम महाधिकार'*** पूर्ण हुआ॥ १॥

जीवादि नवपदार्थ प्रतिपादक द्वितीय महाधिकार

इत ऊर्ध्वं *अभिवंदिऊण सिरसा....* इति इमां गाथामादिं कृत्वा पाठक्रमेण पञ्चाशद्गाथापर्यंतं टीकाभिप्रायेणाष्टाधिकचत्वारिंशद्गाथापर्यंतं वा *जीवादिनवपदार्थप्रतिपादको द्वितीयो महाधिकारः* प्रारभ्यते। तत्र तु दशांतराधिकारा भवन्ति। तेषु दशाधिकारेषु मध्ये प्रथमतस्तावन्नमस्कारगाथामादिं कृत्वा पाठक्रमेण गाथाचतुष्टयपर्यंतं व्यवहारमोक्षमार्गमुख्यत्वेन व्याख्यानं करोतीति प्रथमांतराधिकारे समुदपायपातनिका। तथाहि —

अन्तिमतीर्थकरपरमदेवं नत्वा पञ्चास्तिकायषड्द्रव्यसंबन्धिनं नवपदार्थभेदं मोक्षमार्गं च वक्ष्यामीति प्रतिज्ञापुरःसरं नमस्कारं करोति —

इससे आगे ***अभिवंदिऊण सिरसा....*** इत्यादि गाथा से प्रारम्भकर पचास गाथा पर्यन्त अथवा टीका (समय-व्याख्या) के अभिप्राय से अड़तालीस गाथा पर्यन्त ***जीवादि नव पदार्थ प्रतिपादक द्वितीय महाधिकार*** प्रारम्भ होता है। वहाँ दश अन्तराधिकार हैं।

उन दश अधिकारों में से सर्व प्रथम नमस्कार गाथा से प्रारम्भकर पाठक्रम से चार गाथा पर्यन्त व्यवहार मोक्षमार्ग की मुख्यता से व्याख्यान करते हैं। इस प्रकार प्रथम अन्तराधिकार में समुदाय पातनिका है। वह इस प्रकार —

जीवादि नव पदार्थ प्रतिपादक द्वितीय महाधिकार - ११२ से १६१ गाथा पर्यन्त

अन्तराधिकारक्रम	प्रतिपादित विषय	कहाँ से कहाँ पर्यन्त	कुल गाथाएँ
१	व्यवहार मोक्षमार्ग	११२ से ११५	४
२	जीवाधिकार	११६ से १३१	१६
३	अजीवाधिकार	१३२ से १३५	४
४	जीव-अजीव संयोग से नौ पदार्थ	१३६ से १३८	३
५	पुण्यपापाधिकार	१३९ से १४२	४
६	शुभाशुभास्रवाधिकार	१४३ से १४८	६
७	संवराधिकार	१४९ से १५१	३
८	निर्जराधिकार	१५२ से १५४	३
९	बन्धाधिकार	१५५ से १५७	३
१०	मोक्षाधिकार	१५८ से १६१	४

अभिवंदिऊण सिरसा अपुणब्भवकारणं महावीरं। (१०५)
तेसिं पयत्थभंगं मग्गं मोक्खस्स वोच्छामि॥ ११२॥

अभिवंदिऊण सिरसा अपुणब्भवकारणं महावीरं अभिवंद्य प्रणम्य। केन? शिरसा। कं? अपुनर्भवकारणं महावीरम्। ततः किं करोमि? *वोच्छामि* वक्ष्यामि। कं? *तेसिं पयत्थभंगं* तेषां पञ्चास्तिकायषड्द्रव्याणां नवपदार्थभेदम्। न केवलं नवपदार्थभेदम्। *मग्गं मोक्खस्स* मार्गं मोक्षस्येति।

तद्यथा — मोक्षसुखसुधारसपानपिपासितानां भव्यानां पारम्पर्येणानंतज्ञानादिगुणफलस्य मोक्ष -कारणं महावीराभिधानमन्तिमजिनेश्वरं रत्नत्रयात्मकस्य प्रवर्तमानमहाधर्मतीर्थस्य प्रतिपादकत्वात्प्रथमत एव प्रमाणमिति गाथापूर्वार्धेन मंगलार्थमिष्टदेवतानमस्कारं करोति ग्रंथकारः, तदनंतरमुत्तरार्धेन च शुद्धात्मरुचिप्रतीतिनिश्चलानुभूतिरूपस्याभेदरत्नत्रयात्मकस्य निश्चयमोक्षमार्गस्य परंपरया कारणभूतं

अन्तिम तीर्थङ्कर परमदेव को नमस्कार कर पञ्चास्तिकाय-षड्द्रव्य सम्बन्धी नव पदार्थ के भेद और मोक्षमार्ग कहता हूँ; इस प्रकार प्रतिज्ञापूर्वक नमस्कार करते हैं —

अपुनर्जनम के हेतु शिरसा नमन श्रीमहावीर को।
कर कहूँगा उनके पदारथ भङ्ग, मुक्तिमार्ग को॥ ११२॥

गाथार्थ - अपुनर्भव (मोक्ष) के कारणभूत महावीर भगवान को शिर झुकाकर नमस्कार करके, उनके (छह द्रव्यों के) पदार्थ भङ्ग को और मोक्ष के मार्ग को कहूँगा।

टीकार्थ - ***अभिवंदिऊण*** अभिवंद्य, प्रणाम कर / नमस्कार कर। कैसे नमस्कार कर? ***सिरसा*** शिर से / शिर झुकाकर नमस्कार कर। किन्हें नमस्कार कर? ***अपुणब्भवकारणं महावीरं*** अपुनर्भव / मोक्ष के कारणभूत महावीर को नमस्कार कर। उन्हें नमस्कार करने के बाद क्या करता हूँ? ***वोच्छामि*** उन्हें नमस्कार करने के बाद कहूँगा। किसे कहेंगे? ***तेसिं पयत्थभंगं*** उन पञ्चास्तिकाय, षट्-द्रव्यों के नव पदार्थ भेद को कहूँगा। न केवल नव पदार्थ को कहूँगा, अपितु **मग्गं मोक्खस्स** मोक्ष के मार्ग को भी कहूँगा।

वह इस प्रकार — मोक्ष-सुखरूपी सुधारस-पान के पिपासित भव्यों को परम्परा से अनन्त ज्ञानादि गुण फलरूप रत्नत्रयात्मक प्रवर्तमान महा धर्मतीर्थ के प्रतिपादक होने से मोक्ष के कारणभूत 'महावीर' नामक अन्तिम जिनेश्वर को सर्व प्रथम नमस्कार करता हूँ। - इस प्रकार गाथा-पूर्वार्ध द्वारा ग्रन्थकार मङ्गल के लिए इष्ट देवता को नमस्कार करते हैं। तत्पश्चात् उत्तरार्ध द्वारा शुद्धात्मरुचि, प्रतीति, निश्चल अनुभूतिरूप अभेदरत्नत्रयात्मक निश्चयमोक्षमार्ग के परम्परा

व्यवहारमोक्षमार्गं तस्यैव व्यवहारमोक्षमार्गस्यावयवभूतयोर्दर्शनज्ञानयोर्विषयभूतान्नवपदार्थान् प्रतिपादया -मीति प्रतिज्ञां च करोति।

अत्र यद्यप्यग्रे चूलिकायां मोक्षमार्गस्य विशेषव्याख्यानमस्ति तथापि नवपदार्थानां संक्षेपसूचनार्थ -मत्रापि भणितम्। कथं संक्षेपसूचनमितिचेत्? नवपदार्थव्याख्यानं तावदत्र प्रस्तुतम्। ते च कथंभूताः? व्यवहारमोक्षमार्गे विषयभूता इत्यभिप्रायः॥ ११२॥

अथ प्रथमतस्तावन्मोक्षमार्गस्य संक्षेपसूचनां करोति —

सम्मत्तणाणजुत्तं चारित्तं रागदोसपरिहीणं। (१०६)
मोक्खस्स हवदि मग्गो भव्वाणं लद्धबुद्धीणं॥ ११३॥

सम्मत्तणाणजुत्तं सम्यक्त्वज्ञानयुक्तमेव न च सम्यक्त्वज्ञानरहितं *चारित्तं* चारित्रमेव न चाचारित्रं *रागदोसपरिहीणं* रागद्वेषपरिहीनमेव न च रागद्वेषसहितं *मोक्खस्स हवदि* स्वात्मोपलब्धिरूपस्य मोक्षस्यैव

कारणभूत व्यवहारमोक्षमार्ग को और उस ही व्यवहारमोक्षमार्ग के अवयवभूत दर्शन और ज्ञान के विषयभूत होने से नव पदार्थ को प्रतिपादित करता हूँ – इस प्रकार प्रतिज्ञा करते हैं।

यद्यपि आगे चूलिका में मोक्षमार्ग का विशेष व्याख्यान है; तथापि नौ पदार्थों की संक्षिप्त सूचना-हेतु यहाँ भी उन्हें कहा गया है। उनकी संक्षेप में सूचना कैसे है? यदि ऐसा प्रश्न हो तो कहते हैं – यहाँ सर्व प्रथम नव पदार्थों का व्याख्यान प्रस्तुत है (इससे स्पष्ट है कि उनकी यहाँ संक्षेप में सूचना है)। वे पदार्थ कैसे हैं? वे व्यवहारमोक्षमार्ग में विषयभूत हैं – ऐसा अभिप्राय है॥ ११२॥

अब, सर्व प्रथम मोक्षमार्ग की संक्षेप में सूचना करते हैं —

चारित्र राग रु द्वेष से परिहीन समकित ज्ञानयुत।
है लब्धबुद्धी भव्य का निर्वाण पथ जिनवर कथित॥ ११३॥

गाथार्थ - सम्यग्दर्शन-ज्ञान से सहित, राग-द्वेष से परिहीन चारित्र लब्धबुद्धि भव्यों के मोक्ष का मार्ग है।

टीकार्थ - ***सम्मत्तणाणजुत्तं*** सम्यक्त्व / सम्यग्दर्शन, सम्यग्ज्ञान से युक्त ही; सम्यक्त्व -ज्ञान से रहित नहीं। ***चारित्तं*** चारित्र ही; अचारित्र नहीं। ***रागद्वेषपरिहीणं*** राग-द्वेष से परिहीन ही; राग-द्वेष से सहित नहीं। ***मोक्खस्स हवदि*** स्वात्मोपलब्धिरूप मोक्ष का ही है; शुद्धात्मानुभूति के प्रच्छादक बन्ध का नहीं है। ***मग्गो*** अनन्त ज्ञानादि गुणरूप अनमोल रत्नों से परिपूर्ण मोक्षनगर

भवति न च शुद्धात्मानुभूतिप्रच्छादकबंधस्य *मग्गो* अनंतज्ञानादिगुणामौल्यरत्नपूर्णस्य मोक्षनगरस्य मार्ग एव नैवामार्गः *भव्वाणं* शुद्धात्मस्वभावरूपव्यक्तियोग्यतासहितानां भव्यानामेव न च शुद्धात्मरूप -व्यक्तियोग्यतारहितानामभव्यानां *लद्धबुद्धीणं* लब्धनिर्विकारस्वसंवेदनज्ञानरूपबुद्धीनामेव न च मिथ्यात्वरागादिपरिणतिरूपविषयानंदस्वसंवेदनकुबुद्धिसहितानां, क्षीणकषायशुद्धात्मोपलंभे सत्येव भवति न च सकषायाशुद्धात्मोपलंभे भवतीत्यन्वयव्यतिरेकाभ्यामष्टविधनियमोऽत्र द्रष्टव्यः। अन्वय -व्यतिरेकस्वरूपं कथ्यते —

तथाहि — सति संभवोऽन्वयलक्षणं असत्यसंभवो व्यतिरेकलक्षणं; तत्रोदाहरणं निश्चय -व्यवहारमोक्षकारणे सति मोक्षकार्यं संभवतीति विधिरूपोऽन्वय उच्यते, तत्कारणाभावे मोक्षकार्यं न संभवतीति निषेधरूपो व्यतिरेक इति। तदेव द्रढयति — यस्मिन्नग्न्यादिकारणे सति यद्धूमादिकार्यं भवति तदभावे न भवतीति तद्धूमादिकं तस्य कार्यमितरदग्न्यादिकं कारणमिति कार्यकारणनियम इत्यभिप्रायः॥ ११३॥

का मार्ग ही है; अमार्ग नहीं है। ***भव्वाणं*** शुद्धात्मस्वभावरूप व्यक्ति (प्रगटता) की योग्यतासहित भव्यों का ही है; शुद्धात्मरूप व्यक्ति योग्यता से रहित अभव्यों का नहीं। ***लद्धबुद्धीणं*** निर्विकार स्वसम्वेदन ज्ञानरूप बुद्धि को प्राप्त भव्यों का ही; मिथ्यात्व-रागादि परिणतिरूप विषयानन्दमय स्वसम्वेदनरूप कुबुद्धियों से सहित का नहीं है; क्षीणकषाय दशा में शुद्धात्मा की उपलब्धि होने पर ही होता है, कषायसहित दशा में अशुद्धात्मा की उपलब्धि रहने पर नहीं होता है – इस प्रकार यहाँ अन्वय-व्यतिरेक द्वारा आठ प्रकार का नियम दिखाया गया है।

अन्वय-व्यतिरेक का स्वरूप कहते हैं। वह इस प्रकार – होने पर होना, अन्वय का लक्षण है; नहीं होने पर नहीं होना, व्यतिरेक का लक्षण है। वहाँ उदाहरण देते हैं – निश्चय -व्यवहाररूप मोक्ष का कारण होने पर मोक्षरूप कार्य होता है – ऐसा विधिरूप अन्वय कहलाता है; उस कारण का अभाव होने पर मोक्षरूप कार्य सम्भव नहीं है – ऐसा निषेधरूप व्यतिरेक है।

उसे ही दृढ़ करते हैं – जिस अग्नि आदि कारण के होने पर जो धूम आदि कार्य होता है तथा उसके अभाव में नहीं होता है – इस प्रकार धूम आदि उसका कार्य है, उससे भिन्न अग्नि आदि कारण है। – इस प्रकार कार्य-कारण नियम है – ऐसा अभिप्राय है॥ ११३॥

अब, व्यवहार सम्यग्दर्शन को कहते हैं —

यों रुचिपूर्वक जिन प्रणीत पदार्थ के श्रद्धान युत।
उस पुरुष के ही ज्ञान में है, शब्द दर्शन भी उचित॥ ११४॥

अथ व्यवहारसम्यग्दर्शनं कथ्यते —

एवं जिणपण्णत्ते सद्दहमाणस्स भावदो भावे ॥ 卐 ॥
पुरिसस्साभिणिबोधे दंसणसद्दो हवदि जुत्ते ॥ ११४ ॥

एवं पूर्वोक्तप्रकारेण *जिणपण्णत्ते* जिनप्रज्ञप्तान् वीतरागसर्वज्ञप्रणीतान् *सद्दहमाणस्स* श्रद्दधतः *भावदो* रुचिरूपपरिणामतः। कान् कर्मतापन्नान्? *भावे* त्रिलोकत्रिकालविषयसमस्तपदार्थगतसामान्य-विशेषस्वरूपपरिच्छित्तिसमर्थकेवलदर्शनज्ञानलक्षणात्मद्रव्यप्रभृतीन् समस्तभावान् पदार्थान्। कस्य? *पुरिसस्स* पुरुषस्य भव्यजीवस्य। कस्मिन् सति? *आभिणिबोधे* आभिनिबोधे मतिज्ञाने सति मतिपूर्वक-श्रुतज्ञाने वा *दंसणसद्दे* दार्शनिकोऽयं पुरुष इति शब्दः *हवदि* भवति। कथंभूतो भवति? *जुत्ते* युक्त उचित इति।

अत्र सूत्रे यद्यपि क्वापि निर्विकल्पसमाधिकाले निर्विकारशुद्धात्मरुचिरूपं निश्चयसम्यक्त्वं स्पृशति तथापि प्रचुरेण बहिरंगपदार्थरुचिरूपं यद्व्यवहारसम्यक्त्वं तस्यैव तत्र मुख्यता। कस्मात्?

गाथार्थ - इस प्रकार जिनेन्द्र प्रणीत पदार्थों का भाव से / रुचिरूप परिणाम से श्रद्धान करनेवाले पुरुष / आत्मा के ज्ञान में दर्शन शब्द उचित है।

टीकार्थ - ***एवं*** पूर्वोक्त प्रकार से, ***जिणपण्णत्ते*** जिनप्रज्ञप्त, वीतराग-सर्वज्ञ प्रणीत का, ***सद्दहमाणस्स*** श्रद्धान करनेवाले के, ***भावदो*** रुचिरूप परिणाम से। कर्मता को प्राप्त किनका श्रद्धान करनेवाले के? ***भावे*** तीन लोक, तीन कालवर्ती विषयभूत समस्त पदार्थगत सामान्य-विशेष स्वरूप को जानने में समर्थ केवल दर्शन-ज्ञान लक्षणवाले आत्मद्रव्य आदि समस्त पदार्थों का, भावों का श्रद्धान करनेवाले के। श्रद्धान करनेवाले किसके? ***पुरिसस्स*** भव्य जीवरूप पुरुष के। क्या होने पर किसमें? ***आभिणिबोधे*** मतिज्ञान होने पर अथवा मतिज्ञानपूर्वक श्रुतज्ञान होने पर, ***दंसणसद्दे*** यह पुरुष दार्शनिक/दर्शनयुक्त है – ऐसा शब्द ***हवदि*** होता है। वह कैसा है? ***जुत्ते*** युक्त / उचित है।

यहाँ सूत्र में यद्यपि कभी निर्विकल्प समाधि के समय निर्विकार शुद्धात्म-रुचिरूप निश्चय सम्यक्त्व को स्पर्श कर रहा है / प्राप्त हुआ है; तथापि प्रचुरता से बहिरङ्ग पदार्थ रुचिरूप जो व्यवहार सम्यक्त्व है; उसकी ही वहाँ मुख्यता है। वहाँ उसकी ही मुख्यता कैसे है? 'विवक्षित (जो कहा जा रहा है, वह) मुख्य होता है' – ऐसा वचन होने से वहाँ उसकी ही मुख्यता है। विवक्षित ही मुख्य कैसे है? व्यवहार-मोक्षमार्ग के व्याख्यान का प्रस्ताव / प्रकरण / प्रसङ्ग होने से वह ही मुख्य है – ऐसा भावार्थ है॥ ११४॥

विवक्षितो मुख्य इति वचनात्। तदपि कस्मात्? व्यवहारमोक्षमार्गव्याख्यानप्रस्तावादिति भावार्थः॥ ११४॥

अथ सम्यग्दर्शनज्ञानचारित्रत्रयस्य विशेषविवरणं करोति —

सम्मत्तं सद्दहणं भावाणं तेसिमधिगमो णाणं।(१०७)
चारित्तं समभावो विसयेसु विरूढमग्गाणं॥ ११५॥

सम्मत्तं सम्यक्त्वं भवति। किं कर्तृ? *सद्दहणं* मिथ्यात्वोदयजनितविपरीताभिनिवेशरहितं श्रद्धानम्। केषां संबन्धि। *भावाणं* पञ्चास्तिकायषड्द्रव्यविकल्परूपं जीवाजीवद्वयं जीवपुद्गलसंयोग -परिणामोत्पन्नास्त्रवादिपदार्थसप्तकं चेत्युक्तलक्षणानां भावानां जीवादिनवपदार्थानाम्। इदं तु नवपदार्थ -विषयभूतं व्यवहारसम्यक्त्वम्। किंविशिष्टं? शुद्धजीवास्तिकायरुचिरूपस्य निश्चयसम्यक्त्वस्य छद्मस्थावस्थायां आत्मविषयस्वसंवेदनज्ञानस्य परंपरया बीजं, तदपि स्वसंवेदनज्ञानं केवलज्ञानबीजं भवति। *चारित्तं* चारित्रं भवति। स कः? *समभावो* समभावः। केषु? *विसयेसु* विषयेषु इन्द्रियमनोगत

अब, सम्यग्दर्शन, ज्ञान, चारित्र – तीनों का विशेष विवरण करते हैं —

सम्यक्त्व है श्रद्धान भावों का अधिगम ज्ञान है।
विरूढ़मार्गी का विषय में भाव सम चारित्र है॥ ११५॥

गाथार्थ - भावों का श्रद्धान, सम्यग्दर्शन है; उसका अधिगम, ज्ञान है; विरूढ़-मार्गियों का विषयों में समभाव, चारित्र है।

टीकार्थ - ***सम्मत्तं*** सम्यक्त्व है। कर्तारूप क्या सम्यक्त्व है? ***सद्दहणं*** मिथ्यात्व के उदय से उत्पन्न विपरीत अभिनिवेश से रहित श्रद्धान सम्यक्त्व है। किनका श्रद्धान सम्यक्त्व है? ***भावाणं*** पञ्चास्तिकाय, षड्द्रव्य के विकल्परूप जीव-अजीव दो तथा जीव-पुद्गल के संयोगरूप परिणाम से उत्पन्न आस्रव आदि सात पदार्थ – इस प्रकार कहे गए लक्षणवाले भावों का, जीवादि नव पदार्थों का श्रद्धान सम्यक्त्व है। नव पदार्थों का विषयभूत यह व्यवहार-सम्यक्त्व है। यह किस विशेषतावाला है? छद्मस्थ अवस्था में शुद्ध जीवास्तिकाय की रुचिरूप निश्चय-सम्यक्त्व का, आत्मविषयक स्वसंवेदन ज्ञान का परम्परा से बीज है। वह स्वसंवेदन ज्ञान भी केवलज्ञान का बीज है। ***चारित्तं*** चारित्र है। वह चारित्र क्या है? ***समभावो*** समभाव चारित्र है। किनमें समभाव चारित्र है? ***विसयेसु*** विषयों में, इन्द्रिय-मनोगत सुख-दुःख की उत्पत्तिरूप शुभाशुभ विषयों में समभाव चारित्र है। वह किनके होता है? ***विरूढ़मग्गाणं*** पूर्वोक्त सम्यक्त्व-ज्ञान के बल से समस्त अन्य मार्गों से छूटकर विशेषरूप से रूढ़मार्गियों (मोक्षमार्ग में रूढ़ जीवों) को, परिज्ञात-मोक्षमार्गियों को होता है।

-सुखदुःखोत्पत्तिरूपशुभाशुभविषयेषु। केषां भवति? *विरूढमग्गाणं* पूर्वोक्तसम्यक्त्वज्ञानबलेन समस्तान्यमार्गेभ्यः प्रच्युत्य विशेषेण रूढमार्गाणां परिज्ञातमोक्षमार्गाणाम्। इदं तु व्यवहारचारित्रं बहिरंग -साधकत्वेन वीतरागचारित्रभावनोत्पन्नपरमात्मतृप्तिरूपस्य निश्चयसुखस्य बीजं तदपि निश्चयसुखं पुनरक्षयानंतसुखस्य बीजमिति।

अत्र यद्यपि साध्यसाधकभावज्ञापनार्थं निश्चयव्यवहारद्वयं व्याख्यातं, तथापि नवपदार्थविषय -रूपस्य व्यवहारमोक्षमार्गस्यैव मुख्यत्वमिति भावार्थः॥ ११५॥

एवं नवपदार्थप्रतिपादकद्वितीयमहाधिकारे व्यवहारमोक्षमार्गकथनमुख्यतया गाथाचतुष्टयेन प्रथमोऽन्तराधिकारः समाप्तः।

अथानंतरं जीवादिनवपदार्थानां मुख्यवृत्त्या नाम गौणवृत्त्या स्वरूपं च कथयति —

जीवाजीवा भावा पुण्णं पावं च आसवं तेसिं। (१०८)
संवरणिज्जरबंधो मोक्खो य हवंति ते अट्ठा॥ ११६॥

यह व्यवहार-चारित्र बहिरङ्ग साधक होने से वीतराग-चारित्ररूप भावना से उत्पन्न परमात्मतृप्तिरूप निश्चय सुख का बीज है और वह निश्चय सुख भी अक्षय-अनन्त सुख का बीज है।

यहाँ यद्यपि साध्य-साधक ज्ञापनार्थ / बताने के लिए निश्चय-व्यवहार दोनों का व्याख्यान किया है; तथापि नव पदार्थ विषयरूप व्यवहार-मोक्षमार्ग की ही मुख्यता है – ऐसा भावार्थ है॥ ११५॥

इस प्रकार ***नव पदार्थ प्रतिपादक द्वितीय महाधिकार*** में ***व्यवहार-मोक्षमार्ग*** के कथन की मुख्यतावाली ***चार गाथाओं*** द्वारा प्रथम ***अन्तराधिकार*** पूर्ण हुआ।

अब, इसके बाद (द्वितीय अन्तराधिकार में सर्व प्रथम) जीवादि नव पदार्थों का मुख्यवृत्ति से नाम और गौणवृत्ति से स्वरूप कहते हैं —

हैं भाव जीव अजीव उनके, पुण्य-पाप रु आस्रव।
संवर व निर्जर बंध मोक्ष, कहें पदार्थ ये जिनवर॥ ११६॥

गाथार्थ - जीव-अजीव (मूल) भाव हैं; उनके पुण्य-पाप, आस्रव, संवर, निर्जरा, बन्ध और मोक्ष – ये अर्थ / पदार्थ होते हैं।

टीकार्थ - जीव और अजीव – ये दो भाव हैं। पुण्य-पाप, ये दो पदार्थ हैं। उन पुण्य

जीवाजीवौ द्वौ भावौ पुण्यपापद्वयमिति पदार्थद्वयं आस्त्रवपदार्थस्तयोः पुण्यपापयोः संवरनिर्जरा -बंधमोक्षपदार्थचतुष्टयमपि तयोरेव। एवं ते प्रसिद्धा नव पदार्था भवंतीति नामनिर्देशः। इदानीं स्वरूपाभिधानम्। तथाहि —

ज्ञानदर्शनस्वभावो जीवपदार्थः, तद्विलक्षणः पुद्गलादिपञ्चभेदः पुनरप्यजीवः, दानपूजाषडा -वश्यकादिरूपो जीवस्य शुभपरिणामो भावपुण्यं, भावपुण्यनिमित्तेनोत्पन्नः सद्वेद्यादिशुभप्रकृतिरूपः पुद्गलपरमाणुपिंडो द्रव्यपुण्यं; मिथ्यात्वरागादिरूपो जीवस्याशुभपरिणामो भावपापं, तन्निमित्तेनासद्वेद्याद्य -शुभप्रकृतिरूपः पुद्गलपिंडो द्रव्यपापं; निरास्त्रवशुद्धात्मपदार्थविपरीतो रागद्वेषमोहरूपो जीवपरिणामो भावास्त्रवः, भवनिमित्तेन कर्मवर्गणायोग्यपुद्गलानां योगद्वारेणागमनं द्रव्यास्त्रवः; कर्मनिरोधे समर्थो निर्विकल्पकात्मोपलब्धिपरिणामो भावसंवरः, तेन भावनिमित्तेन नवतरद्रव्यकर्मागमनिरोधो द्रव्यसंवरः; कर्मशक्तिशातनसमर्थो द्वादशतपोभिर्वृद्धिं गतः शुद्धोपयोगः संवरपूर्विका भावनिर्जरा, तेन शुद्धोपयोगेन नीरसभूतस्य चिरंतनकर्मण एकदेशगलनं द्रव्यनिर्जरा; प्रकृत्यादिबंधशून्यपरमात्मपदार्थप्रतिकूलो मिथ्यात्वरागादिस्निग्धपरिणामो भावबंधः, भावबंधनिमित्तेन तैलम्रक्षितशरीरे धूलिबंधवज्जीवकर्मप्रदेशा

-पाप दोनों में आस्त्रव पदार्थ है। उन दोनों के ही संवर, निर्जरा, बन्ध, मोक्ष — ये चार पदार्थ हैं। — इस प्रकार वे प्रसिद्ध नौ पदार्थ हैं; ऐसा नाम निर्देश है।

अब, स्वरूप का कथन करते हैं। वह इस प्रकार — ज्ञान, दर्शन स्वभाववाला जीव, पदार्थ है। उससे विलक्षण पुद्गलादि पाँच भेदवाला अजीव पदार्थ है; दान, पूजा, षड्‌आवश्यक आदि रूप जीव का शुभपरिणाम भावपुण्य है तथा भावपुण्य के निमित्त से उत्पन्न सातावेदनीय आदि शुभप्रकृतिरूप पुद्गल परमाणु पिण्ड, द्रव्यपुण्य है। मिथ्यात्व-रागादिरूप जीव का अशुभपरिणाम, भावपाप है; उसके निमित्त से (बँधनेवाला) असातावेदनीय आदि अशुभप्रकृतिरूप पुद्गल पिण्ड, द्रव्यरूप है। निरास्त्रवी शुद्धात्मपदार्थ से विपरीत राग-द्वेष-मोहरूप जीव का परिणाम, भावास्त्रव है; भाव के निमित्त से कर्मवर्गणा योग्य पुद्गलों का योगद्वार से आगमन, द्रव्यास्त्रव है। कर्मनिरोध में समर्थ निर्विकल्प आत्मोपलब्धिरूप परिणाम, भावसंवर है; उस भाव के निमित्त से नवीन द्रव्यकर्म के आगम (आने) का निरोध, द्रव्यसंवर है। कर्म की शक्ति को शातन (क्षीण) करने में समर्थ बारह प्रकार के तपों से वृद्धिङ्गत शुद्धोपयोग संवरपूर्वक, भावनिर्जरा है; उस शुद्धोपयोग से नीरसभूत (अनुभाग / फलदान क्षमतारहित) चिरन्तन (पूर्वबद्ध) कर्म का एकदेश गलन, द्रव्यनिर्जरा है। प्रकृति आदि बन्ध से रहित परमात्म-पदार्थ से प्रतिकूल मिथ्यात्व-रागादि स्निग्ध परिणाम, भावबन्ध है; भावबन्ध के निमित्त से तेल-म्रक्षित (लगाए गए) शरीर पर धूलि -बन्ध के समान जीव और कर्मप्रदेशों का अन्योन्य / परस्पर में संश्लेष, द्रव्यबन्ध है। कर्म का

-नामन्योन्यसंश्लेषो द्रव्यबंधः; कर्मनिर्मूलनसमर्थः शुद्धात्मोपलब्धिरूपजीवपरिणामो भावमोक्षः, भावमोक्षनिमित्तेन जीवकर्मप्रदेशानां निरवशेषः पृथग्भावो द्रव्यमोक्ष इति सूत्रार्थः॥ ११६॥

एवं जीवाजीवादिनवपदार्थानां नवाधिकारसूचनमुख्यत्वेन गाथासूत्रमेकं गतम्।

तदनंतरं पञ्चदशगाथापर्यंतं जीवपदार्थाधिकारः कथ्यते। तत्र पञ्चदशगाथासु मध्ये प्रथमतस्ता -वज्जीवपदार्थाधिकारसूचनमुख्यत्वेन *जीवा संसारत्था....* इत्यादि गाथासूत्रमेकं, अथ पृथ्वीकायादि -स्थावरैकेन्द्रियपञ्चमुख्यत्वेन *पुढवी य....* इत्यादि पाठक्रमेण गाथाचतुष्टयं, अथ विकलेन्द्रियत्रय -व्याख्यानमुख्यत्वेन *संबुक्क....* इत्यादि पाठक्रमेण गाथात्रयं, तदनंतरं नारकतिर्यग्मनुष्यदेवगतिचतुष्टय -विशिष्टपञ्चेन्द्रियकथनरूपेण *सुरणर....* इत्यादि पाठक्रमेण गाथाचतुष्टयं, अथ भेदभावनामुख्यत्वेन हिताहितकर्तृत्वभोक्तृत्वप्रतिपादनमुख्यत्वेन च *ण हि इंदियाणि....* इत्यादि गाथाद्वयं, अथ जीवपदार्थोप -संहारमुख्यत्वेन तथैवाजीवपदार्थप्रारम्भमुख्यत्वेन च *एवमधिगम्म जीव....* इत्यादि सूत्रमेकम्। एवं पञ्चदशगाथाभिः षट्स्थलैर्द्वितीयांतराधिकारे समुदायपातनिका। तथाहि —

निर्मूलन (जड़ मूल से नष्ट) करने में समर्थ शुद्धात्मा की उपलब्धिरूप जीव का परिणाम, भावमोक्ष है; भावमोक्ष के निमित्त से जीव और कर्मप्रदेशों का निरवशेष / पूर्णरूप से पृथग्भाव द्रव्यमोक्ष है – ऐसा सूत्रार्थ है॥ ११६॥

इस प्रकार जीव-अजीवादि नव पदार्थों के नौ अधिकार-सूचन की मुख्यता से एक गाथा -सूत्र पूर्ण हुआ।

इसके बाद, पन्द्रह गाथाओं पर्यन्त ***जीवपदार्थ-अधिकार*** कहते हैं। उन पन्द्रह गाथाओं में से सर्व प्रथम जीवपदार्थाधिकार सूचन की मुख्यता से ***जीवा संसारत्था*** इत्यादि एक गाथा-सूत्र, तत्पश्चात् पृथ्वीकाय आदि पाँच स्थावर एकेन्द्रिय की मुख्यता से ***पुढवीय*** इत्यादि पाठक्रम से चार गाथाएँ हैं। तदुपरान्त तीन विकलेन्द्रिय के व्याख्यान की मुख्यता से ***संबुक्क*** इत्यादि पाठक्रम से तीन गाथा हैं। तदनन्तर नारकी, तिर्यञ्च, मनुष्य, देव-चार गति से विशिष्ट पञ्चेन्द्रिय कथनरूप से ***सुरणर*** इत्यादि पाठक्रम से चार गाथा हैं। इसके बाद भेद-भावना की मुख्यता से और हित-अहित के कर्तृत्व-भोक्तृत्व प्रतिपादन की मुख्यता से ***ण हि इंदियाणि*** इत्यादि दो गाथा हैं। तत्पश्चात् जीवपदार्थ के उपसंहार की मुख्यता से और उसी प्रकार अजीवपदार्थ के प्रारम्भ की मुख्यता से ***एवमधिगम्म जीव*** इत्यादि एक गाथा है।

इस प्रकार पन्द्रह गाथाओं वाले छह स्थलों द्वारा द्वितीय अन्तराधिकार में सामूहिक उत्थानिका पूर्ण हुई।

जीवस्वरूपं निरूपयति —

जीवा संसारत्था णिव्वादा चेदणप्पगा दुविहा। (१०९)
उवओगलक्खणा वि य देहादेहप्पवीचारा॥ ११७॥

जीवा जीवा भवन्ति। किंविशिष्टाः ? *संसारत्था णिव्वादा* संसारस्था निर्वृताश्चैव *चेदणप्पगा दुविहा* चेतनात्मका उभयेऽपि कर्मचेतनाकर्मफलचेतनात्मकाः संसारिणः शुद्धचेतनात्मका मुक्ता इति *उवओगलक्खणा वि य* उपयोगलक्षणा अपि च। आत्मनश्चैतन्यानुविधायिपरिणाम उपयोगः केवल -ज्ञानदर्शनोपयोगलक्षणा मुक्ताः क्षायोपशमिका अशुद्धोपयोगयुक्ताः संसारिणः। *देहादेहप्पवीचारा*

द्वितीय अन्तराधिकार का स्थल विभाजन - गाथा ११६ से १३१ पर्यन्त

स्थलक्रम	प्रतिपादित विषय	कहाँ से कहाँ पर्यन्त	कुल गाथाएँ
१	जीवपदार्थाधिकार की सूचना	११७ वीं	१
२	पञ्च स्थावर एकेन्द्रिय मुख्यता	११८-१२१ वीं	४
३	तीन विकलेन्द्रिय मुख्यता	१२२-१२४ वीं	३
४	चार गतिरूप पञ्चेन्द्रिय के कथनरूप	१२५-१२८ वीं	४
५	भेदभावना, हिताहित कर्तृत्व-भोक्तृत्व प्रतिपादक	१२९-१३० वीं	२
६	जीवाधिकार उपसंहार, अजीवाधिकार प्रारम्भ	१३१ वीं	१

वह इस प्रकार : जीव के स्वरूप का निरूपण करते हैं –

उपयोग लक्षण चेतनात्मक, जीव संसारस्थ वा।
हैं सिद्ध दुविध शरीर के, प्रविचार सहित रहित तथा॥ ११७॥

गाथार्थ - चेतनात्मक और उपयोग लक्षणवाले जीव दो प्रकार के हैं – संसारस्थ और सिद्ध। देह में प्रवीचारसहित संसारस्थ हैं तथा देह में प्रवीचाररहित सिद्ध हैं।

टीकार्थ - ***जीवा*** जीव हैं। वे किस विशेषतावाले हैं ? ***संसारत्था णिव्वादा*** वे संसारस्थ (संसारी) और निर्वृत्त (मुक्त) हैं। ***चेदणप्पगा दुविहा*** वे दोनों ही चेतनात्मक हैं; संसारी, कर्मचेतना और कर्मफलचेतनात्मक हैं; मुक्त, शुद्ध चेतनात्मक हैं। ***उवओगलक्खणा विय*** वे उपयोग लक्षणवाले भी हैं। आत्मा के चैतन्य का अनुसरण करनेवाला परिणाम उपयोग है; केवलज्ञान-दर्शन उपयोग लक्षणवान (अरहन्त-सिद्ध) मुक्त हैं; क्षायोपशमिक अशुद्धोपयोग से युक्त संसारी हैं। ***देहादेहप्पवीचारा*** वे देहादेह-प्रवीचारवाले हैं; अदेह आत्मतत्त्व से विपरीत

देहादेहप्रवीचाराः अदेहात्मतत्त्वविपरीतदेहसहिता देहप्रवीचाराः अदेहाः सिद्धा इति सूत्रार्थः॥ ११७॥

एवं जीवाधिकारसूचनगाथारूपेण प्रथमस्थलं गतम्।

अथ पृथिवीकायादिपञ्चभेदान् प्रतिपादयति —

पुढवी य उदगमगणी वाउवणप्फदिजीवसंसिदा काया।(११०)
देंति खलु मोहबहुलं फासं बहुगा वि ते तेसिं॥ ११८॥

पृथिवीजलाग्निवायुवनस्पतिजीवान् कर्मतापन्नान् संश्रिताः कायाः ददति प्रयच्छन्ति खलु स्फुटम्। कं ? मोहबहुलं स्पर्शविषयं बहुका अंतर्भेदैर्बहुसंख्या अपि ते कायास्तेषां जीवानामिति।

अत्र स्पर्शनेन्द्रियादिरहितमखंडैकज्ञानप्रतिभासमयं यदात्मस्वरूपं तद्भावनारहितेनाल्पसुखार्थं स्पर्शनेन्द्रियविषयलांपट्यपरिणतेन जीवेन यदुपार्जितं स्पर्शनेन्द्रियजनकमेकेन्द्रियजातिनामकर्म तदुदयकाले स्पर्शनेन्द्रियक्षयोपशमं लब्ध्वा स्पर्शविषयज्ञानेन परिणमतीति सूत्राभिप्रायः॥ ११८॥

देहसहित (देह का भोग-उपयोग करनेवाले) देह-प्रवीचारी हैं; (देह का भोग-उपयोग नहीं करनेवाले) अदेह प्रवीचारी सिद्ध हैं – ऐसा सूत्रार्थ है॥ ११७॥

इस प्रकार जीवाधिकार की सूचनापरक गाथारूप से प्रथम गाथा-सूत्र पूर्ण हुआ।

अब, पृथ्वीकाय आदि पाँच भेदों का प्रतिपादन करते हैं —

भू जल अनल वायु वनस्पति, जीव से संयुक्त वे।
बहुविध वदन अति मोहयुत, स्पर्श देते हैं उन्हें॥ ११८॥

गाथार्थ - पृथ्वी, जल, अग्नि, वायु, वनस्पति जीव से संश्रित / सहित अनेक प्रकार के वे शरीर, वास्तव में उन्हें (उन जीवों को) मोह से बहुल स्पर्श देते हैं।

टीकार्थ - कर्मता को प्राप्त पृथ्वी, जल, अग्नि, वायु, वनस्पति जीवों से संश्रित काय / शरीर वास्तव में देते हैं। वे क्या देते हैं ? बहुक / अन्तर्भेद से बहु संख्यावाले होने पर भी वे शरीर उन जीवों को मोह से बहुल स्पर्शरूप विषय देते हैं।

यहाँ स्पर्शनेन्द्रिय आदि से रहित, अखण्ड एक ज्ञान प्रतिभासमय जो आत्मस्वरूप, उसकी भावना से रहित तथा अल्पसुख के लिए स्पर्शनेन्द्रिय सम्बन्धी विषय की लम्पटतारूप से परिणत जीव द्वारा जो उपार्जित, स्पर्शनेन्द्रिय को उत्पन्न करनेवाला एकेन्द्रिय जाति नामकर्म, उसके उदय के समय स्पर्शनेन्द्रिय के क्षयोपशम को प्राप्तकर स्पर्श-विषय के ज्ञानरूप से परिणमित होता है – ऐसा सूत्र का अभिप्राय है॥ ११८॥

अथ व्यवहारेणाग्निवातकायिकानां त्रसत्वं दर्शयति —

तित्थावरतणुजोगा अणिलाणलकाइया य तेसु तसा।(१११)
मणपरिणामविरहिदा जीवा एइंदिया णेया॥ १११॥

पृथिव्यब्वनस्पतयस्त्रयः स्थावरकाययोगात्संबंधात्स्थावरा भण्यंते अनलानिलकायिकाः तेषु पञ्चस्थावरेषु मध्ये चलनक्रियां दृष्ट्वा व्यवहारेण त्रसा भण्यंते। यदि त्रसास्तर्हि किं मनो भविष्यति? नैवम्। *मणपरिणामविरहिदा* मनः परिणामविहीनास्तथा चैकेन्द्रियाश्च ज्ञेयाः। के? जीवा इति। तत्र स्थावरनामकर्मोदयाद्भिन्नमनंतज्ञानादिगुणसमूहादभिन्नत्वं यदात्मतत्त्वं तदनुभूतिरहितेन जीवेन यदुपार्जितं स्थावरनामकर्म तदुदयाधीनत्वात् यद्यप्यग्निवातकायिकानां व्यवहारेण चलनमस्ति तथापि निश्चयेन स्थावरा इति भावार्थः॥ १११॥

अब, व्यवहार से अग्नि और वायुकायिक जीवों के त्रसपना दिखाते हैं —

उन सभी में से तीन स्थावर तनु संयोग युत।
हैं अनल अनिल तनु कहे, त्रस एक इन्द्रिय मन रहित॥ १११॥

गाथार्थ - उनमें से तीन, स्थावर शरीर के संयोगवाले हैं। वायुकायिक और अग्निकायिक त्रस हैं। वे सभी मन परिणाम से विरहित एकेन्द्रिय जीव जानना चाहिए।

टीकार्थ - पृथ्वी, जल, वनस्पति – ये तीन स्थावरकाय के योग से, सम्बन्ध से स्थावर कहलाते हैं। उन पाँच स्थावरों में से अग्नि और वायुकायिक जीव में चलन क्रिया देखकर, उन्हें व्यवहार से त्रस कहा जाता है। यदि वे त्रस हैं तो क्या मन होगा? ऐसा नहीं है; ***मणपरिणाम -विरहिदा*** वे मन परिणाम से विहीन हैं और उसी प्रकार उन्हें एकेन्द्रिय जानना चाहिए। वे कौन हैं? वे जीव हैं।

वहाँ यद्यपि अग्नि-वायुकायिकों के व्यवहार से चलन है; तथापि स्थावर नाम-कर्मोदय से भिन्न अनन्त ज्ञानादि गुण-समूह से अभिन्न जो आत्मतत्त्व है, उसकी अनुभूति से रहित जीव द्वारा जो उपार्जित स्थावर नामकर्म, उसके उदय के अधीन होने के कारण निश्चय से (वे भी) स्थावर हैं – ऐसा भावार्थ है॥ १११॥

अब, पृथ्वीकायिक आदि पाँचों के एकेन्द्रियत्व का नियम करते हैं —

ये पृथ्वीकायिक आदि जीवनिकाय पाँच प्रकार के।
हैं सभी मनपरिणाम विरहित, जीव एकेन्द्रिय कहे॥ ११२॥

अथ पृथिवीकायिकादीनां पञ्चानामेकेन्द्रियत्वं नियमयति —

एदे जीवणिकाया पंचविहा पुढविकाइयादीया। (११२)
मणपरिणामविरहिदा जीवा एगेंदिया भणिया॥ १२०॥

एते प्रत्यक्षीभूता जीवनिकायाः पञ्चविधाः पृथिवीकायिकादयो जीवाः। ते कथंभूताः ? भणिता मनः परिणामविरहिताः; न केवलं मनः परिणामविरहिता एकेन्द्रियाश्च। कस्मिन् सतीत्थंभूताः भणिताः ? वीर्यान्तरायस्पर्शनेन्द्रियावरणक्षयोपशमलाभात् शेषेन्द्रियावरणोदये नोइन्द्रियावरणोदये च सतीति।

अत्र सूत्रे विश्वोपाधिविमुक्तशुद्धसत्तामात्रदेशकेन निश्चयनयेन यद्यपि पृथिव्यादिपञ्चभेदरहिता जीवास्तथापि व्यवहारनयेनाशुद्धमनोगतरागाद्यपध्यानसहितेन शुद्धमनोगतस्वसंवेदनज्ञानरहितेन यद्बद्धमेकेन्द्रियजातिनामकर्म तदुदयेनामनसः एवेकेन्द्रियाश्च भवंतीत्यभिप्रायः॥ १२०॥

अथ पृथिवीकायाद्येकेन्द्रियाणां चैतन्यास्तित्वविषये दृष्टान्तमाह —

गाथार्थ - ये पृथ्वीकायिक आदि पाँच प्रकार के जीवनिकाय मनपरिणाम से विरहित एकेन्द्रिय जीव हैं।

टीकार्थ - ये पृथ्वीकायिक आदि पाँच प्रकार के प्रत्यक्षीभूत जीवनिकाय जीव हैं। वे कैसे हैं ? मनपरिणाम से विरहित कहे गए हैं; मात्र मनपरिणाम से विरहित ही नहीं, अपितु एकेन्द्रिय भी कहे गए हैं। कैसे होने पर वे इस प्रकार कहे गए हैं ? वीर्यान्तराय और स्पर्शनेन्द्रियावरण के क्षयोपशम का लाभ होने से तथा शेष इन्द्रियावरण का उदय और नो-इन्द्रियावरण का उदय होने पर, वे इस प्रकार कहे गए हैं।

यहाँ सूत्र में विश्व की अथवा अनेक प्रकार की उपाधि से विमुक्त / रहित शुद्ध सत्तामात्र का ज्ञान करानेवाले / कथन करनेवाले निश्चयनय की अपेक्षा यद्यपि जीव पृथ्वी आदि पाँच भेदों से रहित हैं, तथापि व्यवहारनय से अशुद्ध मनोगत रागादि अपध्यान से सहित तथा शुद्ध मनोगत स्वसंवेदन-ज्ञान से रहित होने के कारण जो बँधा हुआ एकेन्द्रिय जाति नामकर्म, उसका उदय होने से एकेन्द्रिय मनरहित ही होते हैं — ऐसा अभिप्राय है॥ १२०॥

अब, पृथ्वीकाय आदि एकेन्द्रियों के चैतन्य सम्बन्धी अस्तित्व के विषय में दृष्टान्त कहते हैं —

ज्यों अण्डे में वर्धित तथा, गर्भस्थ मूर्छित मनुज भी।
प्रत्यक्ष क्रिया विहीन त्यों, जानो एकेन्द्रिय जीव भी॥ १२१॥

अंडेसु पवड्ढंता गब्भत्था माणुसा य मुच्छगया। (११३)
जारिसया तारिसया जीवा एगेंदिया णेया॥ १२१॥

अंडेषु प्रवर्तमानास्तिर्यंचो गर्भस्था मानुष मूर्छागताश्च यादृशा ईहापूर्वव्यवहाररहिता भवन्ति तादृशा एकेन्द्रियजीवा ज्ञेया इति। तथाहि — यथाण्डजादीनां शरीरपुष्टिं दृष्ट्वा बहिरंगव्यापाराभावेऽपि चैतन्यास्तित्वं गम्यते म्लानतां दृष्ट्वा नास्तित्वं च ज्ञायते तथैकेन्द्रियाणामपि।

अयमत्र भावार्थः — परमार्थेन स्वाधीनतानंतज्ञानसुखसहितोऽपि जीवः पश्चादज्ञानेन पराधीनेन्द्रियसुखासक्तो भूत्वा यत्कर्म बध्नाति तेनांडजादिसदृशमेकेन्द्रियजं दुःखितं चात्मानं करोतीति॥ १२१॥

एवं पञ्चस्थावरव्याख्यानमुख्यतया गाथाचतुष्टयेन द्वितीयस्थलं गतम्।

अथ द्वीन्द्रियभेदान् प्ररूपयति —

गाथार्थ - अण्डे में प्रवर्धमान (बढ़ते हुए), गर्भस्थ और मूर्छा को प्राप्त मनुष्य जैसे हैं; उसी प्रकार एकेन्द्रिय जीव जानना चाहिए।

वह इस प्रकार — वह भाव क्या है? और मोक्ष क्या है? ऐसा प्रश्न होने पर प्रत्युत्तर कहते / देते हैं — यहाँ विवक्षित कर्मावृत संसारी जीव का क्षायोपशमिकज्ञान विकल्परूप तो भाव है; और वह अनादि मोहोदयवश राग, द्वेष, मोह से अशुद्ध है। अब, उस भाव का मोक्ष कहते हैं —

जब यह जीव आगम भाषा से कालादि लब्धिरूप और अध्यात्मभाषा से शुद्धात्मा के अभिमुख परिणामरूप स्वसंवेदन-ज्ञान प्राप्त करता है, तब सर्व प्रथम मिथ्यात्व आदि सात प्रकृतियों के उपशम या क्षयोपशम से सराग सम्यग्दृष्टि होकर पराश्रित धर्मध्यान के बहिरङ्ग सहकारी होने के कारण पञ्च परमेष्ठी की भक्ति आदिरूप से 'अनन्त ज्ञानादि स्वरूप मैं हूँ' — इत्यादि भावनास्वरूप आत्माश्रित धर्मध्यान को प्राप्तकर आगम कथित क्रम से असंयत

आगमकथितक्रमेणासंयतसम्यग्दृष्ट्यादिगुणस्थानचतुष्टयमध्ये क्वापि गुणस्थाने दर्शनमोहक्षयेण क्षायिकसम्यक्त्वं कृत्वा तदनंतरमपूर्वादिगुणस्थानेषु प्रकृतिपुरुषनिर्मलविवेकज्योतिरूपप्रथमशुक्लध्यान -मनुभूय रागद्वेषरूपचारित्रमोहोदयाभावेन निर्विकारशुद्धात्मानुभूतिरूपं चारित्रमोहविध्वंसनसमर्थं वीतरागचारित्रं प्राप्य मोहक्षपणं कृत्वा मोहक्षयानंतरं क्षीणकषायगुणस्थानेऽन्तर्मुहूर्तकालं स्थित्वा द्वितीय -शुक्लध्यानेन ज्ञानदर्शनावरणान्तरायकर्मत्रयं युगपदंत्यसमये निर्मूल्य केवलज्ञानाद्यनंतचतुष्टयस्वरूपं भावमोक्षं प्राप्नोतीति भावार्थः॥ १५८-१५९॥

एवं भावमोक्षस्वरूपकथनरूपेण गाथाद्वयं गतम्।

अथ वेदनीयादिशेषाघातिकर्मचतुष्टयविनाशरूपायाः सकलद्रव्यनिर्जरायाः कारणं ध्यानस्वरूपं कथयति —

दंसणणाणसमग्गं झाणं णो अण्णदव्वसंजुत्तं। (१५२)
जायदि णिज्जरहेदू सभावसहिदस्स साहुस्स॥ १६०॥

***दंसण....* इत्यादि पदखंडनरूपेण व्याख्यानं क्रियते — *दंसणणाण* दर्शनज्ञानाभ्यां कृत्वा**

सम्यग्दृष्टि आदि चार गुणस्थानों में से किसी भी गुणस्थान में दर्शनमोह के क्षय से क्षायिक सम्यक्त्व कर, तत्पश्चात् अपूर्व आदि गुणस्थानों में प्रकृति और पुरुष के मध्य निर्मल विवेक ज्योतिरूप प्रथम शुक्लध्यान का अनुभव कर, राग-द्वेष रूप चारित्रमोह के उदय का अभाव होने से चारित्रमोह को विध्वस्त करने में समर्थ निर्विकार शुद्धात्मानुभूतिरूप वीतरागचारित्र को प्राप्तकर, मोह क्षयकर, मोह क्षय के बाद क्षीणकषाय-गुणस्थान में अन्तर्मुहूर्तकाल स्थित होकर अन्तिम समय में द्वितीय शुक्लध्यान द्वारा युगपत् ज्ञानावरण, दर्शनावरण, अन्तराय – इन तीन कर्मों का निर्मूलन कर केवलज्ञान आदि अनन्त चतुष्टय स्वरूप भावमोक्ष को प्राप्त होता है – ऐसा भावार्थ है॥ १५८-१५९॥

इस प्रकार भावमोक्ष के स्वरूप-कथनरूप से दो गाथाएँ पूर्ण हुईं।

अब, वेदनीय आदि शेष चार अघाति कर्म के विनाशरूप सकल द्रव्य की निर्जरा के कारणभूत ध्यान का स्वरूप कहते हैं –

ना अन्य द्रव्यों से सहित, परिपूर्ण दर्शन ज्ञान युत।
है ध्यान हेतु निर्जरा का, साधु के निज भाव युत॥ १६०॥

गाथार्थ - स्वभावसहित साधु के दर्शन-ज्ञान से परिपूर्ण, अन्य द्रव्यों से संयुक्त नहीं होनेवाला ध्यान, निर्जरा का हेतु होता है।

टीकार्थ - ***दंसण*** इत्यादि पद-खण्डनारूप से व्याख्यान करते हैं – ***दंसणणाण***

समग्गं परिपूर्णम्। किं ? *झाणं* ध्यानम्। पुनरपि किंविशिष्टं ? *णो अण्णदव्वसंजुत्तं* अन्यद्रव्यसंयुक्तं न भवति। इत्थंभूतं ध्यानं *जायदि णिज्जरहेदू* निर्जराहेतुर्जायते। कस्य ? *सहावसहिदस्स साहुस्स* शुद्धस्वभावसहितस्य साधोरिति।

तथाहि — तस्य पूर्वोक्तभावमुक्तस्य केवलिनो निर्विकारपरमानंदैकलक्षणस्वात्मोत्थसुखतृप्त -त्वाद्व्यावृत्तहर्षविषादरूपसांसारिकसुखदुःखविक्रियस्य केवलज्ञानदर्शनावरणविनाशादसहायकेवल -ज्ञानदर्शनसहितसहजशुद्धचैतन्यपरिणतत्वादिन्द्रियव्यापारादिबहिर्द्रव्यालंबनाभावाच्च परद्रव्यसंयोग -रहितं स्वरूपनिश्चलत्वादविचलितचैतन्यवृत्तिरूपं च यदात्मनः स्वरूपं तत्पूर्वसंचितकर्मणां ध्यानकार्यभूतं स्थितिविनाशं गलनं च दृष्ट्वा निर्जरारूपध्यानस्य कार्यकारणमुपचर्योपचारेण ध्यानं भण्यत इत्यभिप्रायः।

अत्राह शिष्यः — इदं परद्रव्यालंबनरहितं ध्यानं केवलिनां भवतु। कस्मात् ? केवलिनामुपचारेण ध्यानमिति वचनात्। चारित्रसारादौ ग्रंथे भणितमास्ते — छद्मस्थतपोधनाः द्रव्यपरमाणुं भावपरमाणुं वा ध्यात्वा केवलज्ञानमुत्पादयंति तत्परद्रव्यालंबनरहितं कथं घटत इति ?

दर्शन-ज्ञान से, ***समग्गं*** परिपूर्ण है। इनसे परिपूर्ण कौन है ? ***झाणं*** ध्यान इससे परिपूर्ण है। वह और किस विशेषतावाला है ? ***णो अण्णदव्वसंजुत्तं*** वह अन्य द्रव्य से संयुक्त नहीं है। इस प्रकार का ध्यान ***जायदि णिज्जरहेदू*** निर्जरा का हेतु होता है। वह किसके निर्जरा का हेतु होता है ? ***सहावसहिदस्स साहुस्स*** शुद्ध स्वभावसहित साधु के वह निर्जरा का हेतु होता है।

वह इस प्रकार — निर्विकार परमानन्द एक लक्षण स्वात्मोत्थसुख से तृप्त हो जाने के कारण हर्ष-विषादरूप सांसारिक सुख-दुःखरूप विक्रिया / परिणमन से व्यावृत्त / रहित उन पूर्वोक्त भावयुक्त केवली के, केवल-ज्ञानावरण-दर्शनावरण के विनाश से असहाय (जिसे किसी की सहायता की आवश्यकता नहीं / पूर्ण निरपेक्ष) केवल-ज्ञान-दर्शन-सहित, सहज शुद्ध चैतन्यरूप से परिणत होने के कारण और इन्द्रिय-व्यापार आदि बाह्य द्रव्यों के आलम्बन का अभाव होने के कारण, परद्रव्य के संयोग से रहित तथा स्वरूप में निश्चल हो जाने के कारण अविचलित चैतन्यवृत्तिरूप जो आत्मा का स्वरूप है, उससे ध्यान के कार्यभूत पूर्व सञ्चित् कर्मों के स्थिति-विनाश और स्थिति-गलनरूप कार्य को देखकर, ध्यान के निर्जरारूप कार्य में कारण का उपचार करके, उसे उपचार से ध्यान कहते हैं — ऐसा अभिप्राय है।

यहाँ शिष्य कहता है — परद्रव्य के आलम्बनरहित यह ध्यान केवलियों के हो। उनके किस कारण हो ? केवलियों के उपचार से ध्यान है — ऐसा वचन होने पर उनके वह हो; परन्तु चारित्रसार आदि ग्रन्थ में कहा गया है कि छद्मस्थ तपोधन द्रव्यपरमाणु या भावपरमाणु का ध्यानकर केवलज्ञान उत्पन्न करते हैं, तब फिर वह परद्रव्य के आलम्बन से रहित कैसे घटित होता है ?

परिहारमाह — द्रव्यपरमाणुशब्देन द्रव्यसूक्ष्मत्वं ग्राह्यं भावपरमाणुशब्देन च भावसूक्ष्मत्वं न च पुद्गलपरमाणुः। इदं व्याख्यानं सर्वार्थसिद्धिटिप्पणके भणितमास्ते। अस्य संवादवाक्यस्य विवरणं क्रियते। द्रव्यशब्देनात्मद्रव्यं ग्राह्यं तस्य तु परमाणु। परमाणुरिति कोऽर्थः ? रागाद्युपाधिरहिता सूक्ष्मावस्था। तस्याः सूक्ष्मत्वं कथमिति चेत् ? निर्विकल्पसमाधिविषयादिति द्रव्यपरमाणुशब्दस्य व्याख्यानम्। भावशब्देन तु तस्यैवात्मद्रव्यस्य स्वसंवेदनज्ञानपरिणामो ग्राह्यः तस्य भावस्य परमाणुः। परमाणुरिति कोऽर्थः ? रागादिविकल्परहिता सूक्ष्मावस्था। तस्याः सूक्ष्मत्वं कथमिति चेत् ? इंद्रियमनोविकल्पाविषयत्वादिति भावपरमाणुशब्दस्य व्याख्यानं ज्ञातव्यम्।

अयमत्र भावार्थः— प्राथमिकानां चित्तस्थिरीकरणार्थं विषयाभिलाषरूपध्यानबंचनार्थं च परंपरया मुक्तिकारणं पंचपरमेष्ठ्यादिपरद्रव्यं ध्येयं भवति, दृढतरध्यानाभ्यासेन चित्ते स्थिरे जाते सति निजशुद्धात्मस्वरूपमेव ध्येयम्। तथा चोक्तं श्रीपूज्यपादस्वामिभिः निश्चयध्येयव्याख्यानं —

इसका परिहार कहते / करते हैं – द्रव्यपरमाणु शब्द से द्रव्य की सूक्ष्मता तथा भावपरमाणु शब्द से भाव की सूक्ष्मता ग्रहण करना चाहिए; पुद्गल परमाणु ग्रहण नहीं करना चाहिए – यह व्याख्यान ***'सर्वार्थसिद्धि-टीका'*** में किया गया है। इस संवाद (सम्यक् कथनरूप) वाक्य का विवरण करते हैं – द्रव्य शब्द से आत्मद्रव्य ग्रहण करना चाहिए; उसका परमाणु-द्रव्यपरमाणु। ***'परमाणु'*** इसका क्या अर्थ है ? रागादि उपाधि से रहित सूक्ष्मावस्था – इसका अर्थ है। उसके सूक्ष्मता कैसे है ? यदि ऐसा प्रश्न हो तो कहते हैं – निर्विकल्प समाधि का विषय होने से उसके सूक्ष्मता है। – इस प्रकार द्रव्यपरमाणु शब्द का व्याख्यान किया।

भाव शब्द से उस ही आत्मद्रव्य का स्वसंवेदन-ज्ञानपरिणाम ग्रहण करना चाहिए, उस भाव का परमाणु। ***'परमाणु'*** इसका क्या अर्थ है ? रागादि विकल्परहित सूक्ष्मावस्था – परमाणु का अर्थ है। उसके सूक्ष्मता कैसे है ? यदि ऐसा प्रश्न हो तो कहते हैं – इन्द्रिय और मन सम्बन्धी विकल्प का विषय नहीं होने के कारण, वह सूक्ष्म है। – इस प्रकार भावपरमाणु शब्द का व्याख्यान जानना चाहिए।

यहाँ भावार्थ यह है – प्राथमिक दशावालों को चित्त-स्थिर करने के लिए और विषयाभिलाषारूप ध्यान से बचने के लिए परम्परा से मुक्ति के कारणभूत पञ्च परमेष्ठी आदि परद्रव्य ध्येय हैं; परन्तु दृढ़तर ध्यान के अभ्यास से चित्त-स्थिर हो जाने पर, निज शुद्धात्मा का स्वरूप ही ध्येय है। वैसा ही ***'पूज्यपाद स्वामी'*** द्वारा निश्चय-ध्येय का व्याख्यान किया गया है – 'वह आत्मा, आत्मा के द्वारा, आत्मा में ही, आत्मा को क्षण भर के लिए लीन करता हुआ स्वयंभू होता है।'

'आत्मानमात्मा। आत्मन्येवात्मनासौ क्षणमुपजनयन्सन् स्वयंभूः प्रवृत्तः॥'

अस्य व्याख्यानं क्रियते — आत्मा कर्ता, आत्मानं कर्मतापन्नं, आत्मन्येवाधिकरणभूते, आत्मना करणभूतेन, असौ प्रत्यक्षीभूतात्मा क्षणमन्तर्मुहूर्तमुपजनयन् धारयन् सन् स्वयंभूः प्रवृत्तः सर्वज्ञो जात इत्यर्थः।

इति परस्परसापेक्षनिश्चयव्यवहारनयाभ्यां साध्यसाधकभावं ज्ञात्वा ध्येयविषये विवादो न कर्तव्यः॥ १६०॥

अथ सकलमोक्षसंज्ञं द्रव्यमोक्षमावेदयति —

जो संवरेण जुत्तो णिज्जरमाणोय सव्वकम्माणि। (१५३)
ववगदवेदाउस्सो मुयदि भवं तेण सो मोक्खो॥ १६१॥

***जो* यः कर्ता *संवरेण जुत्तो* परमसंवरेण युक्तः। किं कुर्वन्? *णिज्जरमाणो य* निर्जरयंश्च। कानि? *सव्वकम्माणि* सर्वकर्माणि। पुनः किंविशिष्टः? *ववगदवेदाउस्सो* व्यपगतवेदनीयायुष्यसंज्ञकर्मद्वयः। एवंभूतः स किं करोति? *मुयदि भवं* त्यजति भवं येन कारणेन भवशब्दवाच्यं नामगोत्रसंज्ञं कर्मद्वयं मुंचति**

इसका व्याख्यान करते हैं – आत्मारूपी कर्ता, कर्मता को प्राप्त आत्मा को, अधिकरणभूत आत्मा में, करणभूत आत्मा द्वारा, वह प्रत्यक्षीभूत आत्मा क्षण भर अन्तर्मुहूर्त पर्यन्त धारण करता हुआ स्वयम्भू, सर्वज्ञ होता है – ऐसा अर्थ है।

इस प्रकार परस्पर सापेक्ष निश्चय-व्यवहारनय से साध्य-साधक भाव को जानकर ध्येयभूत विषय में विवाद नहीं करना चाहिए॥ १६०॥

अब, सकल मोक्ष नामक द्रव्यमोक्ष का आवेदन करते हैं (मर्यादापूर्वक ज्ञान कराते हैं) –

संवर सहित सब कर्म की, जो निर्जरा करता हुआ।
वह वेद आयु रहित हो, भव छोड़ता शिव है अतः॥ १६१॥

गाथार्थ - जो संवर से सहित, सभी कर्मों की निर्जरा करता हुआ, वेदनीय और आयुष्क से रहित है, वह भव को छोड़ता है; इसलिए मोक्ष है।

टीकार्थ - ***जो*** कर्तारूप जो ***संवरेण जुत्तो*** संवर से युक्त; क्या करता हुआ? निर्जरा करता हुआ, किनकी निर्जरा करता हुआ? ***सव्वकम्माणि*** सभी कर्मों की निर्जरा करता हुआ जो और किस विशेषतावाला है? ***ववगदवेदाउस्सो*** जो वेदनीय और आयुष्क नामक दो कर्मों से रहित है। ऐसा होता हुआ वह क्या करता है? ***मुयदि भवं*** भव को छोड़ता है। जिस कारण भव शब्द से वाच्य नाम-गोत्र नामक दो कर्मों को छोड़ता है, ***तेण सो मोक्खो*** उस कारण वह प्रसिद्ध मोक्ष होता है; अथवा वह पुरुष ही अभेद से मोक्ष है – ऐसा अर्थ है।

तेण सो मोक्खो तेन कारणेन स प्रसिद्धो मोक्षो भवति; अथवा स पुरुष एवाभेदेन मोक्षो भवतीत्यर्थः।

तद्यथा— अथास्य केवलिनो भावमोक्षे सति निर्विकारसंवित्तिसाध्यं सकलसंवरं कुर्वतः पूर्वोक्त -शुद्धात्मध्यानसाध्यां चिरसंचितकर्मणां सकलनिर्जरां चानुभवतोऽन्तर्मुहूर्तजीवितशेषे सति वेदनीयनाम -गोत्रसंज्ञकर्मत्रयस्यायुषः सकाशादधिकस्थितिकाले तत्कर्मत्रयाधिकस्थितिविनाशार्थं वा संसारस्थिति -विनाशार्थं वा दंडकपाटप्रतरलोकपूर्णसंज्ञं केवलिसमुद्घातं कृत्वाथवायुष्यसहकर्मत्रयस्य संसारस्थितेर्वा समानस्थितिकाले पुनरकृत्वा च तदनन्तरं स्वशुद्धात्मानिश्चलवृत्तिरूपं सूक्ष्मक्रियाप्रतिपातिसंज्ञमुपचारेण तृतीयशुक्लध्यानं कुर्वतः सयोगिगुणस्थानमतिक्रम्य सर्वप्रदेशाह्लादैकाकारपरिणतपरमसमरसीभाव -लक्षणसुखामृतरसास्वादतृप्तं समस्तशीलगुणनिधानं समुच्छिन्नक्रियासंज्ञं चतुर्थशुक्लध्यानाभिधानं परमयथाख्यातचारित्रं प्राप्तस्यायोगिद्विचरमसमये शरीरादिद्वासप्ततिप्रकृतिचरमसमये वेदनीयायुष्यनाम -गोत्रसंज्ञकर्मचतुष्करूपस्य त्रयोदशप्रकृतिपुद्गलपिंडस्य जीवेन सहात्यन्तविश्लेषो द्रव्यमोक्षो भवति।

तदनंतरं किं करोति भगवान्? पूर्वप्रयोगादसंगत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्चेति हेतु -चतुष्टयात् रूपात् सकाशाद्यथासंख्येनाविद्धकुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखा

वह इस प्रकार – भावमोक्ष होने पर अब इन केवली के निर्विकार संवित्ति से साध्य सकल संवर करते हुए तथा पूर्वोक्त शुद्धात्मध्यान से साध्य चिरसञ्चित कर्मों की सकल निर्जरा का अनुभव करते हुए, अन्तर्मुहूर्त जीवन शेष रहने पर वेदनीय, नाम, गोत्र नामक तीन कर्मों का स्थिति-समय आयुष्क से अधिक होने पर उन तीन कर्मों की अधिक स्थिति को नष्ट करने के लिए; अथवा संसार की स्थिति नष्ट करने के लिए; दण्ड, कपाट, प्रतर और लोकपूरण नामक केवली समुद्घात करके; अथवा आयुष्क के साथ तीन कर्मों का या संसार की स्थिति का समय समान होने पर उसे नहीं कर; तत्पश्चात् स्वशुद्धात्मा में निश्चल वृत्तिरूप सूक्ष्म-क्रिया-प्रतिपाति नामक तृतीय शुक्लध्यान का उपचार करते हुए; तदुपरान्त सयोगीगुणस्थान का उल्लङ्घन कर सम्पूर्ण प्रदेशों में आह्लादमय एकाकाररूप से परिणत परम समरसी भाव लक्षण सुखामृत के रसास्वाद से तृप्त, समस्त शील-गुणों के निधान स्वरूप, समुच्छिन्न-क्रिया नामक चतुर्थ शुक्लध्यान से कहे जानेवाले परम यथाख्यातचारित्र को प्राप्त अयोगी के द्विचरम (उपान्त्य) समय में शरीर आदि बहत्तर प्रकृतियों का तथा अन्तिम समय में वेदनीय, आयुष्क, नाम, गोत्र नामक चार कर्मों की तेरह प्रकृतिरूप पुद्गल-पिण्ड का जीव के साथ अत्यन्त विश्लेष (छूट जाने) रूप द्रव्यमोक्ष होता है।

उसके बाद भगवान क्या करते हैं? पूर्व प्रयोग से, असङ्ग हो जाने से, बन्ध का छेद हो जाने से और उसी प्रकार का गति-परिणाम हो जाने से – इन चार कारणरूप से तथा यथाक्रम से आबिद्ध कुलाल चक्र के समान, आलाबु (तूँबड़ी) के लेप से रहित हो जाने के समान, एरण्ड बीज के समान और अग्निशिखा के समान – इस प्रकार चार दृष्टान्त द्वारा एक समय से / में

-वच्चेति दृष्टांतचतुष्टयेनैकसमयेन लोकाग्रं गच्छति। परतो गतिकारणभूतधर्मास्तिकायाभावात्तत्रैव लोकाग्रे स्थितः सन् विषयातीतमनश्वरं परमसुखमनंतकालमनुभवतीति भावार्थः॥ १६१॥

इति द्रव्यमोक्षस्वरूपकथनरूपेण सूत्रद्वयं गतम्।

एवं भावमोक्षद्रव्यमोक्षप्रतिपादनमुख्यतया गाथाचतुष्टयपर्यंतं स्थलद्वयेन दशमोऽन्तराधिकारः।

इति *तात्पर्यवृत्तौ* प्रथमतस्तावत् *अभिवंदिऊण सिरसा...* इमां गाथामादिं कृत्वा गाथाचतुष्टयं व्यवहारमोक्षमार्गकथनमुख्यत्वेन, तदनंतरं षोडशगाथा जीवपदार्थप्रतिपादनेन, तदनंतरं गाथाचतुष्टयम -जीवपदार्थनिरूपणार्थं, ततश्च गाथात्रयं पुण्यपापादिसप्तपदार्थपीठिकारूपेण सूचनार्थं, तदनन्तरं गाथाचतुष्टयं पुण्यपापपदार्थद्वयविवरणार्थं, ततश्च गाथाषट्कं शुभाशुभास्रवव्याख्यानार्थं, तदनन्तरं सूत्रत्रयं संवरपदार्थस्वरूपकथनार्थं, ततश्च गाथात्रयं निर्जरापदार्थव्याख्यानेन निमित्तं, तदनंतरं सूत्रत्रयं बंधपदार्थकथनार्थं, तदनंतरं सूत्रचतुष्टयं मोक्षपदार्थव्याख्यानार्थं चेति दशभिरंतराधिकारैः पञ्चाशद्गाथा -भिर्व्यवहारमोक्षमार्गावयवभूतयोर्दर्शनज्ञानयोर्विषयभूतानां *जीवादिनवपदार्थानां प्रतिपादकः द्वितीय -महाधिकारः* समाप्तः॥ २॥

लोकाग्र को जाते हैं। उससे आगे गति में निमित्त कारणभूत धर्मास्तिकाय का अभाव होने से वहाँ लोकाग्र में ही स्थित होते हुए विषयातीत, अनश्वर, परम सुख को अनन्त काल तक अनुभव करते हैं – ऐसा भावार्थ है॥ १६१॥

इस प्रकार द्रव्यमोक्ष के स्वरूप-कथन रूप दो सूत्र पूर्ण हुए।

इस प्रकार चार गाथा पर्यन्त भावमोक्ष-द्रव्यमोक्ष के प्रतिपादन की मुख्यतावाले दो स्थल द्वारा दशम अन्तराधिकार पूर्ण हुआ।

इस प्रकार ***तात्पर्यवृत्ति*** में सर्व प्रथम ***अभिवंदिऊण सिरसा*** इस गाथा से प्रारम्भ कर चार गाथाएँ ***व्यवहार मोक्षमार्ग*** के कथन की मुख्यता से हैं। तत्पश्चात् सोलह गाथाएँ ***जीव पदार्थ-प्रतिपादन*** रूप से, तुदपरान्त चार गाथाएँ ***अजीव पदार्थ-निरूपण*** के लिए, तदनन्तर तीन गाथाएँ ***पुण्य-पाप आदि सात पदार्थों की पीठिका*** रूप से सूचना के लिए, उसके बाद चार गाथाएँ ***पुण्य-पाप – दो पदार्थों के विवरण*** के लिए, तदनन्तर छह गाथाएँ ***शुभ-अशुभ आस्रव के व्याख्यान*** हेतु, तत्पश्चात् तीन सूत्र ***संवर पदार्थ का स्वरूप*** कहने के लिए, तदुपरान्त तीन गाथाएँ ***निर्जरा पदार्थ के व्याख्यान*** हेतु, तत्पश्चात् तीन सूत्र ***बन्ध पदार्थ का कथन*** करने के लिए और उसके बाद चार सूत्र ***मोक्ष पदार्थ के व्याख्यान*** हेतु हैं – इस प्रकार दश अन्तराधिकारों में विभक्त पचास गाथाओं द्वारा ***व्यवहार मोक्षमार्ग*** के ***अवयव दर्शन-ज्ञान के विषयभूत जीवादि नौ पदार्थों का प्रतिपादक द्वितीय महाधिकार*** समाप्त हुआ॥ २॥

निश्चय-व्यवहारमोक्षमार्ग प्रपञ्च चूलिका प्रतिपादक तृतीय महाधिकार

इत ऊर्ध्वं मोक्षावाप्तिपुरस्सरं निश्चयव्यवहारमोक्षमार्गाभिधाने विशेषव्याख्यानेन चूलिकारूपे तृतीयमहाधिकारे *जीवसहाओ णाणं....* इत्यादिविंशतिगाथा भवंति। तत्र विंशतिगाथासु मध्ये केवलज्ञान -दर्शनस्वभावशुद्धजीवस्वरूपकथनेन जीवस्वभावनियतचरितं मोक्षमार्ग इति कथनेन च *जीवसहाओ णाणं...* इत्यादि प्रथमस्थले सूत्रमेकं, तदनन्तरं शुद्धात्माश्रितः स्वसमयो, मिथ्यात्वरागादिविभावपरिणा -माश्रितः परसमय इति प्रतिपादनरूपेण *जीवो सहावणियदो....* इत्यादि सूत्रमेकं, अथ शुद्धात्मश्रद्धानादि -रूपस्वसमयविलक्षणस्य परसमयस्यैव विशेषविवरणमुख्यत्वेन *जो परदव्वंहि* इत्यादि गाथाद्वयं, अथ वीतरागसर्वज्ञप्रणीतषड्द्रव्यादिसम्यक्श्रद्धानज्ञानपञ्चमहाव्रताद्यनुष्ठानरूपस्य व्यवहारमोक्षमार्गस्य निरूपणमुख्यत्वेन *धम्मादी सद्दहणं....* इत्यादि पञ्चमस्थले सूत्रमेकं, अथ व्यवहाररत्नत्रयेण साध्यस्या -भेदरत्नत्रयस्वरूपनिश्चयमोक्षमार्गप्रतिपादनरूपेण *णिच्छयणयेण....* इत्यादि गाथाद्वयं, तदनंतरं यस्यैव शुद्धात्मभावनोत्पन्नमतीन्द्रियसुखमुपादेयं प्रतिभाति स एव भावसम्यग्दृष्टिरिति व्याख्यानमुख्यत्वेन *जेण*

इससे आगे मोक्ष-प्राप्ति के पूर्व निश्चय-व्यवहार नामक ***मोक्षमार्ग के चूलिकारूप तृतीय महाधिकार*** में विशेष व्याख्यान द्वारा ***जीवसहाओ णाणं*** इत्यादि बीस गाथाएँ हैं। उन बीस गाथाओं में से केवल ज्ञान-दर्शन स्वभावी शुद्ध जीव के स्वरूप-कथन से और जीव स्वभाव में नियत चारित्र मोक्षमार्ग है – इस कथन से ***जीवसहाओ णाणं*** इत्यादि प्रथम स्थल में एक सूत्र है; तदनन्तर शुद्धात्मा के आश्रित स्वसमय और मिथ्यात्व-रागादि विभावपरिणामों के आश्रित परसमय है – इस प्रतिपादनरूप से ***जीवो सहावणियदो*** इत्यादि एक सूत्र है। तत्पश्चात् शुद्धात्मा के श्रद्धान आदिरूप स्वसमय से विलक्षण परसमय के ही विशेष विवरण की मुख्यता से ***जो परदव्वं हि*** इत्यादि दो गाथाएँ; तदुपरान्त रागादि विकल्परहित स्वसम्वेदन स्वरूप स्वसमय के ही और भी विशेष विवरण की मुख्यता से ***जो सव्वसंग*** इत्यादि दो गाथाएँ हैं। इसके बाद वीतराग-सर्वज्ञ प्रणीत छह द्रव्य आदि के सम्यक्श्रद्धान-ज्ञान और पञ्च महाव्रत आदि के अनुष्ठानरूप व्यवहार-मोक्षमार्ग के निरूपण की मुख्यता से ***धम्मादीसद्दहणं*** इत्यादि पाँचवें स्थल में एक सूत्र है। तत्पश्चात् व्यवहाररत्नत्रय से साध्यभूत अभेदरत्नत्रय स्वरूप निश्चय-मोक्षमार्ग के प्रतिपादनरूप से ***णिच्छयणयेण*** इत्यादि दो गाथाएँ हैं। तदुपरान्त जिसे शुद्धात्मारूप भावना से उत्पन्न अतीन्द्रिय सुख ही उपादेय लगता है, वह ही भाव सम्यग्दृष्टि है – इस व्याख्यान की मुख्यता से ***जेण विजाण*** इत्यादि एक सूत्र है। तदनन्तर निश्चय-व्यवहार रत्नत्रय

विजाण इत्यादि सूत्रमेकं, अथ निश्चयव्यवहाररत्नत्रयाभ्यां क्रमेण मोक्षपुण्यबंधौ भवत इति प्रतिपादन -मुख्यत्वेन *दंसणणाणचरित्ताणि* इत्याद्यष्टमस्थले सूत्रमेकं, अथ निर्विकल्पपरमसमाधिस्वरूप -सामायिकसंयमे स्थातुं समर्थोऽपि तत्त्यक्त्वा यद्येकान्तेन सरागचारित्रानुचरणं मोक्षकारणं मन्यते तदा स्थूलपरसमयो भण्यते यदि पुनस्तत्र स्थातुमीहमानोऽपि सामग्रीवैकल्येनाशुभवंचनार्थं शुभोपयोगं करोति तदा सूक्ष्मपरसमयो भण्यत इति व्याख्यानरूपेण *अण्णाणादो णाणी* इत्यादि गाथापञ्चकं, तदनंतरं तीर्थकरादिपुराणजीवादिनवपदार्थप्रतिपादकागमपरिज्ञानसहितस्य तद्भक्तियुक्तस्य च यद्यपि तत्काले पुण्यास्त्रवपरिणामेन मोक्षो नास्ति तथापि तदाधारेण कालांतरे निरास्त्रवशुद्धोपयोगपरिणाम -सामग्रीप्रस्तावे भवतीति कथनमुख्यत्वेन *सपदत्थं....* इत्यादि सूत्रद्वयं, अथास्य पञ्चास्तिकायप्राभृत -शास्त्रस्य साक्षान्मोक्षकारणभूतं वीतरागत्वमेव तात्पर्यमिति व्याख्यानरूपेण *तम्हा णिव्वुदिकामो* इत्यादि सूत्रमेकं, तदनंतरमुपसंहाररूपेण शास्त्रपरिसमाप्त्यर्थं *मग्गप्पभावणट्ठं....* इत्यादि गाथासूत्रमेकम्।

एवं द्वादशान्तरस्थलैर्मोक्षमार्गविशिष्टव्याख्यानरूपे तृतीयमहाधिकारे समुदायपातनिका। तद्यथा - अथ गाथापूर्वार्धेन तु जीवस्वभावनियतचरितं मोक्षमार्गो भवतीति च प्रतिपादयति अथवा निश्चयज्ञान -दर्शनचारित्राणि जीवस्वभावो भवतीत्युपदिशति —

द्वारा क्रमशः मोक्ष और पुण्यबन्ध होता है – इस प्रतिपादन की मुख्यता से ***दंसणणाणचरित्ताणि*** इत्यादि आठवें स्थल में एक सूत्र है। तदुपरान्त निर्विकल्प परम समाधि स्वरूप सामायिक संयम में स्थिर रहने / ठहरने के लिए समर्थ होने पर भी उसे छोड़कर यदि एकान्त से सरागचारित्ररूप अनुचरण को मोक्ष का कारण मानता है, तब स्थूल परसमय कहलाता है, तथा यदि वहाँ स्थिर रहने का इच्छुक होने पर भी सामग्री की विकलता होने के कारण, अशुभ से बचने के लिए शुभोपयोग करता है, तब वह सूक्ष्म परसमय कहलाता है – इस व्याख्यानरूप से ***अण्णाणादो णाणी*** इत्यादि पाँच गाथाएँ हैं। तदनन्तर तीर्थङ्कर आदि के पुराण और जीवादि नौपदार्थ प्रतिपादक आगम के परिज्ञानसहित तथा उनकी भक्ति से युक्त के यद्यपि उस समय पुण्यास्त्रव परिणाम होने से मोक्ष नहीं है; तथापि उसके आधार से कालान्तर में निरास्त्रवमयी शुद्धोपयोगपरिणाम की सामग्री का प्रसङ्ग होता / बनता है – इस कथन की मुख्यता से ***सपदत्थं*** इत्यादि दो सूत्र हैं। इसके बाद साक्षात् मोक्ष की कारणभूत वीतरागता ही इस पञ्चास्तिकाय शास्त्र का तात्पर्य है – इस व्याख्यानरूप से ***तम्हा णिव्वुदिकामो*** इत्यादि एक सूत्र है। तत्पश्चात् उपसंहाररूप से शास्त्र की परिसमाप्ति के लिए ***मग्गप्पभावणट्ठं*** इत्यादि एक गाथा सूत्र है।

इस प्रकार बारह अन्तरस्थलों द्वारा ***मोक्ष-मोक्षमार्ग के विशिष्ट व्याख्यानरूप तृतीय महाधिकार*** में समुदाय पातनिका है। वह इस प्रकार –

जीवसहाओ णाणं अप्पडिहददंसणं अणण्णमयं। (१५४)
चरियं च तेसु णियदं अत्थित्तमणिंदियं भणियं॥ १६२॥

जीवसहाओ णाणं अप्पडिहददंसणं अणण्णमयं **जीवस्वभावो भवति। किं कर्तृ ? ज्ञानमप्रति**

गाथा १६२ से १८१ पर्यन्त तृतीय महाधिकार की सारणी

स्थलक्रम	स्थल प्रतिपादित विषय	गाथा कहाँ से कहाँ पर्यन्त	कुल गाथाएँ
१	शुद्ध जीव-मोक्षमार्ग स्वरूप	१६२	१
२	स्वसमय-परसमय	१६३	१
३	पर समय का विवरण	१६४-१६५	२
४	स्वसमय का विशेष विवरण	१६६-१६७	२
५	व्यवहार मोक्षमार्ग	१६८	१
६	निश्चय मोक्षमार्ग	१६९-१७०	२
७	भाव सम्यग्दृष्टि का स्वरूप	१७१	१
८	निश्चय-व्यवहार रत्नत्रय का फल	१७२	१
९	स्थूल-सूक्ष्म परसमय व्याख्यान	१७३-१७७	५
१०	पुण्यास्रव परिणाम का फल	१७८-१७९	२
११	शास्त्र-तात्पर्य वीतरागता	१८०	१
१२	शास्त्र परिसमाप्ति परक उपसंहार	१८१	१

अब, गाथा-पूर्वार्ध से जीव का स्वभाव और अपरार्ध से जीवस्वभाव में नियत चारित्र मोक्षमार्ग है – ऐसा प्रतिपादित करते हैं; अथवा निश्चय ज्ञान, दर्शन, चारित्र जीव का स्वभाव है – ऐसा उपदेश देते हैं –

आत्मा-स्वभाव अनन्यमय निर्विघ्न दर्शन ज्ञान है।
उनमें नियत निंदारहित, अस्तित्व वह चारित्र है॥ १६२॥

गाथार्थ - अनन्यमय, अप्रतिहत ज्ञान-दर्शन जीव का स्वभाव है तथा उनमें नियत अस्तित्वमय अनिन्दित चारित्र कहलाता है।

टीकार्थ - ***जीवसहाओ णाणं अप्पडिहददंसणं अणण्णमयं*** जीव का स्वभाव है। कर्तारूप क्या जीव का स्वभाव है ? ज्ञान और अप्रतिहत दर्शन, जीव का स्वभाव है। वह कैसा

-हतदर्शनं च। कथंभूतं ? अनन्यमयमभिन्नं इति पूर्वार्धेन जीवस्वभावः कथितः *चरियं य तेसु णियदं अत्थित्तमणिंदियं भणियं* चरितं च तयोर्नियतमस्तित्वमनिंदितं भणितं कथितम्। किं ? चरितं च। किं तत् ? अस्तित्वम्। किंविशिष्टं ? तयोर्ज्ञानदर्शनयोर्नियतं स्थितम्। पुनरपि किंविशिष्टं ? रागाद्यभावाद -निंदितं, इदमेव चरितं मोक्षमार्ग इति।

अथवा द्वितीयव्याख्यानं — न केवलं केवलज्ञानदर्शनद्वयं जीवस्वभावो भवति किंतु पूर्वोक्त -लक्षणं चरितं स्वरूपास्तित्वं चेति।

इतो विस्तरः — समस्तवस्तुगतानंतधर्माणां युगपद्विशेषपरिच्छित्तिसमर्थं केवलज्ञानं तथा सामान्य -युगपत्परिच्छित्तिसमर्थं केवलदर्शनमिति जीवस्वभावः। कस्मादिति चेत् ? सहजशुद्धसामान्यविशेष -चैतन्यात्मकजीवास्तित्वात्सकाशात्संज्ञालक्षणप्रयोजनादिभेदेऽपि द्रव्यक्षेत्रकालभावैरभेदादिति। पूर्वोक्तजीवस्वभावादभिन्नमुत्पादव्ययध्रौव्यात्मकमिंद्रियव्यापाराभावान्निर्विकारमदूषितं चेत्येवं गुणविशिष्टस्वरूपास्तित्वं जीवस्वभावनियतचरितं भवति। तदपि कस्मात् ? स्वरूपं चरणं चारित्रमिति

है ? अनन्यमय, अभिन्न है – इस प्रकार पूर्वार्ध से जीव का स्वभाव कहा। ***चरियं य तेसु णियदं अत्थित्तमणिंदियं भणियं*** और चारित्र उन दोनों में नियत, अस्तित्व, अनिन्दित कहा गया है। वह क्या है ? चारित्र है। वह कैसा है ? अस्तित्वमय है। वह किस विशेषतावाला है ? उन ज्ञान-दर्शन में नियत, स्थित है। और किस विशेषतावाला है ? रागादि का अभाव होने से अनिन्दित है; यही चारित्र मोक्षमार्ग है – (ऐसा अर्थ है)।

अथवा द्वितीय व्याख्यान : मात्र केवल ज्ञान-दर्शन – ये दो जीव के स्वभाव नहीं हैं, अपितु पूर्वोक्त लक्षण चारित्र, स्वरूपास्तित्व भी जीव का स्वभाव है।

यहाँ विस्तार करते हैं – समस्त वस्तुओं सम्बन्धी अनन्त धर्मों को युगपत् विशेषरूप से जानने में समर्थ केवलज्ञान है तथा सामान्यरूप से युगपत् जानने (देखने) में समर्थ केवलदर्शन है – ये जीव के स्वभाव हैं। ये जीव के स्वभाव कैसे हैं ? यदि ऐसा प्रश्न हो तो कहते हैं – सहज शुद्ध सामान्य-विशेष चैतन्यात्मक जीव अस्तित्व में संज्ञा, लक्षण, प्रयोजन आदि भेद होने पर भी द्रव्य, क्षेत्र, काल, भाव की अपेक्षा अभेद होने से ये जीव के स्वभाव हैं। पूर्वोक्त जीवस्वभाव से अभिन्न उत्पाद-व्यय-ध्रौव्यात्मक और इन्द्रिय व्यापार का अभाव होने से निर्विकार, अदूषित – इस प्रकार के गुण से विशिष्ट स्वरूपास्तित्वमय जीवस्वभाव में नियत चारित्र है।

वह चारित्र कैसे है ? – 'स्वरूप में चरण / प्रवृत्ति चारित्र है' – ऐसा वचन होने से वह चारित्र है। और वह दो प्रकार का है – स्वयं आचरण नहीं करते हुए भी, पर से अनुभूत इष्ट

-वचनात्। तच्च द्विविधं स्वयमनाचरतोऽपि परानुभूतेष्टकामभोगेषु स्मरणमपध्यानलक्षणमिति तदादिपरभावपरिणमनं परचरितं तद्विपरीतं स्वचरितम्। इदमेव चारित्रं परमार्थशब्दवाच्यस्य मोक्षस्य कारणं न चान्यदित्यजानतां मोक्षाद्भिन्नस्यासारसंसारस्य कारणभूतेषु मिथ्यात्वरागादिषु निरतानामस्माक -मेवानंतकालो गतः; एवं ज्ञात्वा तदेव जीवस्वभावनियतचरितं मोक्षकारणभूतं निरंतरं भावनीयमिति सूत्रतात्पर्यम्। तथाचोक्तं —

'एमेव गओ कालो असारसंसारकारणरयाणं।
परमट्ठकारणाणं कारण ण हु जाणियं किंपि॥'

एवं जीवस्वभावकथनेन जीवस्वभावनियतचरितमेव मोक्षमार्ग इति कथनेन च प्रथमस्थले गाथा गता॥ १६२॥

अथ स्वसमयोपादानेन कर्मक्षयो भवतीति हेतोर्जीवस्वभावनियतं चरितं मोक्षमार्गो भवत्येवं भण्यते —

जीवो सहावणियदो अणियदगुणपज्जओध परसमओ।(१५५)
जदि कुणदि सगं समयं पब्भस्सदि कम्मबंधादो॥ १६३॥

काम-भोगों में स्मरण, अपध्यान लक्षण इत्यादिरूप परभाव-परिणमन परचारित्र है; तथा उससे विपरीत स्वचारित्र है। यह ही चारित्र परमार्थ शब्द से वाच्य मोक्ष का कारण है; इससे भिन्न कोई दूसरा मोक्ष का कारण नहीं है – ऐसा नहीं जानते हुए, मोक्ष से भिन्न असार संसार के कारणभूत मिथ्यात्व-रागादि में निरत वर्तते हुए, हमारा ही अनन्त काल व्यतीत हो गया – ऐसा जानकर मोक्ष के कारणभूत उस ही जीवस्वभाव में नियत चारित्र निरन्तर भावना करने-योग्य है – ऐसा सूत्र-तात्पर्य है। वैसा ही कहा भी है –

'असार संसार के कारणों में रत जीवों का इसी प्रकार ही (यों ही) समय व्यतीत हो गया; उन्होंने परमार्थ के कारणों का कारण कुछ भी नहीं जाना।'

इस प्रकार जीवस्वभाव के कथन द्वारा और जीवस्वभाव में नियत चारित्र ही मोक्षमार्ग है – इस कथन द्वारा प्रथम स्थल में गाथा पूर्ण हुई॥ १६२॥

अब, स्वसमयरूप उपादान से कर्मक्षय होता है; इस कारण जीवस्वभाव में नियत चारित्र मोक्षमार्ग है; ऐसा कहते हैं –

आतम नियत स्व भाव में, गुण परिणमन अनियत करे।
तो परसमय स्वसमय कर्ता कर्म बंधन से छुटे॥ १६३॥

जीवो सहावणियदो जीवो निश्चयेन स्वभावनियतोऽपि *अणियदगुणपज्जओध परसमओ* अनियतगुणपर्यायःसन्नथ परसमयो भवति। तथाहि — जीवः शुद्धनयेन विशुद्धज्ञानदर्शनस्वभावस्तावत् पश्चाद्व्यवहारेण निर्मोहशुद्धात्मोपलब्धिप्रतिपक्षभूतेनानादिमोहोदयवशेन मतिज्ञानादिविभावगुणनर -नारकादिविभावपर्यायपरिणतः सन् परसमयरतः परचरितो भवति, यदा तु निर्मलविवेकज्योतिः समुत्पादकेन परमात्मानुभूतिलक्षणेन परमकलानुभवेन शुद्धबुद्धैकस्वभावमात्मानं भावयति, तदा स्वसमयः स्वचरितरतो भवति *जदि कुणदि सगं समयं* यदि चेत्करोति स्वकं समयं, एवं स्वसमयपरसमय स्वरूपं ज्ञात्वा यदि निर्विकारस्वसंवित्तिरूपस्वसमयं करोति परिणमति *पब्भस्सदि कम्मबंधादो* प्रभ्रष्टो भवति कर्मबंधात्, तदा केवलज्ञानाद्यनंतगुणव्यक्तिरूपान्मोक्षात्प्रतिपक्षभूतो योऽसौ बंधस्तस्माच्च्युतो भवति। ततो ज्ञायते स्वसंवित्तिलक्षणस्वसमयरूपं जीवस्वभावनियतचरितमेव मोक्षमार्ग इति भावार्थः॥ १६३॥

एवं स्वसमयपरसमयभेदसूचनरूपेण गाथा गता।

गाथार्थ - स्वभाव नियत जीव यदि अनियत गुण-पर्यायवाला होता है तो वह परसमय है; तथा यदि वह स्वसमय को करता है, तो कर्मबन्ध से छूट जाता है।

टीकार्थ - ***जीवो सहावणियदो*** जीव निश्चय से स्वभाव में नियत होने पर भी ***अणियदगुणपज्जओध परसमओ*** अनियत गुण-पर्यायवाला होता हुआ परसमय होता है।

वह इस प्रकार - वास्तव में तो जीव, शुद्धनय से विशुद्ध ज्ञान-दर्शनस्वभावी है। पश्चात् व्यवहार से निर्मोह शुद्धात्मा की उपलब्धि से प्रतिपक्षभूत अनादि मोहोदयवश, मतिज्ञानादि विभाव गुण और मनुष्य-नारकी आदि विभाव पर्यायोंरूप परिणमित होता हुआ परसमयरत परचारित्र होता है; परन्तु जब निर्मल विवेक ज्योति से समुत्पादक परमात्मानुभूति लक्षण परमकला के अनुभव से शुद्ध-बुद्ध एक स्वभावी आत्मा की भावना करता है, तब स्वसमय, स्वचारित्ररत होता है। ***जदि कुणदि सगं समयं*** यदि स्वसमय को करता है तो; - इस प्रकार स्वसमय-परसमय के स्वरूप को जानकर यदि निर्विकार स्वसम्वित्तिरूप स्वसमय को करता है, उसरूप परिणमित होता है, ***पब्भस्सदि कम्मबंधादो*** प्रभ्रष्ट होता है कर्मबन्ध से; तब केवलज्ञान आदि अनन्त गुणों की प्रगटतारूप मोक्ष के प्रतिपक्षभूत जो वह बन्ध है, उससे च्युत होता है। इससे ज्ञात होता है कि स्वसंवित्तिलक्षण स्वसमयरूप जीवस्वभाव में नियत चारित्र ही मोक्षमार्ग है - ऐसा भावार्थ है॥ १६३॥

इस प्रकार स्वसमय-परसमय के भेद-सूचनरूप से गाथा पूर्ण हुई।

अथ परसमयपरिणतपुरुषस्वरूपं पुनरपि व्यक्तीकरोति —

जो परदव्वम्मि सुहं असुहं रागेण कुणदि जदि भावं।(१५६)
सो सगचरित्तभट्ठो परचरियचरो हवदि जीवो॥ १६४॥

जो परदव्वम्मि सुहं असुहं रायेण कुणदि जदि भावं **यः परद्रव्ये शुभमशुभं वा रागेण करोति यदि भावं *सो सगचरित्तभट्ठो* सः स्वकचरित्रभ्रष्टः सन् *परचरियचरो हवदि जीवो* परचरित्रचरो भवति जीव इति।**

तथाहि — यः कर्ता शुद्धगुणपर्यायपरिणतनिजशुद्धात्मद्रव्यात्परिभ्रष्टो भूत्वा निर्मलात्मतत्त्व -विपरीतेन रागभावेन परिणम्य शुभाशुभपरद्रव्योपेक्षालक्षणाच्छुद्धोपयोगाद्विपरीतः समस्तपरद्रव्येषु शुभमशुभं वा भावं करोति, स ज्ञानानंदैकस्वभावात्मा तत्त्वानुचरणलक्षणात्स्वकीयचारित्राद्भ्रष्टः सन् स्वसंवित्त्यनुष्ठानविलक्षणपरचरित्रचरो भवतीति सूत्राभिप्रायः॥ १६४॥

अथ परचरित्रपरिणतपुरुषस्य बंधं दृष्ट्वा मोक्षं निषेधयति; अथवा पूर्वोक्तमेव परसमयस्वरूपं वृद्धमतसंवादेन दृढयति —

अब, परसमय परिणत पुरुष का स्वरूप और भी व्यक्त करते हैं –

जो राग से परद्रव्य में, करता शुभाशुभ भाव को।
वह स्वचरित से भ्रष्ट करता, परचरित आचार को॥ १६४॥

गाथार्थ - जो (जीव) राग से परद्रव्य में यदि शुभ-अशुभभाव करता है, तो वह जीव स्वचारित्र से भ्रष्ट परचारित्ररूप आचरण करनेवाला होता है।

टीकार्थ - ***जो परदव्वम्हि सुहं असुहं रायेण कुणदि जदि भावं*** जो परद्रव्य में यदि राग से शुभ या अशुभभाव करता है, ***सो सगचरित्तभट्ठो*** वह स्वचारित्र से भ्रष्ट होता हुआ ***परचरियचरो हवदि जीवो*** जीव परचारित्रचर होता है।

वह इस प्रकार – कर्तारूप जो शुद्ध गुण-पर्यायरूप परिणत निज शुद्धात्म-द्रव्य से परिभ्रष्ट होकर निर्मल आत्मतत्त्व से विपरीत रागभावरूप से परिणमन कर शुभाशुभ परद्रव्य से उपेक्षा लक्षण शुद्धोपयोग से विपरीत समस्त परद्रव्यों में शुभ या अशुभभाव करता है, वह ज्ञानानन्द एक स्वभावी आत्मा, तत्त्व अनुचरण लक्षण अपने चारित्र से भ्रष्ट होता हुआ, स्वसम्वित्ति सम्बन्धी अनुष्ठान से विलक्षण परचारित्ररूप आचरण करनेवाला होता है – ऐसा सूत्राभिप्राय है॥ १६४॥

अब, परचारित्र परिणत पुरुष के बन्ध देखकर मोक्ष का निषेध करते हैं; अथवा पूर्वोक्त ही परसमय के स्वरूप को वृद्धमत-संवाद से (जिनेन्द्र भगवान के कथन से) दृढ़ करते हैं –

आसवदि जेण पुण्णं पावं वा अप्पणोथ भावेण। (१५७)
सो तेण परचरित्तो हवदित्ति जिणा परूवेंति॥ १६५॥

आसवदि जेण पुण्णं पावं वा आस्रवति येन पुण्यं पापं वा येन निरास्रवपरमात्मतत्त्वविपरीतेन सम्यगास्रवति। किं ? पुण्यं पापं वा। येन केन ? *भावेण* परिणामेन। कस्य भावेन ? *अप्पणो* आत्मनः *अथ* अहो *सो तेण परचरित्तो हवदित्ति जिणा परूवेंति* स जीवो यदि निरास्रवपरमात्मस्वभावाच्च्युतो भूत्वा तं पूर्वोक्तं सास्रवभावं करोति तदा स जीवस्तेन भावेन शुद्धात्मानुभूत्याचरणलक्षणस्वचरित्राद्भ्रष्टः सन् परचरित्रो भवतीति जिनाः प्ररूपयंति। ततः स्थितं सास्रवभावेन मोक्षो न भवतीति॥ १६५॥

एवं विशुद्धज्ञानदर्शनस्वभावाच्छुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभूतिरूपनिश्चयमोक्षमार्ग -विलक्षणस्य परसमयस्य विशेषविवरणमुख्यत्वेन गाथाद्वयं गतम्।

अथ स्वचरितप्रवृत्तपुरुषस्वरूपं विशेषेण कथयति —

इन पुण्य का या पाप का, आस्रव करे जिस भाव से।
जिनवर कहें वह आत्मा, परचरित हो उस भाव से॥ १६५॥

गाथार्थ - आत्मा के जिस भाव से पुण्य या पाप का आस्रव होता है, वह उससे परचारित्र -वाला होता है — ऐसा 'जिन' प्ररूपित करते हैं।

टीकार्थ - ***आसवदि जेण पुण्णं पावं वा*** जिससे पुण्य या पाप का आस्रव होता है; निरास्रव परमात्मतत्त्व से विपरीत जिससे सम्यक्तया आस्रव होता है। किनका होता है ? पुण्य या पाप का होता है। जिससे किससे होता है ? ***भावेण*** भाव से / परिणाम से होता है। किसके भाव से होता है ? ***अप्पणो*** आत्मा के भाव से होता है। ***अथ*** अहो! ***सो तेण परचरित्तो हवदित्ति जिणा परूवेंति*** वह जीव यदि निरास्रव परमात्मस्वभाव से च्युत होकर उस पूर्वोक्त आस्रवभाव को करता है, तब वह जीव उस भाव द्वारा शुद्धात्मानुभूतिरूप आचरण लक्षण स्वचारित्र से भ्रष्ट होता हुआ, परचारित्र होता है — ऐसा जिन प्ररूपित करते हैं। इससे यह निश्चित हुआ कि आस्रवसहित भाव से मोक्ष नहीं होता है॥ १६५॥

इस प्रकार विशुद्ध ज्ञान-दर्शनस्वभावी शुद्धात्मतत्त्व के सम्यक् श्रद्धान-ज्ञान और अनुभूतिरूप निश्चय मोक्षमार्ग से विलक्षण परसमय के विशेष विवरण की मुख्यता से दो गाथाएँ पूर्ण हुईं।

अब, स्वचारित्र में प्रवृत्त पुरुष का स्वरूप विशेषरूप से कहते हैं —

सब संग मुक्त अनन्यमन, निज आत्मा स्व भाव से।
जो नियत देखे और जाने, स्वचरित्र प्रवृत्त है॥ १६६॥

जो सव्वसंगमुक्को णण्णमणो अप्पणं सहावेण। (१५८)
जाणदि पस्सदि णियदं सो सगचरियं चरदि जीवो॥ १६६॥

जो इत्यादि पदखंडनारूपेण व्याख्यानं क्रियते — *सो* सः कर्ता *सगचरियं चरदि* निजशुद्धात्म -संवित्त्यनुचरणरूपं परमागमभाषया वीतरागपरमसामायिकसंज्ञं स्वचरितं चरति अनुभवति। स कः ? *जीवो* जीवः। कथंभूतः ? *जो सव्वसंगमुक्को* यः सर्वसंगमुक्तः जगत्त्रयकालत्रयेऽपि मनोवचनकायैः कृतकारितानुमतैश्च कृत्वा समस्तबाह्याभ्यंतरपरिग्रहेण मुक्तो रहितः शून्योऽपि निस्संगपरमात्मभावनोत्पन्न -सुंदरानंदस्यंदिपरमानंदैकलक्षणसुखसुधारसास्वादेन पूर्णकलशवत्सर्वात्मप्रदेशेषु भरितावस्थः। पुनरपि किंविशिष्टः ? *अणण्णमणो* अनन्यमनाः कापोतलेश्याप्रभृतिदृष्टश्रुतानुभूतभोगाकांक्षादिसमस्तपर -भावोत्पन्नविकल्पजालरहितत्वेनैकाग्रमनाः। पुनश्च किं करोति ? *जाणदि* जानाति स्वपरपरिच्छित्त्या -कारेणोपलभते *पस्सदि* पश्यति निर्विकल्परूपेणावलोकयति *णियदं* निश्चितम्। कं ? *अप्पणं* निजात्मानम्। केन कृत्वा ? *सहावेण* निर्विकारचैतन्यचमत्कारप्रकाशेनेति।

गाथार्थ - सर्व सङ्ग मुक्त और अनन्यमय जो स्वभाव द्वारा नियत आत्मा को जानता-देखता है, वह जीव स्वचारित्र का आचरण करता है।

टीकार्थ - ***जो*** इत्यादि पद-खण्डनारूप से व्याख्यान करते हैं – ***सो*** कर्तारूप वह ***सगचरियं चरदि*** निजशुद्धात्मा की सम्वित्ति, अनुचरणरूप, परमागम भाषा से वीतराग परम सामायिक नामक स्वचारित्रमय आचरण करता है, अनुभव करता है। ऐसा करनेवाला कौन है ? ***जीवो*** वह जीव है। वह कैसा जीव है ? ***जो सव्वसंगमुक्को*** जो सर्व सङ्ग से मुक्त है; तीन लोक-तीन काल में भी मन, वचन, काय और कृत, कारित, अनुमोदना द्वारा समस्त बाह्य -अभ्यन्तर परिग्रह से मुक्त, रहित, शून्य होते हुए भी निस्सङ्ग परमात्मा की भावना से उत्पन्न सुन्दर आनन्द स्यंदि परमानन्द एक लक्षण सुख-सुधारस के आस्वाद से पूर्ण भरे हुए कलश के समान सम्पूर्ण आत्मप्रदेशों में भरितावस्थ है। और वह किस विशेषतावाला है ? ***अणण्णमणो*** अनन्य मन है; कापोतलेश्या आदि सम्बन्धी दृष्ट, श्रुत, अनुभूत भोगों की आकांक्षा आदि समस्त परभावों से उत्पन्न विकल्पजालों से रहित होने के कारण एकाग्र मनवाला है। ऐसा वह और क्या करता है ? ***जाणदि*** जानता है; स्व-पर को परिच्छित्ति के आकार से प्राप्त करता / जानता है। ***पस्सदि*** देखता है; निर्विकल्परूप से अवलोकन करता है। ***णियदं*** निश्चितरूप में। वह किसे जानता-देखता है ? ***अप्पणं*** निज आत्मा को जानता-देखता है। उसे किससे जानता-देखता है ? ***सहावेण*** स्वभाव से, निर्विकार चैतन्य चमत्काररूप प्रकाश से जानता-देखता है।

ततः स्थितं विशुद्धज्ञानदर्शनलक्षणे जीवस्वभावे निश्चलावस्थानं मोक्षमार्ग इति॥ १६६॥

अथ तमेव स्वसमयं प्रकारांतरेण व्यक्तीकरोति —

चरियं चरदि सगं सो जो परदव्वप्पभावरहिदप्पा। (१५९)
दंसणणाणवियप्पं अवियप्पं चरदि अप्पादो॥ १६७॥

चरदि चरति। किं? *चरियं* चरितं। कथंभूतं? *सगं* स्वकं *सो* स पुरुषः निरुपरागसदानन्दैक-लक्षणं निजात्मानुचरणरूपं जीवितमरणलाभालाभसुखदुःखनिंदाप्रशंसादिसमताभावनानुकूलं स पुरुषः स्वकीयं चरितं चरति। यः किंविशिष्टः? *जो परदव्वप्पभावरहिदप्पा* यः परद्रव्यात्मभावरहितात्मा पञ्चेन्द्रियविषयाभिलाषममत्वप्रभृतिनिरवशेषविकल्पजालरहितत्वात्समस्तबहिरंगपरद्रव्येषु ममत्वकारण-भूतेषु योगी स्वात्मभाव उपादेयबुद्धिरालंबनबुद्धिर्ध्येयबुद्धिश्चेति तया रहित आत्मस्वभावो यस्य स

इससे यह निश्चित हुआ कि विशुद्ध ज्ञान-दर्शन लक्षण जीवस्वभाव में निश्चल अवस्थान मोक्षमार्ग है॥ १६६॥

अब, उसी स्वसमय को प्रकारान्तर से व्यक्त करते हैं —

पर पदार्थात्मक विभावों से, रहित दृग ज्ञान को।
यदि स्वयं से करता अभिन्न, चरित्र स्व का चरण तो॥ १६७॥

गाथार्थ - परद्रव्यात्मक भावों से रहित स्वरूपवाला जो दर्शन-ज्ञान के विकल्प को आत्मा से अविकल्प / अभिन्नरूप आचरण करता है, वह स्वचारित्र का आचरण करता है।

टीकार्थ - ***चरदि*** आचरण करता है। किसका आचरण करता है? ***चरियं*** चारित्र का आचरण करता है। वह चारित्र कैसा है? ***सगं*** स्व का / अपना है। ***सो*** वह पुरुष निरुपराग सदानन्द एक लक्षण निजात्मा के अनुचरणरूप, जीवन-मरण, लाभ-अलाभ, सुख-दुःख, निन्दा-प्रशंसा आदि में समताभावना के अनुकूल अपने चारित्र का / स्वचारित्र का आचरण करता है। जो किस विशेषतावाला है? ***जो परदव्वप्पभावरहिदप्पा*** जो परद्रव्यात्मक भाव से रहित स्वरूपवाला है; पञ्चेन्द्रिय विषयों की अभिलाषा, ममत्व आदि सम्पूर्ण विकल्पजाल से रहित होने के कारण ममत्व के कारणभूत समस्त बहिरङ्ग परद्रव्यों में उपादेयबुद्धि, आलम्बनबुद्धि, ध्येयबुद्धिरूप से स्वात्मभाव को जोड़ने / लगानेवाले भाव से रहित है आत्मा अर्थात् स्वभाव जिसका, वह परद्रव्यात्मक भाव से रहित आत्मा है। जो और क्या करता है? ***दंसणणाणवियप्पं अवियप्पं चरदि अप्पादो*** दर्शन-ज्ञान के विकल्प को आत्मा से अविकल्प, अभिन्नरूप आचरण करता है।

भवति परद्रव्यात्मभावरहितात्मा। पुनरपि किं करोति यः ? *दंसणणाणवियप्पं अवियप्पं चरदि अप्पादो* दर्शनज्ञानविकल्पमविकल्पमभिन्नं चरत्यात्मनः सकाशादिति।

तथाहि – पूर्वं सविकल्पावस्थायां ज्ञाताहं द्रष्टाहमिति यद्विकल्पद्वयं तन्निर्विकल्पसमाधिकालेऽ -नंतज्ञानानंदादिगुणस्वभावादात्मनः सकाशादभिन्नं चरतीति सूत्रार्थः॥ १६७॥

एवं निर्विकल्पस्वसंवेदनस्वरूपस्य पुनरपि स्वसमयस्यैव विशेषव्याख्यानरूपेण गाथाद्वयं गतम्।

अथ यद्यपि पूर्वं जीवादिनवपदार्थपीठिकाव्याख्यानप्रस्तावे *सम्मत्तं णाणजुदं* इत्यादि व्यवहार -मोक्षमार्गो व्याख्यातः, तथापि निश्चयमोक्षमार्गस्य साधकोऽयमिति ज्ञापनार्थं पुनरप्यभिधीयते –

धम्मादीसद्दहणं सम्मत्तं णाणमंगपुव्वगदं। (१६०)
चिट्ठा तवं हि चरिया ववहारो मोक्खमग्गोत्ति॥ १६८॥

धर्मादिश्रद्धानं सम्यक्त्वं भवति, तेषामधिगमो ज्ञानं, द्वादशविधे तपसि चेष्टा चारित्रमिति। इतो विस्तरः – वीतरागसर्वज्ञप्रणीतजीवादिपदार्थविषये सम्यक्श्रद्धानं ज्ञानं चेत्युभयं गृहस्थतपोधनयोः

वह इस प्रकार – पहले सविकल्प अवस्था में 'मैं ज्ञाता हूँ, मैं दृष्टा हूँ' – ये जो दो विकल्प थे, उन्हें निर्विकल्प-समाधि के समय अनन्त ज्ञानानन्द आदि गुणस्वभावी आत्मा से अभिन्नरूप आचरण करता है – ऐसा सूत्रार्थ है॥ १६७॥

इस प्रकार निर्विकल्प स्वसम्वेदन स्वरूप के ही और भी विशेष व्याख्यानरूप दो गाथाएँ पूर्ण हुईं।

अब, यद्यपि पहले जीवादि नव पदार्थों की पीठिका-व्याख्यान के प्रसङ्ग पर ***सम्मत्तं णाणजुदं*** इत्यादि द्वारा व्यवहारमोक्षमार्ग का व्याख्यान किया था; तथापि यह निश्चयमोक्षमार्ग का साधक है - ऐसा बताने के लिए फिर से उसे कहते हैं –

धर्मादि का श्रद्धान सम्यक् ज्ञान पूर्वांगादि का।
चारित्र चेष्टा तपों में व्यवहार है मोक्षमार्ग का॥ १६८॥

गाथार्थ - धर्मादि का श्रद्धान, सम्यक्त्व है; अङ्ग-पूर्वगत-ज्ञान, ज्ञान है और तप में चेष्टा / प्रवृत्ति, चारित्र है – ऐसा व्यवहारमोक्षमार्ग है।

टीकार्थ - धर्मादि का श्रद्धान सम्यक्त्व है, उनका अधिगम ज्ञान है और बारह प्रकार के तपों में चेष्टा चारित्र है। यहाँ इनका विस्तार करते हैं – वीतराग-सर्वज्ञ प्रणीत जीवादि पदार्थ के विषय में सम्यक् श्रद्धान और ज्ञान – ये दोनों गृहस्थ और तपोधन / मुनिराज के समान हैं; परन्तु

समानं, चारित्रं तपोधनानामाचारादिचरणग्रंथविहितमार्गेण प्रमत्ताप्रमत्तगुणस्थानयोग्यं पञ्चमहाव्रतपञ्च -समितित्रिगुप्तिषडावश्यकादिरूपं, गृहस्थानां पुनरुपासकाध्ययनग्रंथविहितमार्गेण पञ्चमगुणस्थान -योग्यं दानशीलपूजोपवासादिरूपं दार्शनिकव्रतिकाद्येकादशनिलयरूपं वा इति व्यवहारमोक्षमार्ग -लक्षणम्।

अयं व्यवहारमोक्षमार्गः स्वपरप्रत्ययपर्यायाश्रितं भिन्नसाध्यसाधनभावं व्यवहारनयमाश्रित्यानु -गम्यमानो भव्यजीवस्य निश्चयनयेन भिन्नसाध्यसाधनभावाभावात्स्वयमेव निजशुद्धात्मतत्त्वसम्यक् -श्रद्धानज्ञानानुष्ठानरूपेण परिणममानस्यापि सुवर्णपाषाणस्याग्निरिव निश्चयमोक्षमार्गस्य बहिरंग -साधको भवतीति सूत्रार्थः॥ १६८॥

एवं निश्चयमोक्षमार्गसाधकव्यवहारमोक्षमार्गकथनरूपेण पञ्चमस्थले गाथा गता।

अथ पूर्वं यद्यपि स्वसमयव्याख्यानकाले *जो सव्वसंगमुक्को...* इत्यादि गाथाद्वयेन निश्चय-मोक्षमार्गो व्याख्यातः, तथापि पूर्वोक्तव्यवहारमोक्षमार्गेण साध्योऽयमिति प्रतीत्यर्थं पुनरप्युपदिश्यते —

चारित्र तपोधनों के आचार आदि चरणानुयोग के ग्रन्थों में बताए गए मार्गानुसार प्रमत्त-अप्रमत्त गुणस्थान के योग्य पञ्च महाव्रत, पञ्च समिति, तीन गुप्ति, षडावश्यक आदि रूप है; तथा गृहस्थों के उपासकाध्ययन ग्रन्थ में बताए गए मार्गानुसार पञ्चम गुणस्थान के योग्य दान, शील, पूजा, उपवासादिरूप या दार्शनिक, व्रतिक आदि एकादश निलय, स्थान/प्रतिमारूप है। — इस प्रकार व्यवहारमोक्षमार्ग का लक्षण है।

स्व-पर प्रत्ययरूप पर्याय के आश्रित भिन्न साध्य-साधन भावमय व्यवहारनय का आश्रय कर, ज्ञात होने योग्य यह व्यवहारमोक्षमार्ग निश्चयनय से भिन्न साध्य-साधन भाव का अभाव होने से, स्वयं ही निज शुद्धात्मतत्त्व के सम्यक् श्रद्धान-ज्ञान-अनुष्ठानरूप से परिणमन करनेवाले भव्य जीव को भी, सुवर्ण-पाषाण को अग्नि के समान निश्चयमोक्षमार्ग का बहिरङ्ग साधक होता है — ऐसा सूत्रार्थ है॥ १६८॥

इस प्रकार निश्चय-मोक्षमार्ग के साधक व्यवहारमोक्षमार्ग के कथनरूप से पाँचवें स्थल में गाथा पूर्ण हुई।

अब, पहले यद्यपि स्वसमय व्याख्यान के समय ***जो सव्वसंगमुक्को*** इत्यादि दो गाथाओं द्वारा निश्चय-मोक्षमार्ग का व्याख्यान किया था; तथापि यह पूर्वोक्त व्यवहारमोक्षमार्ग से साध्य है — ऐसा प्रतीति के लिए और भी उपदेश देते हैं —

उनसे समाहित जीव किंचित्, अन्य को करता नहीं।
वा नहीं छोड़े वास्तव में, मोक्षमार्ग कहा वही॥ १६९॥

णिच्चयणयेण भणिदो तिहि तेहिं समाहिदो हु जो अप्पा। (१६१)
ण कुणदि किंचिवि अण्णं ण मुयदि सो मोक्खमग्गोत्ति॥ १६९॥

भणिदो भणितः कथितः। केन? ***णिच्छयणयेण*** निश्चयनयेन। स कः? ***जो अप्पा*** यः आत्मा। कथंभूतः? ***तिहि तेहिं समाहिदो य*** त्रिभिस्तैर्दर्शनज्ञानचारित्रैः समाहित एकाग्रः। पुनरपि किं करोति यः? ***ण कुणदि किंचिवि अण्णं ण मुयदि*** न करोति किंचिदपि शब्दादात्मनोऽन्यत्र क्रोधादिकं न च मुंचत्यात्माश्रितमनंतज्ञानादिगुणसमूहं ***सो*** स एवं गुणविशिष्टात्मा। कथंभूतो भणितः? ***मोक्खमग्गोत्ति*** मोक्षमार्ग इति।

तथाहि — निजशुद्धात्मरुचिपरिच्छित्तिनिश्चलानुभूतिरूपो निश्चयमोक्षमार्गस्तावत् तत्साधकं कथंचित्स्वसंवित्तिलक्षणाविद्यावासनाविलयाद्भेदरत्नत्रयात्मकं व्यवहारमोक्षमार्गमनुप्रपन्नो गुणस्थान-सोपानक्रमेण निजशुद्धात्मद्रव्यभावनोत्पन्ननित्यानंदैकलक्षणसुखामृतरसास्वादतृप्तिरूपपरम-कलानुभवात् स्वशुद्धात्माश्रितनिश्चयदर्शनज्ञानचारित्रैरभेदेन परिणतो यदा भवति तदा निश्चयनयेन

गाथार्थ - उन तीन से समाहित होता हुआ जो आत्मा, वास्तव में न तो कुछ करता है और न छोड़ता है, वह मोक्षमार्ग है — ऐसा कहा गया है।

टीकार्थ - ***भणिदो*** कहा गया है। किससे कहा गया है? ***णिच्छयणयेण*** निश्चयनय से कहा गया है। वह कौन कहा गया है? ***जो अप्पा*** जो आत्मा है, वह कहा गया है। कैसा आत्मा कहा गया है? ***तिहि तेहिं समाहिदो य*** उन तीन दर्शन-ज्ञान-चारित्र से समाहित, एकाग्र आत्मा कहा गया है। और भी जो क्या करता है? ***ण कुणदि किंचिवि अण्णं ण मुयदि*** शब्द से (भाव यह है कि) जो आत्मा से भिन्न क्रोधादि को नहीं करता है तथा आत्माश्रित अनन्त ज्ञानादि गुण-समूह को नहीं छोड़ता है। वह इस प्रकार के गुणों से विशिष्ट आत्मा; कैसा कहा गया है? मोक्षमार्ग है — ऐसा कहा गया है।

वह इस प्रकार — निज शुद्धात्मा की रुचि, परिच्छित्ति / जानकारी, निश्चल अनुभूतिरूप निश्चयमोक्षमार्ग है; अविद्या / अज्ञानजन्य वासना के विलय / समाप्त होने से उस (निश्चय-मोक्षमार्ग) के साधक कथञ्चित् स्वसम्वित्ति लक्षण भेदरत्नत्रयात्मक व्यवहारमोक्षमार्ग को प्राप्त होता हुआ, गुणस्थान सोपान (वीतरागता की श्रेणिओं के) क्रम से निज शुद्धात्मद्रव्यमय भावना से उत्पन्न नित्यानन्द एक लक्षण सुखामृत रस के आस्वाद से तृप्तिरूप परम कला के अनुभव के कारण स्व-शुद्धात्मा के आश्रित रहनेवाले निश्चयदर्शन-ज्ञान-चारित्र के साथ जब अभेदरूप से परिणत होता है, तब निश्चयनय से भिन्न साध्य-साधन का अभाव होने से यह आत्मा ही मोक्षमार्ग है।

भिन्नसाध्यसाधनस्याभावादयमात्मैव मोक्षमार्ग इति।

ततः स्थितं सुवर्णपाषाणवन्निश्चयव्यवहारमोक्षमार्गयोः साध्यसाधकभावो नितरां संभवतीति॥ १६९॥

अथाभेदेनात्मैव दर्शनज्ञानचारित्रं भवतीति कथनद्वारेण पूर्वोक्तमेव निश्चयमोक्षमार्गं दृढयति —

जो चरदि णादि पेच्छदि अप्पाणं अप्पणा अणण्णमयं।(१६२)
सो चारित्तं णाणं दंसणमिदि णिच्छिदो होदि॥ १७०॥

हवदि भवति *सो* सः कर्ता। किं भवति? *चारित्तं णाणं दंसणमिदि* चारित्रज्ञानदर्शनत्रितयमिति *णिच्छिदो* निश्चितः। स कः? *जो* यः कर्ता। किं करोति? *चरदि णादि पेच्छदि* चरति स्वसंवित्तिरूपे -णानुभवति जानाति निर्विकारस्वसंवेदनज्ञानेन रागादिभ्यो भिन्नं परिच्छिनत्ति पश्यति सत्तावलोकदर्शनेन निर्विकल्परूपेणावलोकयति अथवा विपरीताभिनिवेशरहितशुद्धात्मरुचिपरिणामेन श्रद्दधाति। कं? *अप्पाणं* निजशुद्धात्मानम्। केन कृत्वा? *अप्पणा* वीतरागस्वसंवेदनज्ञानपरिणतिलक्षणेनान्तरात्मना।

इससे निश्चित हुआ कि सुवर्ण-पाषाण के समान निश्चय-व्यवहारमोक्षमार्ग के साध्य -साधकभाव सदा सम्यक्तया होता है॥ १६९॥

अब, अभेद से आत्मा ही दर्शन-ज्ञान-चारित्र है; इस कथन की मुख्यता से पूर्वोक्त ही निश्चयमोक्षमार्ग को दृढ़ करते हैं —

हो आत्मा से नन्यमय आतम का दर्शन ज्ञान वा।
आचरण निश्चित ज्ञान दर्शन, चरण ही यह जानना॥ १७०॥

गाथार्थ - जो अनन्यमय आत्मा का आत्मा द्वारा आचरण करता है, उसे जानता है, देखता है; वह चारित्र ज्ञान-दर्शनमय है — ऐसा निश्चित है।

टीकार्थ - ***हवदि*** है। ***सो*** कर्तारूप वह है। वह क्या है? ***चारित्तं णाणं दंसणमिदि*** चारित्र-ज्ञान-दर्शन तीनों की एकतामय है, ऐसा ***णिच्छिदो*** निश्चित है। इन रूप वह कौन है? ***जो*** कर्तारूप जो; वह क्या करता है? ***चरदि णादि पेच्छदि*** आचरण करता है, स्वसम्वित्तिरूप से अनुभव करता है; जानता है, निर्विकार स्वसंवेदन-ज्ञान द्वारा रागादि से भिन्न जानता है; देखता है, निर्विकल्परूप सत्तावलोकन दर्शन द्वारा अवलोकन करता है अथवा विपरीत अभिनिवेशरहित शुद्धात्मा की रुचिरूप परिणाम द्वारा श्रद्धान करता है। यह सब किसका करता है? ***अप्पाणं*** यह सब अपने शुद्धात्मा का करता है। यह सब किसके द्वारा करता है? ***अप्पणा*** वीतराग स्वसंवेदन

कथंभूतं ? *अणण्णमयं* नान्यमयं अनन्यमयं मिथ्यात्वरागादिमयं न भवति; अथवानन्यमयमभिन्नं। केभ्यः ? केवलज्ञानाद्यनंतगुणेभ्य इति।

अत्र सूत्रे यतः कारणादभेदविवक्षायामात्मैव दर्शनज्ञानचारित्रत्रयं भवति, ततो ज्ञायते द्राक्षादि-पानकवदनेकमप्यभेदविवक्षायामेकं निश्चयरत्नत्रयलक्षणं जीवस्वभावनियतचरितं मोक्षमार्गो भवतीति भावार्थः। तथाचोक्तमात्माश्रितनिश्चयरत्नत्रयलक्षणं —

'दर्शनं निश्चयः पुंसि बोधस्तद्बोध इष्यते। स्थितिरत्रैव चारित्रमिति योगः शिवाश्रयः॥' ॥१७०॥

इति मोक्षमार्गविवरणमुख्यत्वेन गाथाद्वयं गतम्।

अथ यस्य स्वाभाविकसुखे श्रद्धानमस्ति स सम्यग्दृष्टिर्भवतीति प्रतिपादयति —

जेण विजाणदि सव्वं पेच्छदि सो तेण सोक्खमणुभवदि। (१६३)
इदि तं जाणदि भवियो अभव्वसत्तो ण सद्दहदि॥ १७१॥

-ज्ञान परिणति लक्षणमय अन्तरात्मा द्वारा करता है। कैसे आत्मा का करता है ? ***अणण्णमयं*** अन्यमय नहीं, वह अनन्यमय है, मिथ्यात्व-रागादिमय नहीं है; अथवा जो अनन्यमय, अभिन्न है – ऐसे आत्मा का करता है। वह किनसे अभिन्न है ? केवल ज्ञान आदि अनन्त गुणों से अभिन्न है।

यहाँ सूत्र में जिस कारण अभेद विवक्षा से आत्मा ही दर्शन-ज्ञान-चारित्र तीनमय है; उससे ज्ञात होता है कि द्राक्षा आदि के पानक समान (दाख आदि के मिश्रण से बनाए गए शरबत के समान) अनेक होने पर भी अभेद विवक्षा में एक निश्चयरत्नत्रय लक्षण जीवस्वभाव में नियत चारित्र मोक्षमार्ग है – ऐसा भावार्थ है। वैसा ही आत्माश्रित निश्चयरत्नत्रय का लक्षण कहा गया है –

'आत्मा (के सम्बन्ध) में निश्चय, दर्शन और उसका बोध, ज्ञान स्वीकार किया गया है; उसमें ही स्थिति, चारित्र है; इस प्रकार तीनों का योग शिवाश्रय / मोक्ष का मार्ग है।'॥ १७०॥

अब, जिसका स्वाभाविक सुख में श्रद्धान है, वह सम्यग्दृष्टि है, ऐसा प्रतिपादन करते हैं –

जिससे सभी जानें व देखें, उसी से सुख अनुभवें।
यह जानता वह भव्य यह, श्रद्धा अभव्य नहीं करे॥ १७१॥

गाथार्थ - जिससे सबको जानता और देखता है, उससे वह सौख्य का अनुभव करता है - ऐसा (जो) जानता है वह भव्य है; अभव्य जीव इसका श्रद्धान नहीं करता है।

टीकार्थ - ***जेण*** कर्तारूप यह जीव लोकालोक को प्रकाशित करनेवाले जिस ज्ञान द्वारा

जेण अयं जीवः कर्ता येन लोकालोकप्रकाशककेवलज्ञानेन *विजाणदि* विशेषेण संशयवि-पर्ययानध्यवसायरहितत्वेन जानाति परिच्छिनत्ति। किं? *सव्वं* सर्वं जगत्त्रयकालत्रयवर्तिवस्तु-कदम्बकम्। न केवलं जानाति, *पेच्छदि* येनैव लोकालोकप्रकाशककेवलदर्शनेन सत्तावलोकेन पश्यति, *सो तेण सोक्खमणुभवदि* स जीवस्तेनैव केवलज्ञानदर्शनद्वयेनानवरतं ताभ्यामभिन्नं सुखमनु-भवति *इदि तं जाणदि भवियो* इति पूर्वोक्तप्रकारेण तदनंतसुखं जानात्युपादेयरूपेण श्रद्दधाति स्वकीय-स्वकीयगुणस्थानानुसारेणानुभवति च। स कः? भव्यः। *अभव्वसत्तो ण सद्दहदि* अभव्यजीवो न श्रद्धधाति।

तद्यथा — मिथ्यात्वादिसप्तप्रकृतीनां यथासंभवं चारित्रमोहस्य चोपशमक्षयोपशमक्षये सति स्वकीयस्वकीयगुणस्थानानुसारेण यद्यपि हेयबुद्ध्या विषयसुखमनुभवति भव्यजीवः तथापि निज-शुद्धात्मभावनोत्पन्नमतीन्द्रियसुखमेवोपादेयं मन्यते, न चाभव्यः। कस्मादिति चेत्? तस्य पूर्वोक्तदर्शन-चारित्रमोहनीयोपशमादिकं न संभवति ततश्चैवाभव्य इति भावार्थः॥ १७१॥

विजाणदि संशय, विपर्यय, अनध्यवसाय से रहित होने के कारण विशेषरूप से जानता है, सब ओर से पूर्ण जानकारी करता है। किसे जानता है? ***सव्वं*** सभी को, तीन लोक-तीन कालवर्ती वस्तुसमूह को जानता है। मात्र जानता ही नहीं है; अपितु ***पेच्छदि*** लोकालोक को प्रकाशित करनेवाले सत्तावलोकनरूप जिस केवलदर्शन द्वारा देखता है; ***सो तेण सोक्खमणुभवदि*** वह जीव उन्हीं केवलज्ञान-दर्शन — दोनों द्वारा निरन्तर उनसे अभिन्न सुख का अनुभव करता है। ***इदि तं जाणदि भवियो*** इस पूर्वोक्त प्रकार से उस अनन्त सुख को जानता है, उपादेयरूप से उसका श्रद्धान करता है और अपने-अपने गुणस्थान के अनुसार उसका अनुभव करता है। ऐसा करनेवाला वह कौन है? वह भव्य है। ***अभवियसत्तो ण सद्दहदि*** अभव्य जीव उसका श्रद्धान नहीं करता है।

वह इस प्रकार — मिथ्यात्व आदि सात प्रकृतियों का और यथासम्भव चारित्रमोह का उपशम, क्षयोपशम या क्षय होने पर यद्यपि भव्य जीव अपने-अपने गुणस्थानानुसार हेय बुद्धि से विषयसुख का अनुभव करता है; तथापि निज शुद्धात्मा की भावना से उत्पन्न अतीन्द्रिय सुख को ही उपादेय मानता है; परन्तु अभव्य उसे स्वीकार नहीं करता है। वह स्वीकार क्यों नहीं करता है? यदि ऐसा प्रश्न हो तो उत्तर देते हैं — उसके पूर्वोक्त दर्शन-चारित्र मोहनीय के उपशमादि सम्भव नहीं हैं; इसलिए वह उसे स्वीकार नहीं करता है तथा उसी कारण वह अभव्य है — ऐसा भावार्थ है॥ १७१॥

[*इस गाथा-टीका में आचार्य अमृतचन्द्र ने सुख की कारणता को सहेतुक सिद्ध किया है, जो मूलतः पठनीय है।*]

एवं भव्याभव्यस्वरूपकथनमुख्यत्वेन सप्तमस्थले गाथा गता।

अथ दर्शनज्ञानचारित्रैः पराश्रितैर्बन्धः स्वाश्रितैर्मोक्षो भवतीति समर्थयतीति —

दंसणणाणचरित्ताणि मोक्खमग्गोत्ति सेविदव्वाणि।(१६४)
साधूहिं इदं भणिदं तेहिं दु बंधो व मोक्खो वा॥ १७२॥

दंसणणाणचरित्ताणि मोक्खमग्गोत्ति सेविदव्वाणि **दर्शनज्ञानचारित्राणि मोक्षमार्गो भवतीति हेतोः सेवितव्यानि। इदं कैरुपदिष्टं ?** ***साधूहिं इदं भणिदं*** **साधुभिरिदं भणितं कथितं** ***तेहिं दु बंधो व मोक्खो वा*** **तैस्तु पराश्रितैर्बंधः स्वाश्रितैर्मोक्षो वेति।**

इतो विशेषः — शुद्धात्माश्रितानि सम्यग्दर्शनज्ञानचारित्राणि मोक्षकारणानि भवन्ति पराश्रितानि बंधकारणानि भवन्ति च। केन दृष्टान्तेनेति चेत् ? यथा घृतानि स्वभावेन शीतलान्यपि पश्चादग्निसंयोगेन दाहकारणानि भवंति तथा तान्यपि स्वभावेन मुक्तिकारणान्यपि पञ्चपरमेष्ठ्यादिप्रशस्तद्रव्याश्रितानि

इस प्रकार भव्य-अभव्य के स्वरूप-कथन की मुख्यता से सातवें स्थल में गाथा पूर्ण हुई।

अब, पराश्रित दर्शन-ज्ञान-चारित्र से बन्ध है और स्वाश्रित से मोक्ष है — ऐसा समर्थन करते हैं —

दृग ज्ञान चारित्र मोक्षमग है, अतः सेवन योग्य ही।
पर साधु ऐसा कहें उनसे, बंध भी है मोक्ष भी॥ १७२॥

गाथार्थ - दर्शन-ज्ञान-चारित्र मोक्षमार्ग है; अतः वे सेवन करने-योग्य है — ऐसा साधुओं ने कहा है; परन्तु उनसे बन्ध भी होता है और मोक्ष भी।

टीकार्थ - ***दंसणणाणचरित्ताणि मोक्खमग्गोत्ति सेविदव्वाणि*** दर्शन-ज्ञान-चारित्र मोक्षमार्ग है — इस कारण सेवन करना चाहिए। ऐसा उपदेश किनने दिया है ? ***साधूहिं इदं भणिदं*** साधुओं ने ऐसा उपदेश दिया है / कहा है। ***तेहिं दु बंधो वा मोक्खो वा*** परन्तु उन पराश्रित से बन्ध है और स्वाश्रित से मोक्ष है।

यहाँ विशेष कहते हैं — शुद्धात्मा के आश्रित सम्यग्दर्शन-ज्ञान-चारित्र, मोक्ष के कारण हैं और पराश्रित, बन्ध के कारण हैं। किस दृष्टान्त से ? यदि ऐसा प्रश्न हो तो कहते हैं — जैसे स्वभाव से शीतल होने पर भी घी बाद में अग्नि-संयोग से दाह का कारण होता है; उसी प्रकार स्वभाव से मुक्ति के कारण होने पर भी पञ्च परमेष्ठी आदि प्रशस्त द्रव्य के आश्रित होने पर, वे भी साक्षात् पुण्यबन्ध के कारण होते हैं तथा मिथ्यात्व और विषय-कषाय के निमित्तभूत परद्रव्य

साक्षात्पुण्यबंधकारणानि भवंति, मिथ्यात्वविषयकषायनिमित्तभूतपरद्रव्याश्रितानि पुनः पापबंध -कारणान्यपि भवन्ति। तस्माद् ज्ञायते जीवस्वभावनियतचरितं मोक्षमार्ग इति॥ १७२॥

एवं शुद्धाशुद्धरत्नत्रयाभ्यां यथाक्रमेण मोक्षपुण्यबन्धौ भवत इति कथनरूपेण गाथा गता।

तदनंतरं सूक्ष्मपरसमयव्याख्यानसंबंधित्वेन गाथापञ्चकं भवति, तत्रेका सूत्रगाथा, तस्या विवरणं गाथात्रयं, ततश्चोपसंहारगाथैका चेति नवमस्थले समुदायपातनिका।

अथ सूक्ष्मपरसमयस्वरूपं कथयति —

अण्णाणादो णाणी जदि मण्णदि सुद्धसंपओगादो।(१६५)
हवदित्ति दुक्खमोक्खो परसमयरदो हवदि जीवो॥ १७३॥

अण्णाणादो णाणी जदि मण्णदि शुद्धात्मपरिच्छित्तिविलक्षणादज्ञानात्सकाशात् ज्ञानी कर्ता यदि मन्यते। किं? *हवदित्ति दुक्खमोक्खो* स्वस्वभावेनोत्पन्नसुखप्रतिकूलदुःखस्य मोक्षो विनाशो

के आश्रित होने पर पापबन्ध के कारण भी होते हैं। इससे ज्ञात होता है कि जीवस्वभाव में नियत चारित्र मोक्षमार्ग है॥ १७२॥

इस प्रकार शुद्धाशुद्ध रत्नत्रय द्वारा यथाक्रम से मोक्ष और पुण्यबन्ध होता है – इस कथनरूप से गाथा पूर्ण हुई।

तत्पश्चात् सूक्ष्म परसमय के व्याख्यान से सम्बन्धित पाँच गाथाएँ हैं। वहाँ एक सूत्र गाथा, उसका विवरण तीन गाथाओं में और उसके बाद एक उपसंहार गाथा – इस प्रकार नवमें स्थल में समुदाय पातनिका है।

अब, सूक्ष्म परसमय का स्वरूप कहते हैं –

'हो शुद्ध में सम्प्रयोग से, दुख-मोक्ष' यदि अज्ञान से।
है मानता ज्ञानी वही है, परसमय-रत इसी से॥ १७३॥

गाथार्थ - यदि अज्ञान से ज्ञानी ऐसा मानता है कि शुद्ध सम्प्रयोग (शुभभाव) से दुःख -मोक्ष होता है तो वह जीव परसमय-रत है।

टीकार्थ - ***अण्णाणादो णाणी जदि मण्णदि*** शुद्धात्मा की परिच्छित्ति से विलक्षण अज्ञान के कारण कर्तारूप ज्ञानी यदि मानता है। वह क्या मानता है? ***हवदित्ति दुक्खमोक्खो*** अपने स्वभाव से उत्पन्न सुख से प्रतिकूल दुःख का मोक्ष, विनाश होता है – ऐसा मानता है। वह ऐसा किससे होना मानता है? ***सुद्धसंपयोगादो*** शुद्धों में, शुद्ध-बुद्ध एक स्वभाव में अथवा

भवतीति। कस्मादिति तत्? *सुद्धसंपयोगादो* शुद्धेषु शुद्धबुद्धैकस्वभावेषु शुद्धबुद्धैकस्वभावाराधकेषु वार्हदादिषु संप्रयोगो भक्तिः शुद्धसंप्रयोगस्तस्मात् शुद्धसंप्रयोगात्। तदा कथंभूतो भवति? *परसमयरदो हवदि* तदा काले परसमयरतो भवति *जीवो* स पूर्वोक्तो ज्ञानी जीव इति।

